उद्धृतयोगवाासिष्ठश्लोकाः

१ श्रीः। यतःसर्वाणि भूतानि प्रतिभान्ति स्थितानि च ।
यत्रैवोपशमं यान्ति तस्मै सत्यात्मने नमः ।। १.१.१

२ ज्ञाता ज्ञानं तथा ज्ञेयं द्रष्टा दर्शनदृश्यभूः ।
कर्ता हेतुः क्रिया यस्मात्तस्मै ज्ञप्त्यात्मने नमः ।। १.१.२

३ स्फुरन्ति सीकरा यस्मादानन्दस्याम्बरेऽवनौ ।
सर्वेषां जीवनं तस्मै ब्रह्मानन्दात्मने नमः ।। १.१.३

४ दिवि भूमौ तथाकाशे बहिरन्तश्च मे विभुः ।
यो विभात्यवभासात्मा तस्मै सर्वात्मने नमः ।। १.२.१

५ अहं बद्धो विमुक्तःस्यामिति यस्यास्ति निश्चयः ।
नात्यन्तमज्ञो नोत ज्ञः सोऽस्मिञ्छास्त्रेऽधिकारवान् ।। १.२.२

६ भ्रमस्य जागतस्यास्य जातस्याकाशवर्णवत् ।
अपुनःस्मरणं मन्ये साधो विस्मरणं वरम् ।। १.३.२

७ दृश्यात्यन्ताभावबोधं विना तन्नानुभूयते ।
कदाचित्केनचिन्नाम स्वबोधोऽन्विष्यतामतः ।। १.३.३

८ स चेह संभवत्येव तदर्थमिदमाततम् ।
शास्त्रमाकर्णयसि चेत्तत्त्वमाप्स्यसि नान्यथा ।। १.३.४

९ जगद्भ्रमोऽयं दृश्योऽपि नास्त्येवेत्यनुभूयते ।
वर्णो व्योम्न इवाखेदाद्विचारेणामुनाऽनघ ।। १.३.५

१० दृश्यं नास्तीति बोधेन मनसो दृश्यमार्जनम् ।
संपन्नं चेत्तदुत्पन्ना परा निर्वाणनिर्वृतिः ।। १.३.६

११ अन्यथा शास्त्रगर्तेषु लुठतां भवतामिह ।
भवत्यकृत्रिमाज्ञानां कल्पैरपि न निर्वृतिः ।। १.३.७

१२ अशेषेण परित्यागो वासनानां य उत्तमः ।
मोक्ष इत्युच्यते सद्भिः स एव विमलक्रमः ।। १.३.८

१३ भारोऽविवेकिनः शास्त्रं भारो ज्ञानं च रागिणः ।
अशान्तस्य मनो भारो भारोऽनात्मविदो वपुः ।। १.१४.१३

१४ अपि मेरूपमं प्राज्ञमपि शूरमपि स्थिरम् ।
तृणीकरोति तृष्णैषा निमिषेण नरोत्तमम् ।। १.१७.५०

१५ अपर्याप्तं हि बालत्वं बलात्पिबति यौवनम् ।
यौवनं च जरा पश्चात्पश्य कर्कशतां मिथः ।। १.२२.१

१६ परमेष्ठ्यपि निष्ठावान् ह्रियते हरिरप्यजः ।
भवोऽप्यभावमायाति कैवास्था मादृशे जने ।। १.२६.२९

१७ कल्पाभिधानक्षणजीविनो हि
कल्पौघसंख्याकलने विरिञ्चयाः ।
अतः कलामालिनि कालजाले
लघुत्वदीर्घत्वधियोऽप्यसत्याः ।। १.२७.३२

१८ ब्रह्मा विष्णुश्च रुद्रश्च सर्वा वा भूतजातयः ।
नाशमेवानुधावन्ति सलिलानीव वाडवम् ।। १.२८.२१

१९ यथायं स्वविकल्पोत्थः स्वविकल्पपरिक्षयात् ।
क्षीयते दग्धसंसारो निःसार इति निश्चयः ।। २.१.३३

२० अविच्छिन्नचिदात्मैकः पुमानस्तीह नेतरत् ।
स्वसंकल्पवशाद्बद्धो निःसंकल्पश्च मुच्यते ।। २.१.३६

२१ स्वानुभूतेश्च शास्त्रस्य गुरोश्चैवैकवाक्यता ।
यस्याभ्यासेन तेनात्मा संततेनावलोक्यते ।। २.१३.११

२२ पुरुषार्थैकसाध्येन वासनैकार्थकर्मणा ।
केवलं तन्मनोमात्रजयादासाद्यते पदम् ।। २.१३.४०

२३ मोक्षद्वारे द्वारपालाश्चत्वारः परिकीर्तिताः ।
शमो विचारः संतोषश्चतुर्थः साधुसंगमः ।।

२४ एते सेव्याः प्रयत्नेन चत्वारो द्वौ त्रयोऽथवा ।
द्वारमुद्घाटयन्त्येते मोक्षे राजगृहे यथा ।।

२५ श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा शुभाशुभम् ।
न हृष्यति ग्लायति यः स शान्त इति कथ्यते ।। २.१३.७२

२६ तुषारकरबिम्बाच्छं मनो यस्य निराकुलम् ।

मरणोत्सवयुद्धेषु स शान्त इति कथ्यते ।। २.१३.७२
२७ विच्छिन्नग्रन्थयस्तज्ज्ञाः साधवः सर्वसंमताः ।।
२८ शून्यमाकीर्णतामेति मृत्युरप्युत्सवायते ।
आपत्संपदिवाभाति विद्वज्जनसमागमे ।।
२९ यः स्नातः शीतसितया साधुसंगमगङ्गया ।
किं तस्य दानैः किं तीर्थैः किं तपोभिः किमध्वरैः ।।
३० अप्राप्तवाञ्छामुत्सृज्य संप्राप्ते समतां गतः ।
अदृष्टखेदाखेदो यः संतुष्टः स इहोच्यते ।। २.१५.६
३१ आशावैवश्यविवशे चित्ते संतोषवर्जिते ।
म्लाने वक्त्रमिवादर्शे न ज्ञानं प्रतिबिम्बति ।। २.१५.९
३२ यैर्यैः काकुत्स्थ दृष्टान्तैस्त्वं मयेहावबोध्यसे ।
सर्वे सकारणास्ते हि प्राप्यन्तु सदकारणम् ।। २.१८.५२
३३ ब्रह्मोपदेशदृष्टान्तो यस्तवेह हि कथ्यते ।
एकदेशसधर्मत्वं तत्रान्तः परिगृह्यताम् ।। २.१८.५४
३४ एवं सति निराकारे ब्रह्मण्याकारवान्कथम् ।
दृष्टान्त इति नोद्यन्ति मूर्खां वैकल्पिकोक्तयः ।। २.१८.५६
३५ गुणाः शमादयो ज्ञानाच्छमादिभ्यस्तथा ज्ञता ।
परस्परं विवर्धन्ते द्वे पद्मसरसी इव ।। २.२०.६
३६ ऋतमात्मा परं ब्रह्म सत्यमित्यादिका बुधैः ।
कल्पिता व्यवहारार्थं तस्य संज्ञा महात्मनः ।। ३.१.१२
३७ अनुभूतेर्वेदनस्य प्रतिपत्तेर्यथाभिधम् ।
प्रत्यक्षमिति नामेह कृतं जीवः स एव नः ।। २.१९.१८
३८ स एव संवित्स पुमानहन्ताप्रत्ययात्मकः ।
स यदोदेति संवित्त्या सा पदार्थ इति स्मृता ।। २.१९.१९
३९ स संकल्पविकल्पाद्यैः कृतनानाक्रमो भ्रमैः ।
जगत्तया स्फुरत्यम्बु तरङ्गादितया यथा ।। २.१९.२०
४० रूपालोकमनस्कारपदार्थव्याकुलं जगत् ।
विद्यते वेदनस्यान्तर्वातान्तः स्पन्दनं यथा ।। २.१९.२८
४१ बन्धोऽयं दृश्यसद्भावाद्दृश्याभावे न बन्धनम् ।

न संभवति दृश्यं तु यथेदं शृणु कथ्यते ।। ३.१.६
४२ यदिदं दृश्यते सर्वं जगत्स्थावरजङ्गमम् ।
तत्सुषुप्ताविव स्वप्नः कल्पान्ते प्रविनश्यति ।। ३.१.१०
४३ ततः स्तिमितगम्भीरं न तेजो न तमस्ततम् ।
अनाख्यमनभिव्यक्तं सत्किंचिदवशिष्यते ।। ३.१.११
४४ ततः स जीवशब्दार्थः कलनाकुलतां गतः ।
मनो भवति भूतात्मा मननान्मन्थरीभवत् ।। ३.१.१४
४५ मनः संपद्यते नाम महतः परमात्मनः ।
सुस्थिरादस्थिराकारं तरङ्ग इव वारिधेः ।। ३.१.१५
४६ द्रष्टुर्दृश्यस्य सत्ताङ्ग बन्ध इत्यभिधीयते ।
द्रष्टा दृश्यवशाद्बद्धो दृश्याभावे विमुच्यते ।। ३.१.२२
४७ जगत्त्वमहमित्यादिसर्गात्मा दृश्यमुच्यते ।
यावदेतत्संभवति तावन्मोक्षो न विद्यते ।। ३.१.२३
४८ आतिवाहिक एवासौ देहोऽस्त्यस्य स्वयंभुवः ।
नत्वाधिभौतिको राम देहोऽजस्योपपद्यते ।। ३.३.६
४९ संकल्पनं मनो विद्धि संकल्पात्तन्न भिद्यते ।
यत्र संकल्पनं तत्र मनोऽस्तीत्यवगम्यताम् ।। ३.४.४३
५० संकल्पमनसी भिन्ने न कदाचन के च न ।
अविद्यासंसृतिश्चित्तं मनो बन्धो मलस्तमः ।। ३.४.४४
५१ इति संकल्पजालस्य नामान्येतानि राघव ।
संकल्पजाले गलिते स्वरूपमवशिष्यते ।।
५२ असंभवति सर्वस्मिन्दिग्भूम्याकाशरूपिणि ।
प्रकाश्ये यादृशं रूपं प्रकाशस्यामलं भवेत् ।। ३.४.५५
५३ त्रिजगत्त्वमहं चेति दृश्येऽसत्त्वमुपागते ।
द्रष्टुः स्यात्केवलीभावस्तादृशो विमलात्मनः ।। ३.४.५६
५४ अनाप्ताखिलशैलादिप्रतिबिम्बे हि यादृशी ।
स्याद्दर्पणे दर्पणता केवलात्मस्वरूपिणी ।। ३.४.५७
५५ अहं त्वं जगदित्यादौ प्रशान्ते दृश्यसंभ्रमे ।
स्यात्तादृशी केवलता स्थिते द्रष्टर्यवीक्षणे ।। ३.४.५८

५६ मनो दृश्यमयं दोषं तनोतीमं क्षयात्मकम् ।
असदेव सदाकारं स्वप्नः स्वप्नान्तरं यथा ।। ३.४.७८
५७ स्फुरति वल्गति गच्छति याचते
भ्रमति मज्जति संहरति स्वयम् ।
अपरतामुपयात्यपि केवलं
चलति चञ्चलशक्तितया मनः ।। ३.४.८०
५८ महाप्रलयसंपत्तावसत्तां समुपागते ।
अशेषदृश्ये सर्गादौ शान्तमेवावशिष्यते ।। ३.५.३
५९ आस्तेऽनस्तमितो भास्वानजो देवो निरामयः ।
सर्वदा सर्वकृत्सर्वः परमात्मा महेश्वरः ।। ३.५.४
६० नाशयित्वा स्वमात्मानं मनसो वृत्तिसंक्षये ।
सद्रूपं यदनाख्येयं तद्रूपं तस्य वस्तुनः ।। ३.१०.३९
६१ ब्रह्मार्कविष्णुहरशक्रसदाशिवादि
शान्तौ शिवं परममेतदिहैकमास्ते ।
सर्वोपाधिव्ययवशादविकल्परूपं
चैतन्यमात्रमयमुज्झितविश्वसंगम् ।। ३.१०.५४
६२ चित्ताकाशं चिदाकाशमाकाशं च तृतीयकम् ।
द्वाभ्यां शून्यतरं विद्धि चिदाकाशं वरानने ।। ३.१७.१०
६३ देशाद्देशान्तरप्राप्तौ संविदो मध्यमेव यत् ।
निमेषेण चिदाकाशं तद्विद्धि वरवर्णिनि ।। ३.१७.१२
६४ तस्मिन्निरस्तनिःशेषसंकल्पस्थितिमेषि चेत् ।
सर्वात्मकं पदं शान्तं तदा प्राप्नोष्यसंशयम् ।। ३.१७.१३
६५ अत्यन्ताभावसंपत्त्या जगतस्त्वेतदाप्यते ।
नान्यथा मद्वरेणाशु त्वं तु प्राप्स्यसि सुन्दरि ।। ३.१७.१४
६६ द्वैतं यथा नास्ति चिदात्मजीवयो-
स्तथैव भेदोऽस्ति न जीवचित्तयोः ।
यथैव भेदोऽस्ति न जीवचित्तयो-
स्तथैव भेदोऽस्ति न चित्तसर्गयोः ।। ३.६५.१२
६७ चित्तमयी लीला जगदेतच्चराचरम् ।।

६८ आत्मैवास्ति परं सत्यं नान्याः संसारदृष्टयः ।।
६९ सर्वं हि मन एवेदमित्थं स्फुरति सृष्टिषु ।।
७० जगत् चितिशक्तिसमुल्लासं ।।
७१ चित्तबालो जगद्यक्षं मिथ्या पश्यत्यबोधितः ।
बोधितोऽसौ परं रूपं स्वं पश्यति निरामयम् ।। ३.८४.४३
७२ पद्मासनगतो भास्वान्ब्रह्माहमिति तेजसा ।
सृजामि संहरामीति ध्यानमस्तु चिराय वः ।। ३.८६.३५
७३ अन्तःस्थेनैव मनसा चिन्तयामासुरादृताः ।
ब्रह्माहं जगतः स्रष्टा कर्ता भोक्ता महेश्वरः ।।
७४ लोकपालपुरैः सार्धं भुवनानि चतुर्दश ।
निर्मितानि मयैतानि तेषामन्तरहं स्थितः ।।
७५ अथ ते ब्राह्मणा एवं बद्धब्रह्मात्मभावनाः ।
देहान्विसस्मरूः पूर्वान्पूर्वभावनयार्पितान् ।।
७६ अथ ते देहकाः सर्वे पवनैरातपेन च ।
कालेन शोषमभ्येत्य गलिताः शीर्णपर्णवत् ।।
७७ स तेषां दशधा सर्गप्रतिभासोऽयमुत्थितः ।
भावनापरिपाकेन दश ते ब्रह्मतां गताः ।।
७८ त एते दश संस्कारा मनोव्योमनि संस्थिताः ।
एषामन्यतमस्याहं भास्करोऽहर्निशाकरः ।। ३.८७.९
७९ मनो हि जगतां कर्तृ मनो हि पुरुषः परः ।
मनःकृतं कृतं लोके न शरीरकृतं कृतम् ।। ३.८९.१
८० सामान्या ब्राह्मणा भूत्वा मनोभावनया किल ।
ऐन्दवा ब्रह्मतां याता मनसः पश्य शक्तिताम् ।। ३.८९.२
८१ मनसा भाव्यमानो हि देहितां याति देहकः ।
देहभावनया मुक्तो देहधर्मैर्न बाध्यते ।। ३.८९.३
८२ नान्तर्मुखतया योगी देहे वेत्ति प्रियाप्रिये ।। ३.८९.४
८३ भावितं तीव्रवेगेन मनसा यन्महीपते ।। ३.८९.४१
८४ तदेव पश्यत्यखिलं न शरीरविचेष्टितम् ।
न काञ्चन क्रिया राजन्मुनिशापादिका अपि ।। ३.८९.४२/४३

८५ तीव्रवेगेन संपन्नं शक्ताश्चालयितुं मनः ।।

८६ सर्व एव जगत्यस्मिन्द्विशरीराः शरीरिणः ।। ३.९२.९

८७ एकं मनःशरीरं तु क्षिप्रकारि चलं सदा ।
अकिंचित्करमन्यच्च शरीरं मांसनिर्मितम् ।। ३.९२.१०

८८ अनन्तस्यात्मतत्त्वस्य सर्वशक्तेर्महात्मनः ।
संकल्पशक्तिखचितं यद्रूपं तन्मनो विदुः ।। ३.९६.३

८९ भावः सदसतोर्मध्ये नृणां चलति यश्चलः ।
कलनोन्मुखतां यातस्तद्रूपं मनसो विदुः ।। ३.९६.४

९० यतःकुतश्चिदुत्पन्नं चित्तं यत्किंचिदेव हि ।
नित्यमात्मविमोक्षाय योजयेन्मुक्तियुक्तिषु ।। ३.९८.१

९१ प्रबुद्धानां मनो राम ब्रह्मैवेदं हि नेतरत् ।
सर्वशक्ति परंब्रह्म नित्यमापूर्णमव्ययम् ३.१००.२/५

९२ स्वसंकल्पवशान्मूढो मोहमेति न पण्डितः ।
धिया विचारधर्मिण्या मोहसंरम्भहीनया ।
विचारय धिया सत्यमसत्यं हि परित्यज ।। ३.१०२.१

९३ अबद्धो बद्ध इत्युक्त्वा किं मुधा परिशोचसि ।
अनन्तस्यात्मतत्त्वस्य किं कथं केन बध्यते ।। ३.१०२.९

९४ अनन्ते चिद्घनानन्दे निर्विकल्पैकरूपिणि ।
स्थिते द्वितीयस्याभावात्को बद्धः कश्च मुच्यते ।।

९५ तस्मादुल्लासमात्रं तु मनसो बन्धतां गतम् ।
मनःप्रशमने राम मोक्ष एवावशिष्यते ।।

९६ यत्कृतं मनसा नाम तत्कृतं विद्धि राघव ।
यत्त्यक्तं मनसा तावत्तत्त्यक्तं विद्धि राघव ।। ३.११०.१४

९७ यस्याचपलतां यातं मनो मननवर्जितम् ।
अनुत्तमपदेनासौ ध्यानेनानुगतोऽनघ ।। ३.११०.६४

९८ संयमान्मनसः शान्तिमेति संसारविभ्रमः ।
मन्दरेऽस्पन्दतां याते यथा क्षीरमहार्णवः ।। ३.११०.६५

९९ मनसो वृत्तयो या या भोगसंकल्पविभ्रमाः ।
संसारविषवृक्षाणां ता एवाङ्कुरपङ्क्तयः ।। ३.११०.६६

१०० अस्य चित्तमहाव्याधेश्चिकित्सायां परौषधम् ।
स्वायत्तं शृणु वक्ष्यामि सुसाध्यं स्वादु निश्चितम् ३.१११.१

१०१ त्यजन्नभिमतं वस्तु यस्तिष्ठति निरामयः ।
जितमेव मनस्तेन बाह्यं प्रसरमुज्झता ।। ३.१११.३

१०२ स्वायत्तमेकान्तहितं स्वेप्सितत्यागवेदनम् ।
यस्य दुष्करतां यातं धिक्तं पुरुषकीटकम् ।। ३.१११.८

१०३ शास्त्रसंगमतीक्ष्णेन चिन्तातप्तमतापिना ।
छिन्धि त्वमायसेनायो मनसैव मुने मनः ।। ३.१११.५

१०४ स्वपौरुषैकसाध्येन स्वेप्सितत्यागरूपिणा ।
मनःप्रशममात्रेण विना नास्ति शुभा गतिः ।। ३.१११.१२

१०५ सर्वं सर्वगतं शान्तं ब्रह्म संपद्यते तदा ।
असंकल्पनशस्त्रेण छिन्नं चित्तं गतं यदा ।।

१०६ तां महापदवीमेकां कामप्यधिवसंश्चिरम् ।
चित्तं चिद्भक्षितं कृत्वा चित्तादपि परो भव ।। ३.१११.१८

१०७ भव भावनया मुक्तो युक्तः परमया धिया ।
धारयात्मानमव्यग्रो ग्रस्तं चित्तं ततः परम् ।। ३.१११.१९

१०८ परं पौरुषमाश्रित्य नीत्वा चित्तमचित्तताम् ।
तां महापदवीमेहि यत्र नासि न चेतरत् ।। ३.१११.२०

१०९ अनुद्वेगः श्रियो मूलमनुद्वेगात्प्रवर्तते ।
जन्तोर्मनोजयो येन त्रिलोकीविजयस्तृणम् ।। ३.१११.२२

११० ध्यानतो हृदयाकाशे चितिचिच्चक्रधारया ।
मनो मारय निःशङ्कं ततो बध्नन्ति नाधयः ।। ३.१११.३२

१११ यदि रम्यमरम्यत्वे त्वया संविदितं विदा ।
छिन्नान्येव तदङ्गानि चित्तस्येति मतिर्मम ।। ३.१११.३३

११२ अयं सोऽहमिदं तन्मे एतावन्मात्रकं मनः ।
तदभावनमात्रेण दात्रेणेव विलूयते ।। ३.१११.३४

११३ छिन्नाभ्रमण्डलं व्योम्नि यथा शरदि धूयते।
वातेनाकल्पनेनैवं तथान्तर्धूयते मनः ।। ३.१११.३५

११४ कल्पान्तपवना वान्तु यान्तु चैकत्वमर्णवाः ।

तपन्तु द्वादशादित्या नास्ति निर्मनसः क्षतिः ।। ३.१११.४०

११५ असंकल्पनमात्रैकसाध्ये सकलसिद्धिदे ।
असंकल्पातिसाम्राज्ये तिष्ठावष्टब्धतत्पदः ।। ३.१११.४२

११६ संकल्पमात्रविभवेन मनोरिणा त्वं
निर्जीयसे विविधवस्तुनिदर्शनेन ।
संतोषमात्रविभवेन मनो विजित्य
नित्योदितेन सुखमेहि निरीप्सितेन ।। ३.१११.४५

११७ परमपावनया हिमशीतया
समतया मतयात्मविदामपि ।
शमितया मितयान्तरहन्तया
यदवशिष्टमजं पदमस्तु तत् ।। ३.१११.४६

११८ नहि चञ्चलताहीनं मनः क्वचन विद्यते ।
चञ्चलत्वं मनोधर्मो वह्नेर्धर्मो यथोष्णता ।। ३.११२.५

११९ यैषा हि चञ्चला स्पन्दशक्तिश्चित्तत्त्वसंस्थिता ।
तां विद्धि मानसी शक्तिं जगदाडम्बरात्मिकाम् ।। ३.११२.६

१२० यत्तु चञ्चलताहीनं तन्मनोऽमृतमुच्यते ।
तदेव च तपः शास्त्रं सिद्धान्तो मोक्ष उच्यते ।। ३.११२.८

१२१ तस्य चञ्चलता यैषा त्वविद्या राम सोच्यते ।
वासनापरनाम्नीं तां विचारेण विनाशय ।। ३.११२.११

१२२ अविद्यया वासनया तयान्तश्चित्तसत्तया ।
विलीनया त्यागवशात्परं श्रेयोऽधिगम्यते ।। ३.११२.१२

१२३ यत्तत्सदसतोर्मध्यं यन्मध्यं चित्तजाड्ययोः ।
तन्मनः प्रोच्यते राम द्वयदोलायिताकृति ।। ३.११२.१३

१२४ जाड्यानुसंधानहतं जाड्यात्मकतयेद्धया ।
चेतो जडत्वमायाति दृढाभ्यासवशेन हि ।। ३.११२.१४

१२५ विबोधैकानुसंधानाच्चिदंशात्मतया मनः ।
चिदेकतामुपायाति दृढाभ्यासवशादिह ।। ३.११२.१५

१२६ पौरुषेण प्रयत्नेन तस्मिन्नेव पदे मनः ।
योज्यते तत्पदं प्राप्य भवत्यभ्यासतो हि यत् ।। ३.११२.१६

१२७ अतः पौरुषमाश्रित्य चित्तमाक्रम्य चेतसा ।
विशोकं पदमालम्ब्य निरातङ्कः स्थिरो भव ।। ३.११२.१७

१२८ मन एव समर्थं हि मनसो दृढनिग्रहे ।
अराजा किं समर्थः स्याद्राज्ञो राघव निग्रहे ।। ३.११२.१९

१२९ तृष्णाग्राहगृहीतानां संसारार्णवपातिनाम् ।
आवर्तैरूह्यमानानां दूरे स्वं मन एव नौः ।। ३.११२.२०

१३० मनसैव मनश्छित्त्वा पाशं परमबन्धनम् ।
भवादुत्तारयात्मानं नासावन्येन तार्यते ।। ३.११२.२१

१३१ ययोदेति मनोनाम्नी वासनावासितान्तरा ।
तां तां परिहरेत्प्राज्ञस्ततोऽविद्याक्षयो भवेत् ।।

१३२ भोगैकवासनां त्यक्त्वा त्यज त्वं भेदवासनाम् ।
भावाभावौ ततस्त्यक्त्वा निर्विकल्पः सुखी भव ।। ३.११२.२३

१३३ एष एव मनोनाशस्त्वविद्यानाश एव च ।
यद्यत्संविदितं किंचित्तत्रास्याः परिवर्जनम् ।। ३.११२.२४ / २५

१३४ अनास्थैव हि निर्वाणं दुःखमास्थापरिग्रहः ।
अनेनैव प्रयत्नेन ब्रह्म संपद्यते क्षणात् ।।

१३५ अविद्याऽविद्यमानैव नष्टप्रज्ञेषु विद्यते ।
नाम्नैवाङ्गीकृताकारा सम्यक्प्रज्ञस्य सा कुतः ।। ३.११३.२

१३६ इच्छामात्रमविद्येयं तन्नाशो मोक्ष उच्यते ।
स चासंकल्पशस्त्रेण सिद्धो भवति राघव ।। ३.११४.७

१३७ केवलं केवलाभासं सर्वसामान्यमक्षयम् ।
चेत्यानुपातरहितं चिन्मात्रमिह विद्यते ।। ३.११४.१६

१३८ नाहं ब्रह्मेति संकल्पात्सुदृढाद्बध्यते मनः ।
सर्वं ब्रह्मेति संकल्पात्सुदृढान्मुच्यते मनः ।। ३.११४.२३

१३९ मनो यदनुसंधत्ते तत्सर्वेन्द्रियवृत्तयः ।
क्षणात्संपादयन्त्येता राजाज्ञामिव मन्त्रिणः ।। ३.११४.४७

१४० अहो नु चित्रं यत्सत्यं ब्रह्म तद्विस्मृतं नृणाम् ।
यदसत्यमविद्याख्यं तत्पुरः परिवल्गति ।। ३.११४.६५

१४१ तिष्ठतस्तव कार्येषु मास्तु रागानुरञ्जना ।

स्फटिकस्येव चित्राणि प्रतिबिम्बानि गृह्णतः ।। ३.११४.७६

१४२ अर्थादर्थान्तरं चित्ते याति मध्ये तु या स्थितिः ।
निरस्तमननाकारा स्वरूपस्थितिरूच्यते ।। ३.११७.८

१४३ संशान्तसर्वसंकल्पा या शिलावदवस्थितिः ।
जाड्यनिद्राविनिर्मुक्ता सा स्वरूपस्थितिः स्मृता ।। ३.११७.९

१४४ अहन्तांशेक्षते शान्ते भेदे निष्पन्दचित्तता ।
अजडा या प्रकचति तत्स्वरूपमिति स्थितम् ।। ३.११७.१०

१४५ संबन्धे द्रष्टृदृश्यानां मध्ये द्रष्टुर्हि यद्वपुः ।
द्रष्टृदर्शनदृश्यादिवर्जितं तदिदं परम् ।। ३.१२१.५३

१४६ देशाद्देशं गते चित्ते मध्ये यच्चेतसो वपुः ।
अजाड्यसंविन्मननं तन्मयो भव सर्वदा ।। ३.१२१.५४

१४७ अजाग्रत्स्वप्ननिद्रस्य यत्ते रूपं सनातनम् ।
अचेतनं चाजडं च तन्मयो भव सर्वदा ।। ३.१२१.५५

१४८ जडतां वर्जयित्वैकां शिलाया हृदयं हि यत् ।
अमनस्कं महाबाहो तन्मयो भव सर्वदा ।। ३.१२१.५६

१४९ चित्तं दूरे परित्यज्य योऽसि सोऽसि स्थिरो भव ।
भव भावनया मुक्तो युक्त्या परमयान्वितः ।। ३.१२१.६८

१५० संसारोग्रारघट्टेऽस्मिन्या दृढा यन्त्रवाहिनी ।
रज्जुस्तां वासनामेतां छिन्धि राघव यत्नतः ।। ३.१२२.२८

१५१ पूर्वं मनः समुदितं परमात्मतत्त्वा-
त्तेनाततं जगदिदं स्वविकल्पजालैः ।
शून्येन शून्यमपि तेन यथाम्बरेण
नीलत्वमुल्लसति चारूतराभिधानम् ।। ३.१२२.४५

१५१.१ तत्रारोपितमज्ञानं तस्य भूमीरिमाः शृणु ।
बीजजाग्रत्तथा जाग्रन्महजाग्रत्तथैव च ।। ३.११७.११

१५१.२ जाग्रत्स्वप्नस्तथा स्वप्नः स्वप्नजाग्रत्सुषुप्तकम् ।
इति सप्तविधो मोहः पुनरेव परस्परम् ।। ३.११७.१२

१५१.३ श्लिष्टो भवत्यनेकाख्यः शृणु लक्षणमस्य च ।
प्रथमे चेतनं यत्स्यादनाख्यं निर्मलं चितः ।। ३.११७.१३

१५१.४ भविष्यच्चित्तजीवादिनामशब्दार्थभाजनम् ।
बीजरूपं स्थितं जाग्रद्बीजजाग्रत्तदुच्यते ।। ३.११७.१४

१५१.५ एषा ज्ञप्तेर्नवावस्था त्वं जाग्रत्संसृतिं शृणु ।
नवप्रसूतस्य परादयं चाहमिदं मम ।। ३.११७.१५

१५१.६ इति यः प्रत्ययः स्वस्थस्तज्जाग्रत्प्रागभावनात् ।
अयं सोऽहमिदं तन्म इति जन्मान्तरोदितः ।। ३.११७.१६

१५१.७ पीवरः प्रत्ययः प्रोक्तो महाजाग्रदिति स्फुरन् ।
अरूढमथ वा रूढं सर्वथा तन्मयात्मकम् ।। ३.११७.१७

१५१.८ यज्जाग्रतो मनोराज्यं जाग्रत्स्वप्नः स उच्यते ।
द्विचन्द्रशुक्तिकारूप्यमृगतृष्णादिभेदतः ।। ३.११७.१८

१५१.९ अभ्यासात्प्राप्य जाग्रत्त्वं स्वप्नोऽनेकविधो भवेत् ।
अल्पकालं मया दृष्टमेवं नो सत्यमित्यपि ।। ३.११७.१९

१५१.१० निद्राकालानुभूतेऽर्थे निद्रान्ते प्रत्ययो हि यः ।
स स्वप्नः कथितस्तस्य महाजाग्रत्स्थितेर्हृदि ।। ३.११७.२०

१५१.११ चिरसंदर्शनाभावादप्रफुल्लबृहद्वपुः ।
स्वप्नो जाग्रत्तया रूढो महाजाग्रत्पदं गतः ।। ३.११७.२१

१५१.१२ अक्षतेवाक्षते देहे स्वप्नजाग्रन्मतं हि तत् ।
षडवस्थापरित्यागे जडा जीवस्य या स्थितिः ।। ३.११७.२२

१५१.१३ भविष्यद्दुःखबोधाढ्या सौषुप्ती सोच्यते गतिः ।
एते तस्यामवस्थायां तृणलोष्टशिलादयः ।। ३.११७.२३

१५१.१४ पदार्थाः संस्थिताः सर्वे परमाणुप्रमाणिनः ।
सप्तावस्था इति प्रोक्ता मयाऽज्ञानस्य राघव ।। ३.११७.२४

१५१.१५ ज्ञानभूमिः शुभेच्छाख्या प्रथमा समुदाहृता ।
विचारणा द्वितीया तु तृतीया तनुमानसा ।। ३.११८.५

१५१.१६ सत्त्वापत्तिश्चतुर्थी स्यात्ततोऽसंसक्तिनामिका ।
पदार्थाभावनी षष्ठी सप्तमी तुर्यगा स्मृता ।। ३.११८.६

१५१.१७ आसामन्ते स्थिता मुक्तिस्तस्यां भूयो न शोच्यते ।
एतासां भूमिकानां त्वमिदं निर्वचनं शृणु ।। ३.११८.७

१५१.१८ स्थितः किं मूढ एवास्मि प्रेक्ष्येऽहं शास्त्रसज्जनैः ।

वैराग्यपूर्वमिच्छेति शुभेच्छेत्युच्यते बुधैः ।। ३.११८.८

१५१.१९ शास्त्रसज्जनसंपर्कवैराग्याभ्यासपूर्वकम् ।
सदाचारप्रवृत्तिर्या प्रोच्यते सा विचारणा ।। ३.११८.९

१५१.२० विचारणाशुभेच्छाभ्यामिन्द्रियार्थेष्वसक्तता ।
यात्र सा तनुता भावात्प्रोच्यते तनुमानसा ।। ३.११८.१०

१५१.२१ भूमिकात्रितयाभ्यासाच्चित्तेऽर्थे विरतेर्वशात् ।
सत्यात्मनि स्थितिः शुद्धे सत्त्वापत्तिरुदाहृता ।। ३.११८.११

१५१.२२ दशाचतुष्टयाभ्यासादसंसङ्गफलेन च ।
रूढसत्त्वचमत्कारात्प्रोक्ताऽसंसक्तिनामिका ।। ३.११८.१२

१५१.२३ भूमिकापञ्चकाभ्यासात्स्वात्मारामतया दृढम् ।
आभ्यन्तराणां बाह्यानां पदार्थानामभावनात् ।। ३.११८.१३

१५१.२४ परप्रयुक्तेन चिरं प्रयत्नेनार्थभावनात् ।
पदार्थाभावनानाम्नी षष्ठी संजायते गतिः ।। ३.११८.१४

१५१.२५ भूमिषट्कचिराभ्यासाद्भेदस्यानुपलम्भतः ।
यत्स्वभावैकनिष्ठत्वं सा ज्ञेया तुर्यगा गतिः ।। ३.११८.१५

१५१.२६ एषा हि जीवन्मुक्तेषु तुर्यावस्थेह विद्यते ।
विदेहमुक्तिविषयस्तुर्यातीतमतः परम् ।। ३.११८.१६

१५२ संकल्पसंक्षयवशाद्गलिते तु चित्ते
संसारमोहमिहिका गलिता भवन्ति ।
स्वच्छं विभाति शरदीव खमागतायां
चिन्मात्रमेकमजमाद्यमनन्तमन्तः ।। ३.१२२.५६

१५३ अकर्तृकमरङ्गं च गगने चित्रमुत्थितम् ।
अद्रष्टृकं स्वानुभवमनिद्रं स्वप्नदर्शनम् ।। ४.१.३

१५४ साक्षिभूते समे स्वच्छे निर्विकल्पे चिदात्मनि ।
निरर्थं प्रतिबिम्बन्ति जगन्ति मुकुरे यथा ।। ३.१२२.४९

१५५ एतत्ते राम वक्ष्यामि कार्यकारणतां विना ।
स्थिता ब्रह्मणि विश्वश्रीः प्रतिभामात्ररूपिणी ।।

१५६ एकं ब्रह्मचिदाकाशं सर्वात्मकमखण्डितम् ।
इति भावय यत्नेन चेतश्चाञ्चल्यशान्तये ।।

१५७ रेखोपरेखावलिता यथैका पीवरी शिला ।
तथा त्रैलोक्यवलितं ब्रह्मैकमिति दृश्यताम् ।।

१५८ द्वितीयकारणाभावादनुत्पन्नमिदं जगत् ।
तिष्ठति ब्रह्मणि स्फारे प्रतिभामात्ररूपधृक् ।।

१५९ जन्तोः कृतविचारस्य विगलद्वृत्तिचेतसः ।
मननं त्यजतो नित्यं किंचित्परिणतात्मनः।। ४.२२.१

१६० दृश्यं संत्यजतो हेयमुपादेयमुपेयुषः ।
द्रष्टारं पश्यतो नित्यमद्रष्टारमपश्यतः ।। ४.२२.२

१६१ निज्ञातव्ये परे तत्त्वे जागरूकस्य जीवतः ।
सुप्तस्य घनसंमोहमये संसारवर्त्मनि ।। ४.२२.३

१६२ अत्यन्तपक्ववैराग्यादरसेषु रसेष्वपि ।
संसारवासनाजाले खगजाल इवाखुना ।
त्रोटिते हृदयग्रन्थौ श्लथे वैराग्यरंहसा ।। ४.२२.७

१६३ कातकं फलमासाद्य यथा वारि प्रसीदति ।
तथा विज्ञानवशतः स्वभावः संप्रसीदति ।। ४.२२.८

१६४ नीरागं निरुपासङ्गं निर्द्वन्द्वं निरुपाश्रयम् ।
विनिर्याति मनो मोहाद्विहगः पञ्जरादिव ।। ४.२२.९

१६५ शान्तसंदेहदौरात्म्यं गतकौतुकविभ्रमम् ।
परिपूर्णान्तरं चेतः पूर्णेन्दुरिव राजते ।। ४.२२.१०

१६६ कोऽहं कथमिदं चेति यावन्नान्तर्विचारितम् ।
संसाराडम्बरं तावदन्धकारोपमं स्थितम् ।। ४.२२.२२

१६७ आत्मानमितरं चैव दृशा नित्याविभिन्नया ।
सर्वं चिज्जयोतिरेवेति यः पश्यति स पश्यति ।। ४.२२.२७

१६८ सर्वशक्तिरनन्तात्मा सर्वभावान्तरस्थितः ।
अद्वितीयश्चिदित्यन्तर्यः पश्यति स पश्यति ।। ४.२२.२८

१६९ नाहं न चान्यदस्तीति ब्रह्मैवास्ति निरामयम् ।
इत्थं सदसतोर्मध्यं यः पश्यति स पश्यति ।। ४.२२.३२

१७० अयत्नोपनतेष्वक्षि दिग्द्रव्येषु यथा पुनः ।
अरागमेव पतति तद्वत्कार्येषु धीरधीः ।। ४.२३.४४

१७१ परिज्ञायोपभुक्तो हि भोगो भवति तुष्टये ।
विज्ञाय सेवितश्चौरो मैत्रीमेति न चौरताम् ।। ४.२३.४१

१७२ हस्तं हस्तेन संपीड्य दन्तैर्दन्तान्विचूर्ण्य च ।
अङ्गान्यङ्गैः समाक्रम्य जयेदादौ स्वकं मनः ।
मनसो विजयान्नान्या गतिरस्ति भवार्णवे ।।

१७३ तावन्निशीथवेताला वल्गन्ति हृदि वासनाः ।
एकतत्त्वदृढाभ्यासाद्यावन्न विजितं मनः ।। ४.२४.९

१७४ इदं मे स्यादिदं मे स्यादिति बुद्धिर्महामते ।
स्वेन दौर्भाग्यदैन्येन न सत्यमुपतिष्ठति ।। ४.३२.३६

१७५ वेत्ति नित्यमुदारात्मा त्रैलोक्यमपि यस्तृणम् ।
तं त्यजन्त्यापदः सर्वा मृगा इव जरत्तृणम् ।। ४.३२.३७

१७६ परिस्फुरति यस्यान्तर्नित्यं सत्यचमत्कृतिः ।
ब्राह्ममण्डमिवाखण्डं लोकेशाः पालयन्ति तम् ।। ४.३२.३८

१७७ यथाशास्त्रं विहरता त्वरा कार्या न सिद्धिषु ।
चिरकालं परा पक्वा सिद्धिः पुष्टफला भवेत् ।। ४.३२.४९/५०

१७८ न तपांसि न तीर्थानि न शास्त्राणि जपन्ति हि ।
संसारसागरोत्तारे सज्जनासेवनं विना ।। ४.३३.१४

१७९ अस्य संसारदुःखस्य सर्वोपद्रवकारिणः ।
उपाय एक एवास्ति मनसः स्वस्य निग्रहः ।। ४.३५.२

१८० श्रूयतां ज्ञानसर्वस्वं श्रुत्वा चैवावधार्यताम् ।
भोगेच्छामात्रको बन्धस्तत्त्यागो मोक्ष उच्यते ।। ४.३५.३

१८१ किमन्यैः शास्त्रसन्दर्भैः क्रियतामेतदेव तु ।
यद्यत्स्वादिह तत्सर्वं दृश्यतां विषवह्निवत् ।। ४.३५.४

१८२ विषया विषमाभोगाः प्रविचार्य पुनः पुनः ।
मनसा संपरित्यज्य सेव्यमानाः सुखावहाः ।। ४.३५.५

१८३ मनसोऽभ्युदयो नाशो मनोनाशो महोदयः ।
ज्ञमनो नाशमभ्येति मनोऽज्ञस्य हि शृङ्खला ।। ४.३५.१८

१८४ नानन्दं न निरानन्दं न चलं नाचलं स्थिरम् ।
न सन्नासन्न चैतेषां मध्यं ज्ञानिमनो विदुः ।।

१८५ नास्तमेति न चोदेति नोत्तिष्ठति न तिष्ठति ।
न च याति न चायाति न चेह न च नेह चित् ।। ४.३६.१४

१८६ सैषा चिदमलाकारा स्वयमात्मनि संस्थिता ।
राघवेयं प्रपञ्चेन जगन्नाम्ना विजृम्भते ।। ४.३६.१५

१८७ येन शब्दं रसं रूपं गन्धं जानासि राघव ।
सोऽयमात्मा परंब्रह्म सर्वमापूर्य संस्थितः ।। ४.३७.७

१८८ यथाभूतार्थवाक्यार्थाः सर्वा एव ममोक्तयः ।
नासमर्था विरूपार्थाः पूर्वापरविरोधतः ।। ४.४१.४

१८९ ज्ञानदृष्टौ प्रसन्नायं प्रबोधे विततोदये ।
यथावज्ज्ञास्यसि स्वस्थो मद्वाग्दृष्टिबलाबलम् ।। ४.४१.५

१९० शाम्यति ह्यस्त्रमस्त्रेण मलेन क्षाल्यते मलः ।
शमं विषं विषेणैति रिपुणा हन्यते रिपुः ।। ४.४१.१४

१९१ ईदृशी भूतमायेयं या स्वनाशेन हर्षदा ।
न लक्ष्यते स्वभावोऽस्याः प्रेक्ष्यमाणैव नश्यति ।। ४.४१.१५

१९२ नास्त्येषा परमार्थेनेत्येवं भावनयेद्धया ।
ज्ञो भूत्वा ज्ञेयसंप्राप्त्या ज्ञास्यस्यस्यास्त्वमाशयम् ।। ४.४१.२०

१९३ यावत्तु न प्रबुद्धत्वं तावन्मद्वचसैव ते ।
निश्चयो भवतूद्दामो नास्त्यविद्येति निश्चलः ।। ४.४१.२१

१९४ सर्वं ब्रह्मेति यस्यान्तर्भावना स हि मुक्तिभाक् ।
भेददृष्टिरविद्येयं सर्वथा तां विवर्जयेत् ।।

१९५ अविद्यासरितः पारमात्मलाभादृते किल ।
राम नासाद्यते तद्धि पदमक्षयमुच्यते ।।

१९६ कुतो जातेयमिति ते राम मास्तु विचारणा ।
इमां कथमहं हन्मीत्येषा तेऽस्तु विचारणा ।। ४.४१.३२

१९७ अस्तं गतायां क्षीणायामस्यां ज्ञास्यसि राघव ।
यत एषा यथा चैषा यथा नष्टेत्यखण्डितम् ।। ४.४१.३३

१९८ तदस्या रोगशालाया यत्नं कुरु चिकित्सने ।
यथैषा जन्मदुःखेषु न भूयस्त्वां नियोक्ष्यति ।। ४.४१.३७

१९९ आत्मन्येवात्मना व्योम्नि यथा सरति मारुतः ।

तथात्मा स्वात्मशक्त्यैव स्वात्मन्येवैति लोलताम् ।। ४.४२.६

२०० स्वात्मनि स्वपरिस्पन्दैः स्फुरत्यच्छश्चिदर्णवः ।
एकात्मकमखण्डं तदित्यन्तर्भाव्यतां दृढम् ।। ४.४२.९

२०१ किंचित्क्षुभितरूपा सा चिच्छक्तिश्चिन्महार्णवे ।
तन्मय्येव स्फुरत्यच्छा तत्रैवोर्मिरिवार्णवे ।। ४.४२.११

२०२ क्षणं स्फुरन्ती सा देवी सर्वशक्तितया तथा ।
देशकालक्रियाशक्तीर्वयस्याः संप्रकर्षति ।। ४.४२.१३/१४

२०३ स्वस्वभावं विदित्वोच्चैरप्यनन्तपदे स्थिता ।
रूपं परिमितेनासौ भावयत्यविभाविता ।। ४.४२.१५

२०४ यदैवं भावितं रूपं तया परमकान्तया ।
तदैवैनामनुगता नामसंख्यादिका दृशः ।। ४.४२.१६

२०५ विकल्पकल्पिताकारं देशकालक्रियास्पदम् ।
चितो रूपं महाबाहो क्षेत्रज्ञ इति कथ्यते ।। ४.४२.२१

२०६ वासनाः कलयन्सोऽपि यात्यहंकारतां पुनः ।
अहंकारो विनिर्णेता कलङ्की बुद्धिरुच्यते ।। ४.४२.२३

२०७ बुद्धिः संकल्पकलिता प्रयाति मननास्पदम् ।
मनो घनविकल्पं तु गच्छतीन्द्रियतां शनैः ।
पाणिपादादिमद्देहमिन्द्रियाणि विदुर्बुधाः ।। ४.४२.२४/२५

२०८ एवं जीवो हि संकल्पवासनारज्जुवेष्टितः ।
दुःखजालपरीतात्मा क्रमादायाति नीचताम् ।। ४.४२.२६

२०९ इति शक्तिमयं चेतो घनाहंकारतां गतम् ।
कोशकारकृमिरिव स्वेच्छया याति बन्धनम् ।। ४.४२.३१

२१० न जायते न म्रियते इति किंचित्कदाचन ।
परमार्थेन सुमते मिथ्या सर्वं तु विद्यते ।। ४.४५.१४

२११ कोशमाशाभुजङ्गानां संसाराडम्बरं त्यज ।
असदेतदिति ज्ञात्वा माऽत्र भावं निवेशय ।।

२१२ समस्तं खल्विदं ब्रह्म सर्वमात्मेदमाततम् ।
अहमन्य इदं चान्यदिति भ्रान्तिं त्यजानघ ।। ५.५.३९

२१३ तते ब्रह्मघने नित्ये संभवन्ति न कल्पनाः ।

विच्छित्तयः पयोराशौ यथा राम न सन्मयाः ।। ५.५.४०

२१४ न शोकोऽस्ति न मोहोऽस्ति न जन्मास्ति न जन्मवान् ।
यदस्तीह तदेवास्ति विज्वरो भव राघव।। ५.५.४३

२१५ निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ।
अद्वितीयो विशोकात्मा विज्वरो भव राघव ।। ५.५.४४

२१६ समः स्वस्थः स्थिरमतिः शान्तः शान्तमना मुनिः ।
मौनी वरमणिस्वच्छो विज्वरो भव राघव ।। ५.५.४५

२१७ यथाप्राप्तानुभवनात्सर्वत्रानभिवाञ्छनात् ।
त्यागादानपरित्यागाद्विज्वरो भव राघव ।। ५.५.५१

२१८ अस्मिन्संसारसंरम्भे जातानां देहधारिणाम् ।
अपवर्गक्षमौ राम द्वाविमावुत्तमौ क्रमौ ।। ५.७.२

२१९ एकस्तावद्गुरुप्रोक्तादनुष्ठानाच्छनैःशनैः ।
जन्मना जन्मभिर्वापि सिद्धिदः समुदाहृतः ।। ५.७.३

२२० द्वितीयः स्वात्मनैवाशु किंचिद्व्युपन्नचेतसः ।
भवति ज्ञानसंप्राप्तिराकाशफलपातवत् ।। ५.७.४

२२१ द्रष्टृदृश्यसमायोगात्प्रत्ययानन्दनिश्चयः ।
यस्तं स्वमात्मतत्त्वोत्थं निःस्पन्दं समुपास्महे ।। ५.८.९

२२२ द्रष्टृदर्शनदृश्यानि त्यक्त्वा वासनया सह ।
दर्शनप्रथमाभासमात्मानं समुपास्महे ।। ५.८.१०

२२३ द्वयोर्मध्यगतं नित्यमस्तिनास्तीति पक्षयोः ।
प्रकाशनं प्रकाशानामात्मानं समुपास्महे ।। ५.८.११

२२४ सशिरस्कं हकारादिमशेषाकारसंस्थितम् ।
अजस्रमुच्चरन्तं स्वमात्मानं समुपास्महे ।। ५.८.१३

२२५ उपशमसुखमाहरेत्पवित्रं
शमवशतः शममेति साधु चेतः ।
प्रशमितमनसः स्वके स्वरूपे
भवति सुखे स्थितिरुत्तमा चिराय ।। ५.८.१८

२२६ प्रबुद्धोऽस्मि प्रबुद्धोऽस्मि दुष्टश्चौरो मयात्मनः ।
मनोनामेह हन्म्येनं मनसास्मि चिरं हतः ।। ५.९.६०

२२७ किमुपादेयमस्तीह यत्नात्संसाधयामि किम् ।
यतःस्थिरस्य शुद्धस्य चितः का मेऽस्ति कल्पना ।। ५.१०.२१

२२८ नाभिवाञ्छाम्यसंप्राप्तं संप्राप्तं न त्यजाम्यहम् ।
स्वच्छ आत्मनि तिष्ठामि यन्ममास्तु तदस्तु मे ।। ५.१०.२४

२२९ भविष्यं नानुसंधत्ते नातीतं चिन्तयत्यसौ ।
वर्तमाननिमेषं तु हसन्नेवानुवर्तते ।। ५.१२.१४

२३० नित्यमन्तर्विचारस्य पश्यतश्चञ्चलं जगत् ।
जनकस्येव कालेन स्वयमात्मा प्रसीदति ।। ५.१३.७

२३१ अयमेवाहमित्यस्मिन्संकोचे विलयं गते ।
समस्तभुवनव्यापी विस्तार उपजायते ।। ५.१३.१५

२३२ उपादेयानुपतनं हेयैकान्तविवर्जनम् ।
यदेतन्मनसो राम तं बन्धं विद्धि नेतरत् ।। ५.१३.२०

२३३ मा खेदं भज हेयेषु नोपादेयपरो भव ।
हेयादेयदृशौ त्यक्त्वा शेषस्थः सुस्थिरो भव ।। ५.१३.२१

२३४ निराशता निर्भयता नित्यता समता ज्ञता ।
निरीहता निष्क्रियता सौम्यता निर्विकल्पता ।। ५.१३.२८

२३५ धृतिर्मैत्री मनस्तुष्टिर्मृदुता मृदुभाषिता ।
हेयोपादेयनिर्मुक्ते ज्ञे तिष्ठन्त्यपवासनम् ।। ५.१३.२९

२३६ तिष्ठन्गच्छन्स्वपञ्जाग्रन्निश्वसन्नुत्पतन्पतन् ।
असदेवेदमित्यन्तर्निश्चित्यास्थां परित्यज ।। ५.१३.३८

२३७ मनः प्रकृत्यैव जडं चित्तत्वमनुधावति ।
मांसगर्धेन मार्जारो वने मृगपतिं यथा ।। ५.१३.४७

२३८ सिंहवीर्यवशाल्लब्धं मांसं भुङ्क्तेऽनुगो हरेः ।
संविद्वीर्यवशात्प्राप्तं दृश्यमाश्रयते मनः ।। ५.१३.४८

२३९ दृश्यमाश्रयसीदं चेत्तत्सचित्तोऽसि बन्धवान् ।
दृश्यं संत्यजसीदं चेत्तदचित्तोऽसि मोक्षवान् ।। ५.१४.४६

२४० नाहं ज्ञेयमिति ध्यायंस्तिष्ठ त्वमचलः सदा ।
अनन्ताकाशसंकाशहृदयो हृदयेश्वरे ।। ५.१४.४८

२४१ आत्मनो जगतश्चान्तर्द्रष्टृदृश्यदशान्तरे ।

दर्शनाख्ये स्वमात्मानं सर्वदा भावयन्भव ।। ५.१४.५०

२४२ अहमेषां पदार्थानामेते च मम जीवितम् ।
नाहमेभिर्विना कश्चिन्न मयैते विना किल ।। ५.१६.७

२४३ इत्यन्तर्निश्चयं त्यक्त्वा विचार्य मनसा सह ।
नाहं पदार्थस्य न मे पदार्थ इति भाविते ।। ५.१६.८

२४४ अन्तःशीतलया बुद्ध्या कुर्वतो लीलया क्रियाः ।
यो नूनं वासनात्यागो ध्येयो राम स कीर्तितः ।। ५.१६.९

२४५ सर्वं समस्तया बुद्ध्या यं कृत्वा वासनाक्षयम् ।
जहाति निर्ममो देहं ज्ञेयोऽसौ वासनाक्षयः ।। ५.१६.१०

२४६ अहंकारसखीं त्यक्त्वा वासनां लीलयैव यः ।
तिष्ठति ध्येयसंत्यागी स जीवन्मुक्त उच्यते ।। ५.१६.११

२४६.१ निर्मूलकलनां त्यक्त्वा वासनां यः समं गतः ।
ज्ञेयत्यागमयं विद्धि मुक्तं तं रघुनन्दन ।। ५.१६.१२

२४६.२ द्वावेतौ राघव त्यागौ समौ मुक्तपदे स्थितौ ।
द्वावेतौ ब्रह्मतां यातौ द्वावेतौ विगतज्वरौ ।। ५.१६.१५

२४६.३ बन्धास्थामथ मोक्षास्थां सुखदुःखदशामपि ।
त्यक्त्वा सदसदास्थां च तिष्ठाक्षुब्धमहाब्धिवत् ।। ५.१७.९

२४६.४ आपादमस्तकमहं मातृपितृविनिर्मितः ।
इत्येको निश्चयो राम बन्धायासद्विलोकनात् ।। ५.१७.१४

२४६.५ अतीतः सर्वभावेभ्यो वालाग्रादप्यहं तनुः ।
इति द्वितीयो मोक्षाय निश्चयो जायते सताम् ।। ५.१७.१५

२४६.६ जगज्जालपदार्थात्मा सर्वमेवाहमक्षयः ।
तृतीयो निश्चयोऽप्येवं मोक्षायैव रघूत्तम ।। ५.१७.१६

२४६.७ जगच्चासदिदं शून्यं शून्यव्योमसमं सदा ।
एवमेव चतुर्थोऽपि निश्चयो मोक्षसिद्धये ।। ५.१७.१७

२४६.८ एतेषां प्रथमः प्रोक्तस्तृष्णाया बन्धयोग्यया ।
शुद्धतृष्णास्त्रयः स्वच्छा जीवन्मुक्तविलासिनः ।। ५.१७.१९

२४६.९ सर्वमात्माहमेवेति निश्चयो यो महामते ।
तमादाय विषादाय न भूयो याति ते मतिः ।। ५.१७.२०

२४६.१० शून्यं प्रकृतिर्मायेति ब्रह्मविज्ञानमित्यपि ।
शिवः पुरुष ईशानो नित्यमात्मेति कथ्यते ।। ५.१७.२२

२४६.११ दैताद्वैतसमुद्भेदैर्जगन्निर्माणलीलया ।
परमात्ममयी शक्तिरद्वैतैव विजृम्भते ।। ५.१७.२७

२४६.१२ अयं बन्धुः परश्चायमयं चाहमयं भवान् ।
इति मिथ्यादृशो राम विगलन्तु तवाधुना ।। ५.१८.५७

२४७ अयं बन्धुरयं नेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ।। ५.१८.६१

२४८ विविधजन्मशताहितसंभ्रमे जगति बन्धुरबन्धुरितीक्षणम् ।
भ्रमदशैव विभाति न वस्तुतस्त्रिभुवनं चिरबन्धुरबन्ध्वपि ।।५.१८.६५

२४९ चिदिहास्ति हि चिन्मात्रमिदं चिन्मयमेव च ।
चित्त्वं चिदहमेते च लोकश्चिदिति संग्रहः ।। ५.२६.११

२५० चिदहं चिदिमे लोकाश्चिदाशाश्चिदियं क्रिया ।। ५.२७.२

२५१ दृश्यदर्शननिर्मुक्तः केवलामलरूपवान् ।
नित्योदितो निराभासो द्रष्टास्मि परमेश्वरः ।। ५.२७.२०

२५२ चेत्यनिर्मुक्तचिद्रूपं विष्वग्विश्वावपूरकम् ।
संशान्तसर्वसंवेद्यं संविन्मात्रमहं महत् ।। ५.२७.२४/२५

२५३ कृशोऽतिदुःखी मूढोऽहमेताश्चान्याश्च भावनाः ।
मतिं यस्यावलुम्पन्ति मरणं तस्य राजते ।। ५.३९.३८

२५४ आशापाशनिबद्धोऽन्तरितश्चेतश्च नीयते ।
यो विलोलमनोवृत्त्या मरणं तस्य राजते ।। ५.३९.३९

२५५ यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
यः समः सर्वभूतेषु जीवितं तस्य शोभते ।। ५.३९.४७

२५६ योऽन्तःशीतलया बुद्ध्या रागद्वेषविमुक्तया ।
साक्षिवत्पश्यतीदं हि जीवितं तस्य शोभते ५.३९.४८

२५७ येन सम्यक्परिज्ञाय हेयोपादेयमुक्तताः ।
चित्तस्यान्तेऽर्पितं चित्तं जीवितं तस्य शोभते ।। ५.३९.४९

२५८ ग्राह्यग्राहकसंबन्धे क्षीणशान्तिरुदेत्यलम् ।
स्थितिमभ्यागता शान्तिर्मोक्षनाम्नाभिधीयते ।। ५.४०.१९

२५९ अयं सोऽहमिदं तन्म इति मज्जत्यनात्मवान् ।
सर्वमेवाहमेवेति तत्त्वज्ञो नावसीदति ।। ५.४९.३४

२६० विप्रापर्यव सानेयं माया संसृतिनामिका ।
आत्मचिन्तनयैवेयं क्षयमायाति नान्यथा ।।

२६१ न गृह्णाति पदार्थेषु विभागानर्थभावनाम् ।
तेनासौ भ्रममोहेषु तत्त्वज्ञो नावसीदति ।। ५.४९.३५/३६

२६२ ज्ञानस्यापरिपूर्णत्वान्न शक्नोषि मनोभ्रमम् ।
विनिवारयितुं तेन तेनैवाक्रम्यसे क्षणात् ।। ५.४९.३८

२६३ चित्तं नाभिः किलास्येह मायाचक्रस्य सर्वतः ।
स्थीयते चेत्तदाक्रम्य तन्न किंचित्प्रबाधते ।। ५.४९.४०

२६४ एवमेषातिवितता दुर्ज्ञाना रघुनन्दन ।
महामोहकरी माया विषमा पारमात्मिकी ।। ५.५०.१

२६५ अतो वच्मि महाबाहो मायेयं विषमान्वहम् ।
असावधानमनसं संयोजयति संकटे ।। ५.५०.४

२६६ चित्ताक्रमणमात्रात्तु परमादौषधादृते ।
प्रयत्नेनापि संसारमहारोगो न शाम्यति ।। ५.५०.१२

२६७ वर्तमानं क्रमायातं भजद्वाह्यधिया क्षणम् ।
भूतं भविष्यदभजद्याति चित्तमचित्तताम् ।। ५.५०.१६

२६८ संकल्पाशानुसंधानवर्जनं चेत्प्रतिक्षणम् ।
करोषि तदचित्तत्वं प्राप्त एवासि पावनम् ।। ५.५०.१७

२६९ चेतनं चित्तरिक्तं हि प्रत्यक्चेतनमुच्यते ।
निर्मनस्कस्वभावं तु न तत्र कलनामलः ।। ५.५०.२१

२७० सा सत्यता सा शिवता सावस्था पारमात्मिकी ।
सर्वज्ञता सा सा तृप्तिर्ननु यत्र मनः क्षतम् ।। ५.५०.२२

२७१ अविवेकादुपाहृत्य चेतः सोद्यमनिश्चयैः ।
बलात्कारेण संयोज्यं शास्त्रसत्पुरुषक्रमैः ।। ५.५०.२६

२७२ प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि ।
निरस्तमननोऽनन्ते संविन्मात्रपरो भव ।। ५.५०.२९

२७३ ममेदं तदयं सोऽहमिति संत्यज्य वासनाः ।

एकनिष्ठतयान्तस्थसंविन्मात्रपरो भव ।। ५.५०.३१
२७४ मलं संवेद्यमुत्सृज्य मनो निर्मलयन्परम् ।
अशापाशानलं छित्त्वा स्वसंवित्तिमयो भव ।। ५.५०.३४
२७५ अशुभाशुभसंकेतः संशान्ताशाविषूचिकः ।
नष्टेष्टानिष्टदृष्टिस्त्वं संवित्सारोपरो भव ।। ५.५०.३५
२७६ आत्मतापरते त्यक्त्वा निर्विभावो जगत्स्थितौ ।
यज्ञस्तम्भवदात्मानमवलम्ब्य स्थिरो भव ।। ५.५०.३९
२७७ तदा संक्षीयते मोहः संसारभ्रमकारणम् ।
निर्मलायां निराशायां स्वसंवित्तौ यदा स्थितिः ।। ५.५०.४३
२७८ शास्त्रार्थगुरुचेतोभिस्तावत्तावद्विचार्यते ।
सर्वदृश्यक्षयाभ्यासाद्यावदासाद्यते पदम् ।। ५.५६.२
२७९ वैराग्याभ्यासशास्त्रार्थप्रज्ञागुरुयमक्रमैः ।
पदमासाद्यते पुण्यं प्रज्ञयैवैकयाथवा ।। ५.५६.३
२८० संप्रबोधवती तीक्ष्णा कलङ्करहिता मतिः ।
सर्वसामग्रहीनापि प्राप्यं प्राप्नोति शाश्वतम् ।। ५.५६.४
२८१ भगवन्भूतभव्यज्ञ कश्चिज्जातसमाधिकः ।
प्रबुद्ध इव विश्रान्तो व्यवहारपरोऽपि सन् ।। ५.५६.५
२८२ कश्चिदेकान्तमाश्रित्य समाधिनियमस्थितः ।
तयोस्तु कतरः श्रेयानिति मे भगवन्वद ।। ५.५६.६
२८३ इमं गुणसमाहारमनात्मत्वेन पश्यतः ।
अन्तःशीतलता यासौ समाधिरिति कथ्यते ।। ५.५६.७
२८४ दृश्यैर्मम न संबन्ध इति निश्चित्य शीतलः ।
व्यवहारे स्थितः कश्चित्कश्चिद्ध्यानव्यवस्थितः ।। ५.५६.८
२८५ द्वावेतौ राम सुखिनावन्तश्चेत्परिशीतलौ ।
अन्तःशीतलता या स्यात्तदनन्ततपःफलम् ।। ५.५६.९
२८६ व्यवहारी प्रबुद्धो यः प्रबुद्धो यो वने स्थितः ।
द्वावेतौ सुसमौ नूनमसन्देहपदं गतौ ।। ५.५६.१२
२८७ अकर्तृ कुर्वदप्येतच्चेतः प्रतनुवासनम् ।
दूरंगतमना जन्तुः कथासंश्रवणे यथा ।। ५.५६.१३

२८८ अकुर्वदपि कर्त्रेव चेतः प्रघनवासनम् ।
निष्पन्दाङ्गमपि स्वप्ने श्वभ्रपातस्थिताविव ।। ५.५६.१४
२८९ अन्तःशीतलतायां तु लब्धायां शीतलं जगत् ।
अन्तस्तृष्णोपतप्तानां दावदाहमयं जगत् ।। ५.५६.३३
२९० भवत्यखिलजन्तूनां यदन्तस्तद्बहिःस्थितम् ।
द्यौः क्षमा वायुराकाशं पर्वताः सरितो दिशः ।
अन्तःकरणतत्त्वस्य भागा बहिरिव स्थिताः ।। ५.५६.३४ / ३५
२९१ यावद्यावत्परालोकः परमात्मैव शिष्यते ।
तावत्तावन्महाबाहो स्वयं संत्यज्यतेऽखिलम् ।। ५.५८.४१
२९२ यावत्सर्वं न संत्यक्तं तावदात्मा न लभ्यते ।
सर्ववस्तुपरित्यागे शेष आत्मेति कथ्यते ।। ५.५८.४४
२९३ आत्मावलोकनार्थं तु तस्मात्सर्वं परित्यजेत् ।
सर्वं ह्येतत्परित्यज्य यावच्छिष्टं परं पदम् ।। ५.५८.४७
२९४ योऽज्ञो महात्मन्सततं तूष्णीं व्यवहरंश्च वा ।
असमाहितचित्तोऽसौ कदा भवति मे वद ।। ५.६२.५
२९५ तत्त्वावबोधो भगवन्सर्वाशातृणपावकः ।
प्रोक्तः समाधिशब्देन न च तूष्णीमवस्थितिः ।। ५.६२.८
२९६ समाहिता नित्यतृप्ता यथाभूतार्थदर्शिनी ।
साधो समाधिशब्देन परा प्रज्ञोच्यते बुधैः ।। ५.६२.९
२९७ अक्षुब्धा निरहंकारा द्वन्द्वेष्वननुपातिनी ।
प्रोक्ता समाधिशब्देन मेरोः स्थिरतरा स्थितिः ।। ५.६२.१०
२९८ निश्चिन्ता विगताभीष्टा हेयोपादेयवर्जिता ।
प्रोक्ता समाधिशब्देन परिपूर्णा मनोगतिः ।। ५.६२.११
२९९ न विस्मरत्यविरतं यथा कालः कलागतिम् ।
न विस्मरत्यविरतं स्वात्मानं प्राज्ञधीस्तथा ।। ५.६२.१६
३०० न विस्मरति सर्वत्र यथा सततगो गतिम् ।
न विस्मरति निश्चित्य चिन्मात्रं प्राज्ञधीस्तथा ।। ५.६२.१७
३०१ यस्मिन्देशे गिरौ तज्ज्ञो नास्ति सज्जनपादपः ।
सफलः शीतलच्छायो न तत्र निवसेद्बुधः ।। ५.६४.३२

३०२ न धनानि न मित्राणि न शास्त्राणि न बान्धवाः ।
नराणामुपकुर्वन्ति मग्नस्वात्मसमुद्धृतौ ।। ५.६४.३७
३०३ मनोमात्रेण सुहृदा सदैव सहवासिना ।
सह किंचित्परामृश्य भवत्यात्मा समुद्धृतः ।। ५.६४.३८
३०४ एतावतैव देवेशः परमात्मावगम्यते ।
काष्टलोष्टसमत्वेन देहो यदवलोक्यते ।। ५.६४.४४
३०५ मनोहंकारविलये सर्वभावान्तरस्थिता ।
समुदेति परानन्दा या तनुः पारमेश्वरी ।।
३०६ मनसैव मनश्छित्त्वा यद्यात्मा नावलोक्यते ।
तन्न नश्येज्जगद्दुःखं मनश्छेदे सुखात्मधीः ।। ५.६५.१
३०७ कीदृशो भगवन्सङ्गः कश्च बन्धाय वा नृणाम् ।
कश्च मोक्षाय कथितः कथं चैष चिकित्स्यते ।। ५.६८.१
३०८ देहदेहिविभागैकपरित्यागेन भावनात् ।
देहमात्रे तु विश्वासः सङ्गो बन्धार्ह उच्यते ।। ५.६८.२
३०९ अनन्तस्यात्मतत्त्वस्य सर्पयन्तत्वनिश्चये ।
यः सुखार्थित्वमन्तः स सङ्गो बन्धार्ह उच्यते ।। ५.६८.३
३१० सर्वमात्मेदमखिलं किं गृह्णामि त्यजामि किम् ।
इत्यसङ्गस्थितिं विद्धि जीवन्मुक्तत्वमुत्थिम् ।। ५.६८.४
३११ नाहमस्ति न चान्योऽस्ति मा भवन्तु भवन्तु वा ।
सुखान्यसक्त इत्यन्तः कथ्यते मुक्तिभाङ्नरः ।। ५.६८.५
३१२ नाभिनन्दति नैष्कर्म्यं न कर्मस्वनुरुध्यते ।
सुसमो यः फलत्यागी सोऽसंसक्त इति स्मृतः ।।
३१३ संसक्तिर्द्विविधा प्रोक्ता वन्ध्या वन्द्या च राघव ।
वन्ध्या सर्वत्र मूढानां वन्द्या तत्त्वविदां निजा ।। ५.६८.२१
३१४ आत्मतत्त्वावबोधेन हीना देहादिवस्तुजा ।
भूयः संसारदा सक्तिर्दृढा वन्ध्येति कथ्यते ।। ५.६८.२२
३१५ आत्मतत्त्वावबोधेन सत्यभूता विवेकजा ।
वन्द्या हि कथ्यते सक्तिर्भूयः संसारवर्जिता ।। ५.६८.२३
३१६ केवलं चिति विश्रम्य किंचिच्चेत्यावलम्ब्यपि ।

सर्वत्र नीरसमिव तिष्ठत्वात्मरसं मनः ।। ५.६९.८
३१७ चित्ते चेत्यदशाहीने या स्थितिः क्षीणचेतसाम् ।
सोच्यते शान्तकलना जाग्रत्येव सुषुप्तता ।। ५.७०.१२
३१८ एषैव राम सौषुप्ती स्थितिरभ्यासयोगतः ।
प्रौढा सती तुर्यमिति कथिता तत्त्वकोविदैः ।। ५.७०.२६
३१९ अस्यां तु तुर्यावस्थायां स्थितिं प्राप्याविनाशिनीम् ।
आनन्दैकान्तशीलत्वादनानन्दपदं गतः ।। ५.७०.३१
३२० अनानन्दमहानन्दकलातीतस्ततोऽपि हि ।
मुक्त इत्युच्यते योगी तुर्यातीतपदं गतः ।। ५.७०.३२
३२१ जडाजडदृशोर्मध्ये यत्तत्त्वं पारमात्मिकम् ।
तदेव बहुशः प्रोक्तं बृहदारण्यकादिषु ।। ५.७१.५६
३२२ दृश्यदर्शनसंबन्धे यत्सुखं पारमार्थिकम् ।
अनुभूतिमयं तस्मात्सारं ब्रह्मेति कथ्यते ।। ५.७२.३३
३२३ दृश्यदर्शनसंबन्धे सुखसंविदनुत्तमा ।
दृश्यसंवलिता बन्धस्तन्मुक्ता मुक्तिरुच्यते ।। ५.७२.३४/३५
३२४ दृश्यदर्शनसंबन्धे यानुभूतिरनामया ।
तामवष्टभ्य तिष्ठ त्वं सौषुप्तीं भज ते स्थितिम् ।। ५.७२.३७
३२५ अपि शीतरुचावर्के सुतप्तेऽपीन्दुमण्डले ।
अप्यधः प्रसरत्यग्नौ जीवन्मुक्तो न विस्मयी ।। ५.७७.२९
३२६ चिदात्मन इमा इत्थं प्रसरन्तीह शक्तयः ।
इत्यस्याश्चर्यजालेषु नाभ्युदेति कुतूहलम् ।। ५.७७.३०
३२७ द्वौ क्रमौ चित्तनाशाय योगो ज्ञानं च राघव ।
योगस्तद्वृत्तिरोधो हि ज्ञानं सम्यगवेक्षणम् ।। ५.७८.८
३२८ चित्तं प्राणपरिस्पन्दमाहुरागमभूषणाः ।
तस्मिन्संरोधिते नूनमुपशान्तं भवेन्मनः ।। ५.७८.१५
३२९ मनःस्पन्दोपशान्त्यायं संसारः प्रविलीयते ।
सूर्यालोकपरिस्पन्दशान्तौ व्यवहृतिर्यथा ।। ५.७८.१६
३३० योगयुक्तस्य चित्तस्य शम एवं निरूपितः ।
सम्यग्ज्ञानमिदानीं मे कथयानुग्रहात्प्रभो ।। ५.७९.१

३३१ यथाभूतार्थदर्शित्वमेतावद्भुवनत्रये ।
यदात्मैव जगत्सर्वमिति निश्चित्य पूर्णता ।। ५.७९.८

३३२ अभ्यासाद्दृढतां यातो वैराग्यपरिलाञ्छितः ।
यथावासनमायामः प्राणानां सफलः स्मृतः ।। ५.७८.४१

३३३ विकल्पसंक्षयाज्जन्तोः पदं तदवशिष्यते ।
यतो वाचो निवर्तन्ते समग्रकलनान्विताः ।। ५.७८.४९

३३४ इमा घटपटाकारपदार्थशतशक्तयः ।
आत्मैव नान्यदस्तीति निश्चयः सम्यगीक्षणम् ।। ५.७९.३

३३५ अनाद्यन्तावभासात्मा परमात्मेह विद्यते ।
इत्येष निश्चयः स्फारः सम्यग्ज्ञानं विदुर्बुधाः ।। ५.७९.२

३३६ सर्वमात्मैव निर्दिष्टौ भावाभावौ क्व वा स्थितौ ।
क्व बन्धमोक्षकलने किमन्यद्राम शोच्यते ।। ५.७९.९

३३७ न चेत्यमन्यन्नो चित्तं ब्रह्मैवेदं विजृम्भते ।
सर्वमेकं परं ब्रह्म को मोक्षः का च बन्धता ।। ५.७९.१०

३३८ शुद्धमात्मानमालिङ्ग्य नित्यमन्तःस्थया धिया ।
यः स्थितस्तं कमात्मेहं भोगो बन्धयितुं क्षमः ।। ५.७९.१६

३३९ कृतस्फारविचारस्य मनो भोगादयोऽरयः ।
मनागपि न भिन्दन्ति शैलं मन्दानिला इव ।। ५.७९.१७

३४० चित्तचारण चार्वाक चतुर्दिक्कुक्षिभिक्षुक ।
व्यर्थं खेदमनास्थाय नेदं विहर हे जगत् ।। ५.८२.२६

३४१ अहं चेतनमित्येवमसत्या तव वासना ।
अत्यन्तभिन्नयोरैक्यं नास्ति चिन्मनसोः शठ ।। ५.८२.२७

३४२ जीवः सोऽस्म्यहमित्येषा व्यर्थाहंकारदुर्मतिः ।
अहंकारादयं सोऽस्मीत्येतां संरब्धतां त्यज ।
मिथ्यैव जाता दुःखाय न सत्यासत्यवर्जिता ।। ५.८२.२८/२९

३४३ एतावदेव ते रूपं साधो यदविचारणम् ।
विचारेणोपशान्तं त्वमालोकेन तमो यथा ।। ५.८३.३२/३३

३४४ नित्यं पूर्वमभूताय नास्तिरूपाय संप्रति ।
भविष्यते च नोदर्के स्वमनः स्वस्ति ते स्थितिः ।। ५.८३.४२

३४५ परिनिर्वामि शान्तोऽस्मि दिष्ट्यास्मि विगतज्वरः ।
स्वात्मन्येवावतिष्ठेऽहं तुर्यरूपपदे स्थितः ।। ५.८३.४३

३४६ चिदात्मा भगवान्सर्वं साक्षित्वेन करोत्यजः ।
हन्तेन्द्रियगणा यूयं किं निरर्थकमाकुलाः ।।

३४७ भीतः पान्थ इवाहिभ्यः पुक्कसेभ्य इव द्विजः ।
दूरे तिष्ठति चिन्मात्रमिन्द्रियेभ्यो ह्यनामयम् ।।

३४८ राग नीरागतां गच्छ द्वेष निर्द्वेषतां व्रज ।
भवद्भ्यां सुचिरं कालमिह प्रक्रीडितं मया ।। ५.८६.२९/३०

३४९ भोगा नमोऽस्तु युष्मभ्यं जन्मकोटिशतान्यहम् ।
भवद्भिर्लालितो लोके लालकैरिव बालकः ।। ५.८६.३०/३१

३५० इमामपि परां पुण्यां निर्वाणपदवीमहम् ।
येन विस्मारितस्तस्मै सुखायास्तु नमो नमः ।। ५.८६.३१/३२

३५१ त्वदुत्तप्तेन हे दुःख मयात्मान्विष्ट आदरात् ।
तस्मात्त्वदुपदिष्टोऽयं मम मार्गो नमोऽस्तु ते ।। ५.८६.३२/३३

३५२ कार्यमित्र मयाद्य त्वं त्यज्यसे चिरबान्धवः ।
अधिगम्यात्मविज्ञानं स्वस्य नाशः कृतस्त्वया ।।५.८६.३६/३७

३५३ एकाकिन्या विशुष्यन्त्या प्रशान्ते मयि दीनया ।
त्वया दुःखं न कर्तव्यं मातस्तृष्णे नमोऽस्तु ते ।।५.८६.३८/३९

३५४ क्षन्तव्याः काम भगवन् विपरीतापराधजाः ।
दोषा उपशमैकान्तं व्रजाम्यादिश मङ्गलम् ।। ५.८६ ३९/४०

३५५ एते भवन्तः सहजाः प्राक्तनाः सुहृदो मया ।
क्रमेणाद्योत्कृताः प्राणाः स्वस्ति वोऽस्तु व्रजाम्यहम् ।।५.८६.५०/५१

३५६ जीवन्मुक्तशरीराणां कथमात्मविदां वर ।
शक्तयो नेह दृश्यन्ते आकाशगमनादिकाः ।। ५.८९.९

३५७ अनात्मविदमुक्तोऽपि नभोविहरणादिकम् ।
द्रव्यमन्त्रक्रियाकालशक्त्याप्नोत्येव राघव ।। ५.८९.१२

३५८ नात्मज्ञस्यैष विषय आत्मज्ञो ह्यात्मदृक्स्वयम् ।
आत्मनात्मनि संतृप्तो नाविद्यामनुधावति ।। ५.८९.१३

३५९ आत्मवानिह सर्वस्मादतीतो विगतैषणः ।

आत्मन्येव हि संतुष्टो न करोति न चेहते ।। ५.८९.१७

३६० ये केचन जगद्भावास्तानविद्यामयान्विदुः ।
कथं तेषु किलात्मज्ञस्त्यक्ताविद्यो निमज्जति ।। ५.८९.१४

३६१ द्रव्यमन्त्रक्रियाकालशक्तयः साधुसिद्धिदाः ।
परमात्मपदप्राप्तौ नोपकुर्वन्ति काञ्चन ।। ५.८९.३१

३६२ आत्मज्ञस्य तु पूर्णस्य नेच्छा संभवति क्वचित् ।
यस्येच्छा विद्यते काचित्स सिद्धिं साधयत्यलम् ।। ५.८९.३२

३६३ सर्वेच्छाजालसंशान्तावात्मलाभोदयो हि यः ।
स कथं सिद्धिवाञ्छायां मग्नचित्ते न लभ्यते ।। ५.८९.३३

३६४ ब्रह्मन्नतिचिरं कालं कथं जीवन्ति योगिनः ।
एतन्मे संशयं छिन्धि सर्वब्रह्मविदां वर ।।

३६५ प्राणानां स्पन्दनात्स्पन्दस्तच्छान्तौ ते दृषत्समाः ।
यतः स्थिता धारणायां तन्न नश्यन्ति योगिनः ।। ५.८९.५६

३६६ सबाह्याभ्यन्तरः स्पन्दश्चित्तजो वातजोऽथवा ।
न यस्य विद्यते तस्य दूरस्थौ विकृतिक्षयौ ।। ५.८९.५७

३६७ सबाह्याभ्यन्तरे शान्ते स्पन्दे पवनचेतसोः।
धातवः संस्थितिं देहे न त्यजन्ति कदाचन ।। ५.८९.५८

३६८ ये हि विज्ञातविषया वीतरागा महाधियः ।
विच्छिन्नग्रन्थयः सर्वे ते स्वतन्त्रास्तनौ स्थिताः ।। ५.८९.६३

३६९ विवेकाभ्युदयाच्चित्तस्वरूपेऽन्तर्हिते मुनेः ।
मैत्र्यादयो गुणाः कुत्र जायन्ते योगिनां वद ।। ५.९०.२

३७० द्विविधश्चित्तनाशोऽस्ति सरूपोऽरूप एव च ।
जीवन्मुक्तौ स्वरूपः स्यादरूपो देहमुक्तिजः ।। ५.९०.४

३७१ चित्तसत्तेह दुःखाय चित्तनाशः सुखाय तु ।
चित्तसत्तां क्षयं नीत्वा चित्तनाशमुपानयेत् ।। ५.९०.५

३७२ प्राकृतं गुणसंभारं ममेति बहु मन्यते ।
यत्तु चित्तमतत्त्वज्ञं दुःखितं जीव उच्यते ।। ५.९०.७

३७३ सुखदुःखाद्यवष्टब्धमस्मीत्येव विनिश्चलम् ।
विद्यमानं मनो विद्धि संसारद्रुमदोहदम् ।। ५.९०.९

३७४ चेतसः कथिता सत्ता मया रघुकुलोद्वह ।
तस्य नाशमिदानीं त्वं शृणु प्रश्नविदां वर ।। ५.९०.११

३७५ सुखदुःखदशा धीरं साम्यान्न प्रोद्धरन्ति यम् ।
निःश्वासा इव शैलेन्द्रं चित्तं तस्य मृतं विदुः ।। ५.९०.१२

३७६ आपत्कार्पण्यमुत्साहो मदो मान्द्यं महोत्सवः ।
यं नयन्ति न वैरूप्यं तस्य नष्टं मनो विदुः ।। ५.९०.१४

३७७ मनस्तां मूढतां विद्धि यदा नश्यति राघव ।
चित्तनाशाभिधानं हि तदा सत्त्वमुदेत्यलम् ।। ५.९०.१६

३७८ मैत्र्यादिभिर्गुणैर्युक्तं भवत्युत्तमवासनम् ।
भूयोजन्मविनिर्मुक्तं जीवन्मुक्तस्य तन्मनः ।। ५.९०.१८

३७९ सरूपोऽसौ मनोनाशो जीवन्मुक्तस्य तत्र हि ।
वसन्त इव मञ्जर्यो भ्रान्तिमैत्र्यादयो गुणाः ।। ५.९०.२०/२२

३८० अरूपस्तु मनोनाशो यो मयोक्तो रघूद्वह ।
विदेहमुक्त एवासौ विद्यते निष्कलात्मकः ।। ५.९०.२३

३८१ समग्राग्र्यगुणाधारमपि सत्त्वं प्रलीयते ।
विदेहमुक्ते विमले पदे परमपावने ।। ५.९०.२४

३८२ भावाभावदशाकोशं दुःखरत्नसमुद्गकम् ।
बीजमस्य शरीरस्य चित्तमाशावशानुगम् ।। ५.९१.१०

३८३ चित्तादिदमुदेत्युच्चैः सदसच्चाङ्गजालकम् ।
यथा चैतत्स्वयं स्वप्नसंभ्रमेष्वनुभूयते ।। ५.९१.११

३८४ द्वे बीजे चित्तवृक्षस्य वृत्तिव्रततिधारिणः।
एकं प्राणपरिस्पन्दो द्वितीयं दृढवासना ।। ५.९१.१४

३८५ यदा प्रस्पन्दते प्राणो नाडीसंस्पर्शनोद्यतः ।
तदा संवेदनमयं चित्तमाशु प्रजायते ।। ५.९१.१५

३८६ सती सर्वगता संवित्प्राणस्पन्देन बोध्यते ।
संवित्संरोधनं श्रेयः परमं विद्धि राघव ।। ५.९१.२०/२१

३८७ संवित्समुदितैवाशु याति संवेद्यमादरात् ।
संवेदनादनन्तानि ततो दुःखानि चेतसः ।। ५.९१.२२

३८८ सुप्ता पुनरबोधाय संवित्संतिष्ठते यदा ।

लब्धं भवति लब्धव्यं तदा तदमलं पदम् ।। ५.९१.२३

३८९ तस्मात्प्राणपरिस्पंन्दैर्वासनाचोदनैस्तथा ।
नोचेत्संविदमुच्छूनां करोषि तदजो भवान् ।। ५.९१.२४

३९० संविदुच्छूनतां विद्धि चित्तं तेनेदमाततम् ।
अनर्थजालमालूनविशीर्णजनजीवकम् ।। ५.९१.२५

३९१ योगिनश्चित्तशान्त्यर्थं कुर्वन्ति प्राणरोधनम् ।
प्राणयामैस्तथा ध्यानैः प्रयोगैर्युक्तिकल्पितैः ।। ५.९१.२६

३९२ चित्तोपशान्तिफलदं परमं साम्यकारणम् ।
सुभगं संविदः स्वास्थ्यं प्राणसंरोधनं विदुः ।। ५.९१.२७

३९३ ज्ञानवद्भिः प्रकटितामनुभूतां च राघव ।
चित्तस्योत्पत्तिमपरां वासनाजनितां शृणु ।। ५.९१.२८

३९४ दृढभावनया त्यक्तपूर्वापरविचारणम् ।
यदादानं पदार्थस्य वासना सा प्रकीर्तिता ।। ५.९१.२९

३९५ भावितं तीव्रसंवेगादात्मना यत्तदेव सः ।
भवत्याशु महाबाहो विगतेतरसंस्मृतिः ।। ५.९१.३०

३९६ तादृग्रूपो हि पुरुषो वासनाविवशीकृतः ।
प्रपश्यति यदेवैतत्सद्वस्त्विति विमुह्यति ।। ५.९१.३१

३९७ वासनावेगवैवश्यात्स्वरूपं प्रजहाति तत् ।
भ्रान्तं पश्यति दुर्दृष्टिः सर्वं मदवशादिव ।। ५.९१.३२

३९८ असम्यग्दर्शनं यद्यदनात्मन्यात्मभावने ।
यदवस्तुनि वस्तुत्वं तच्चित्तं विद्धि राघव ।। ५.९१.३४

३९९ दृढाभ्यासं पदार्थैकभावनादतिचञ्चलम् ।
चित्तं संजायते जन्मजरामरणकारणम् ।। ५.९१.३५

४०० यदा न भाव्यते किंचिद्धेयोपादेयरूपि यत् ।
स्थीयते सकलं त्यक्त्वा तदा चित्तं न जायते ।। ५.९१.३६

४०१ अवासनत्वात्सततं यदा न मनुते मनः ।
अमनस्ता तदोदेति परमोपशमप्रदा ।। ५.९१.३७

४०२ यदा न भाव्यते भावः क्वचिज्जगति वस्तुनि ।
तदा हृदम्बरे शून्ये कथं चित्तं प्रजायते ।। ५.९१.३९

४०३ एतावन्मात्रकं मन्ये रूपं चित्तस्य राघव ।
यद्भावनं वस्तुनोऽन्तर्वस्तुत्वेन रसेन च ।। ५.९१.४०

४०४ न किंचित्कलनायोग्यं दृश्यं भावयतः स्वतः ।
आकाशकोशस्वच्छस्य कुतश्चित्तोदयो भवेत् ।। ५.९१.४१

४०५ यदभावनमास्थाय यदभावस्य भावनम् ।
यद्यथावस्तुदर्शित्वं तदचित्तत्वमुच्यते ।। ५.९१.४२

४०६ सर्वमन्तः परित्यज्य शीतलाशयवर्ति यत् ।
वृत्तिस्थमपि तच्चित्तमसद्रूपमुदाहृतम् ।। ५.९१.४३

४०७ घना न वासना यस्य पुनर्जननकारिणी ।
जीवन्मुक्तः स तत्त्वस्थश्चक्रभ्रमवदास्थितः ।। ५.९१.४५

४०८ भ्रष्टबीजोपमा येषां पुनर्जननवर्जिता ।
वासना रसनिर्हीना जीवन्मुक्ता हि ते स्मृताः ।। ५.९१.४६

४०९ सत्तवरूपपरिप्राप्तचित्तास्ते ज्ञानपारगाः ।
अचित्ता इति कथ्यन्ते देहान्ते व्योमरूपिणः ।। ५.९१.४७

४१० द्वे बीजे राम चित्तस्य प्रणस्पन्दनवासने ।
एकस्मिंश्च तयोः क्षीणे क्षिप्रं द्वे अपि नश्यतः ।। ५.९१.४८

४११ वासनावशतः प्राणस्पन्दस्तेन च वासना ।
जायते चित्तबीजस्य तेन बीजाङ्कुरक्रमः ।। ५.९१.५३/५४

४१२ वासनाप्राणपवनस्पन्दयोरनयोर्द्वयोः ।
संवेद्यं बीजमित्युक्तं स्फुरतस्तौ यतस्ततः ।। ५.९१.६३/६४

४१३ संवेद्यसंपरित्यागात्प्राणस्पन्दनवासने ।
समूलं नश्यतः क्षिप्रं मूलच्छेदादिव द्रुमः ।। ५.९१.६५/६६

४१४ संविदं विद्धि संवेद्यं बीजं धीर तया विना ।
न संभवति संवेद्यं तैलहीनस्तिलो यथा ।। ५.९१.६६/६७

४१५ न बहिर्नान्तरे किंचित्संवेद्यं विद्यते पृथक् ।
संवित्स्फुरन्ती संकल्पात्संवेद्यं पश्यति स्वतः ।। ५.९१.६७/६८

४१६ स्वप्ने यथात्ममरणं तथा देशान्तरस्थितिः ।
स्वचमत्कारयोगेन संवेद्यं संविदस्तथा ।। ५.९१.६८/६९

४१७ पूर्वदृष्टमदृष्टं वा यदस्याः प्रतिभासते ।

संविदस्तत्प्रयत्नेन मार्जनीयं विजानता ।। ५.९१.७४/७५

४१८ तदमार्जनमात्रं हि महासंसारसंगतम् ।
तत्प्रमार्जनमात्रं तु मोक्ष इत्यनुभूयते ।। ५.९१.७५/७६

४१९ संवेदनमनन्ताय दुःखाय जननात्मने ।
असंवित्तिरजाड्यस्था सुखायाजननात्मने ।। ५.९१.७६/७७

४२० अजडो गलितानन्दस्त्यक्तसंवेदनो भव ।
असंवेद्यप्रबुद्धात्मा यस्तु स त्वं रघूद्वह ।। ५.९१.७७

४२१ असंवित्तिरजाड्यस्था कीदृशी भवति प्रभो ।
असंवित्तौ च जाड्यं तत्कथं वा विनिवार्यते ।। ५.९१.७८

४२२ यः सर्वत्रानवस्थास्थो विश्रान्तास्थो न कुत्रचित् ।
जीवो न विन्दते किंचिदसंविदजडो हि सः ।। ५.९१.७९

४२३ संविद्वस्तुदशालम्बः स यस्येह न विद्यते ।
सोऽसंविदजडः प्रोक्तः कुर्वन्कार्यशतान्यपि ।। ५.९१.८०

४२४ संवेद्येन हृदाकाशं मनागपि न लिप्यते ।
यस्यासावजडोऽसंविज्जीवन्मुक्तः स उच्यते ।। ५.९१.८१

४२५ यदा न भाव्यते किंचिन्निर्वासनतयात्मनि ।
बालमूकादिविज्ञानमिव च स्थीयते स्थिरम् ।। ५.९१.८२

४२६ तदा जाड्यविनिर्मुक्तमसंवेदनमाततम् ।
आश्रितं भवति प्राज्ञ यस्माद्भूयो न लिप्यते ।। ५.९१.८३

४२७ समस्तवासनां त्यक्त्वा निर्विकल्पसमाधितः ।
नीलत्वमिव खे स्फारमानन्दित्वं प्रवर्तते ।। ५.९१.८४

४२८ योगिनस्तत्र लीनस्य निःसंवेदनसंविदः ।
तन्मयत्वादनाद्यन्ते तदप्यन्तर्विलीयते ।। ५.९१.८५

४२९ गच्छंस्तिष्ठन्स्पृशञ्जिघ्रन्नपि तेन स उच्यते ।
अजडो गलितानन्दस्त्यक्तसंवेदनः सुखी ।। ५.९१.८६

४३० एतां दृष्टिमवष्टभ्य कष्टया यत्नचेष्टया ।
तरेद्दुःखाम्बुधेः पारमपारगुणसागरम् ।। ५.९१.८७

४३१ अथास्यां संविदो राम सन्मात्रं बीजमुच्यते ।
सन्मात्राद्यदुदेत्येषा प्रकाश्यमिव तेजसः ।। ५.९१.९८

४३२ द्वे रूपे तत्र सत्ताया एकं नानाकृति स्थितम् ।
द्वितीयमेकरूपं तु विभागोऽयं तयोः शृणु ।। ५.९१.९९

४३३ घटता पटता तत्ता त्वत्ता मत्तेति कथ्यते ।
सत्तारूपं विभागेन यत्तन्नानाकृति स्मृतम् ।। ५.९१.१००

४३४ विशेषं संपरित्यज्य सन्मात्रं यदलेपकम् ।
एकरूपं महारूपं सत्तायास्तत्पदं विदुः ।। ५.९१.१०२

४३५ कालसत्ता कलासत्ता वस्तुसत्तेयमित्यपि ।
विभागकलनां त्यक्त्वा सन्मात्रैकपरो भव ।। ५.९१.१०५

४३६ कालसत्ता स्वसत्ता च प्रोन्मुक्तकलना सती ।
यद्यप्युत्तमसद्रूपा तथाप्येषा न वास्तवी ।। ५.९१.१०६

४३७ विभागकलना यत्र विभिन्नपददायिनी ।
नानात्वकारणं दृष्ट्वा तत्कथं पावनं भवेत् ।। ५.९१.१०७

४३८ सत्तासामान्यमेवैकं भावयन्केवलं विभुम् ।
परिपूर्णपरानन्दी तिष्ठापूरितदिग्भरः।। ५.९१.१०८

४३९ सत्तासामान्यमात्रस्य या कोटिः कोविदेश्वर ।
सैवास्य बीजतां याता तत एतत्प्रवर्तते ।। ५.९१.१०९

४४० सत्तासामान्यपर्यन्ते यत्तत्कलनयोज्झितम् ।
पदमाद्यमनाद्यन्तं तस्य बीजं न विद्यते ।। ५.९१.११०

४४१ तत्र सत्ता लयं याति निर्विकारं च तिष्ठति ।
भूयो नावर्तते दुःखं तत्र लब्धपदः पुनः ।। ५.९१.१११

४४२ तद्धेतुः सर्वहेतूनां तस्य हेतुर्न विद्यते ।
स सारः सर्वसाराणां तस्मात्सारो न विद्यते ।। ५.९१.११२

४४३ तस्मिंश्चिद्दर्पणे स्फारे समस्ता वस्तुदृष्टयः ।
इमास्ताः प्रतिबिम्बन्ति सरसीव तटद्रुमाः ।। ५.९१.११३

४४४ तदमलमजरं तदात्मतत्त्वं
तदवगतावुपशान्तिमेति चेतः ।
अवगतविततैकतत्स्वरूपो
भवभयमुक्तपदोऽसि तच्चिराय ।। ५.९१.१२२

४४५ एतानि तानि प्रोक्तानि त्वया बीजानि मानद ।

कतमस्य प्रयोगेण शीघ्रमासाद्यते पदम् ।। ५.९२.१
४४६ एतेषां दुःखबीजानां प्रोक्तं यद्यन्मयोत्तरम् ।
तस्य तस्य प्रयोगेण शीघ्रमासाद्यते पदम् ।। ५.९२.२
४४७ सत्तासामान्यकोटिस्थे द्रागित्येव पदे यदि ।
पौरुषेण प्रयत्नेन बलात्संत्यज्य वासनाः ।। ५.९२.३
४४८ स्थितिं बध्नासि तत्त्वज्ञ क्षणमप्यक्षयात्मिकाम् ।
क्षणेऽस्मिन्नेव तत्साधुपदमासादयस्यलम् ।। ५.९२.४
४४९ सत्तासामान्यरूपे वा करोषि स्थितिमङ्ग चेत् ।
तत्किंचिदधिकेनेह यत्नेनाप्नोषि तत्पदम् ।। ५.९२.५
४५० संवित्तत्वे कृतध्यानो यदि तिष्ठसि राघव ।
तद्यत्नेनाधिकेनोच्चैरासादयसि तत्पदम् ।। ५.९२.६
४५१ संवेद्ये केवले ध्यानं न कार्यं रघुनन्दन ।
संवेद्ये वासनात्यागः सुमेरून्मूलनादपि ।। ५.९२.७/१०
४५२ तत्त्वज्ञानं मनोनाशो वासनाक्षय एव च ।
मिथः कारणतां गत्वा दुःसाध्यानि स्थितान्यतः ।। ५.९२.१४
४५३ तस्माद्राघव यत्नेन पौरुषेण विवेकतः ।
भोगेच्छां दूरतः कृत्वा त्रयमेतत्समाश्रयेत् ।। ५.९२.१५
४५४ त्रय एते समं यावन्न स्वभ्यस्ता मुहुर्मुहुः ।
तावन्न तत्त्वसंप्राप्तिर्भवत्यपि समाशतैः ।। ५.९२.१६
४५५ वासनाक्षयविज्ञानमनोनाशा महामते ।
समकालं समभ्यस्ता भवन्ति फलदा मुनेः ।। ५.९२.१७
४५६ अध्यात्मविद्याधिगमः साधुसंगम एव च ।
वासनासंपरित्यागः प्राणस्पन्दनिरोधनम् ।। ५.९२ ३५/३६
४५७ एतास्तु युक्तयः पुष्टाः सन्ति चित्तजये किल ।
आभिस्तज्जीयते क्षिप्रं धाराभिरिव भूरजः ।। ५.९२.३६/३७
४५८ मनागपि विचारेण चेतसः स्वस्य निग्रहः ।
मनागपि कृतो येन तेनाप्तं जन्मनः फलम् ।। ५.९३.१
४५९ विचारकणिका यैषा हृदि स्फुरति पेलवा ।
एषैवाभ्यासयोगेन प्रयाति शतशाखताम् ।। ५.९३.२

४६० किमिदं स्याज्जगत्किं स्यादहमित्यनिशं शनैः ।
विचारयाध्यात्मदृशा स्वयं वा सज्जनैः सह ।। ५.९३.१६
४६१ विचारोऽध्यात्मविद्यानां ज्ञानमङ्ग विदुर्बुधाः ।
ज्ञेयं तस्यान्तरेवास्ति माधुर्यं पयसो यथा ।। ५.९३.२१
४६२ सङ्गः कारणमर्थानां सङ्गः संसारकारणम् ।
सङ्गः कारणमाशानां सङ्गः कारणमापदाम् ।। ५.९३.८१
४६३ सङ्गत्यागं विदुर्मोक्षं सङ्गत्यागादजन्मता ।
सङ्गं त्यज त्वं भावानां जीवन्मुक्तो भवानघ ।। ५.९३.८२
४६४ सङ्गः किमुच्यते ब्रूहि समासेन मम प्रभो ।। ५.९३.८३
४६५ भावाभावपदार्थानां हर्षमर्षविकारदा ।
मलिना वासना यैषा सा सङ्ग इति कथ्यते ।। ५.९३.८४
४६६ जीवन्मुक्तशरीराणामपुनर्जन्मकारिणी ।
मुक्ता हर्षविषादाभ्यां शुद्धा भवति वासना ।। ५.९३.८५
४६७ अजीवन्मुक्तरूपाणां दीनानां मूढचेतसाम् ।
कथ्यते सङ्गशब्देन वासना भवकारिणी ।। ५.९३.८७
४६८ हर्षामर्षविषादानां यदि गच्छसि वश्यताम् ।
ततो हर्षविषादाभ्यां बन्धनी वासना भवेत् ।।
४६९ मुक्तो हर्षविषादाभ्यां यदि गच्छसि नान्यताम् ।
वीतरागभयक्रोधस्तदसङ्गोऽसि राघव ।। ५.९३.९०
४७० दुःखैर्न ग्लानिमायासि यदि हृष्यसि नो सुखैः ।
आशावैवश्यमुत्सृज्य तदसङ्गोऽसि राघव ।। ५.९३.९१
४७१ संपद्विपदि चैवात्मा यदि ते लक्ष्यते समः ।
यथाप्राप्तानुवर्ती च तदसङ्गोऽसि राघव ।।
४७२ सदा समस्तेऽपि हि वस्तुजाते
समाशयो ह्यन्तरदीनसत्त्वः ।
यदेव किंचित्प्रकृतं तदेव
कुर्वन्नसङ्गः सुखमास्व राम ।। ५.९३.९६/९७
४७३ दिक्कालाद्यनवच्छिन्नमदृष्टोभयकोटिकम् ।
चिन्मात्रमक्षयं शान्तमेकं ब्रह्मास्मि नेतरत् ।। ६पू.२.२३

४७४ इति मत्वाहमित्यन्तर्मुक्तामुक्तवपुर्महान् ।
एकरूपः प्रशान्तात्मा मौनी स्वात्मसुखो भव ।। ६पू.२.२५
४७५ यावदज्ञानकलना यावदब्रह्मभावना ।
यावदास्था जगज्जाले तावच्चित्तादिकल्पना ।। ६पू.२.३०
४७६ नास्ति चित्तं न चाविद्या न मनो नास्ति जीवकः ।
एताश्च कलना राम कृता ब्रह्मण एव ताः ।
ब्रह्मैवैकमनाद्यन्तमब्धिवत्प्रतिजृम्भते ।। ६पू.२.२६/२७
४७७ देहे यावदहंभावो दृश्येऽस्मिन्यावदात्मता ।
यावन्ममेदमित्यास्था तावच्चित्तादिविभ्रमः ।। ६पू.२.३१
४७८ अन्तर्मुखतया सर्वं चिद्वह्नौ त्रिजगत्तृणम् ।
जुह्वतोऽन्तर्निवर्तन्ते मुनेश्चित्तादिविभ्रमाः ।। ६पू.२.४६
४७९ चिदात्मास्मि निरंशोऽस्मि पारावारविवर्जितः ।
रूपं स्मर निजं स्फारं माऽस्मृत्या संमितो भव ।। ६पू.२.५६
४८० यत्रास्ति वासनाबीजं तत्सुषुप्तं न सिद्धये ।
निर्बीजा वासना यत्र तत्तुर्यं सिद्धिदं स्मृतम् ।। ६पू.१०.२०
४८१ वासनायास्तथा वह्नेॠणव्याधिद्विषामपि ।
स्नेहवैरिविषाणां च शेषः स्वल्पोऽपि बाधते ।। ६पू.११.२१
४८२ यदिदं किंचिदाभोगि जगज्जालं प्रदृश्यते ।
तत्सर्वममलं ब्रह्म बृंहदेतद्व्यवस्थितम् ।। ६पू.११.१६
४८३ ब्रह्म चिद्ब्रह्म भुवनं ब्रह्म भूतपरम्परा ।
ब्रह्माहं ब्रह्म मच्छत्रुर्ब्रह्म मन्मित्रबान्धवाः ।। ६पू.११.१७
४८४ अज्ञस्य दुःखौघमयं ज्ञस्यानन्दमयं जगत् ।
अन्धं भुवनमन्धस्य प्रकाशं तु सुचक्षुषः ।। ६पू.११.३२/३३
४८५ सर्वमेव हि ब्रह्मेति भाविते ब्रह्म वै पुमान् ।
पीतेऽमृतेऽमृतमयः को नाम न भवेत्किल ।।
४८६ आभासमात्रममलं सर्वभूतावबोधकम् ।
सर्वत्रावस्थितं शान्तं चिद्ब्रह्मेत्यनुभूयते ।। ६पू.११.६८
४८७ ब्रह्मन्नियतिरेषा हि दुर्लङ्घ्या पारमेश्वरी ।
मयेदृशेन वै भाव्यं भाव्यमन्यैश्च तादृशैः ।। ६पू.२१.२३

४८८ न शक्यते चालयितुमवश्यं भवितव्यता ।
यद्यथा तत्तथैतद्धि स्वभावस्यैष निश्चयः ।। ६पू.२१.२४
४८९ आज्ञाचरणमेवाहुर्मुख्यमाराधनं सताम् ।। ६पू.२३.४
४९० सम्यग्ज्ञानविलासेन वासनाविलयोदये ।
जीवन्मुक्तपदे ब्रह्मन्नूनं विश्रान्तवानहम् ।। ६पू.१३.१
४९१ आभासमात्रमेवेदमित्थं संप्रति भासते ।
अयं नामाहमित्यन्तरसदेव शरीरकम् ।। ६पू.२८.१३
४९२ मांसास्थिमयनिर्माणदेहोऽहमिति विभ्रमम् ।
त्यज संकल्पनिर्माणदेहाः सन्ति सहस्रशः ।। ६पू.२८.१९/२०
४९३ सुखतल्पगतो येन स्वप्नदेहेन दिक्तटान् ।
परिभ्रमसि हे राम स देहस्ते क्व संस्थितः ।।६पू.२८.२०/२१
४९४ जागरायां मनोराज्ये येन स्वर्गपुरान्तरम् ।
परिभ्रमसि मेरुं वा स देहस्ते क्व संस्थितः ।।६पू.२८.२१/२२
४९५ दीर्घस्वप्नमिमं विद्धि दीर्घं वा चित्तविभ्रमम् ।
दीर्घं वापि मनोराज्यं संसारं रघुनन्दन ।। ६पू.२८.२८/२९
४९६ आभासमात्रमेवेदं न सन्नासज्जगत्त्रयम् ।
इत्यन्यकलनात्यागं सम्यगालोकनं विदुः ।। ६पू.२८. ४७/४८
४९७ अवश्यमेव हि मया मर्तव्यमिति निश्चयः ।
इत्यात्ममरणप्राप्तौ किं मुधा परितप्यते ।। ६पू.२८.५४/५५
४९८ अवश्यमेव जातेन किंचित्सुविभवादिकम् ।
प्राप्तव्यं पुरुषेणेति लाभेष्वर्थेषु को मदः ।। ६पू.२८.५५/५६
४९९ प्रविभागं परित्यज्य पदार्थपटलव्रजे ।
आभासमात्रे सामान्यमिदमालोकयानघ ।। ६पू.२८.६७/६८
५०० आभासमात्रमखिलं वित्तामर्शकलङ्कितम् ।
ततस्तदपि संत्यज्य निराभासो भवोत्तम ।। ६पू.२८.६८/६९
५०१ परं पौरुषमाश्रित्य बलं प्रज्ञां च युक्तितः ।
नाभिं संसारचक्रस्य चित्तमेव निरोधयेत् ।। ६पू.२९.७/८
५०२ प्रज्ञासौजन्ययुक्तेन शास्त्रसंवलितेन च ।
पौरुषेण न यत्प्राप्तं न तत्क्वचन लभ्यते ।। ६पू.२९.८/९

५०३ भयप्रदमकल्याणं धैर्यसर्वस्वहारिणम् ।
मनःपिशाचमुत्सृज्य योऽसि सोऽसि स्थिरो भव ।। ६पू.२९.६७
५०४ चित्तयक्षदृढाक्रान्तं न शास्त्राणि न बान्धवाः ।
शक्नुवन्ति परित्रातुं गुरवो न च मानवम् ।। ६पू.२९.६८
५०५ संशान्तचित्तवेतालं गुरुशास्त्रार्थबान्धवाः ।
शक्नुवन्ति समुद्धर्तुं स्वल्पपङ्कान्मृगं यथा ।। ६पू.२९.६९
५०६ अत्रेमामपरां दृष्टिं महामोहविनाशिनीम् ।
शृणु या कथिता पूर्वं मम कैलासकन्दरे ।
संसारदुःखशान्त्यर्थं देवेनार्धेन्दुमौलिना ।। ६पू.२९.८५/८६
५०७ ब्रूहि प्रसन्नया बुद्ध्या त्यक्तोद्वेगमनामयम् ।
सर्वपापक्षयकरं सर्वकल्याणवर्धनम् ।। ६पू.२९.११६
५०८ देवार्चनविधानं तत्कीदृशं भवति प्रभो ।
शृणु ब्रह्मविदां श्रेष्ठ देवार्चनमनुत्तमम् ।। ६पू.२९.११७
५०९ न देवः पुण्डरीकाक्षो न च देवस्त्रिलोचनः ।
न देवो देहरूपो हि न देवश्चित्तरूपकः ।
अकृत्रिममनाद्यन्तं देवनं देव उच्यते ।। ६पू.२९.११८/१२०
५१० आकारादिपरिच्छिन्ने मिते वस्तुनि तत्कुतः ।
अकृत्रिममनाद्यन्तं देवनं चिच्छिवं विदुः ।। ६पू.२९.१२२
५११ देवः कः स्यादिति त्वेतत्प्रथमं तावदुच्यते।
तदेव देवशब्देन कथ्यते तत्प्रपूजयेत् ।। ६पू.२९.१२३
५१२ अज्ञातशिवतत्त्वानामाकाराद्यर्चनं कृतम् ।
योजनाध्वन्यशक्तस्य क्रोशाध्वा परिकथ्यते ।। ६पू.२९.१२४
५१३ चिद्व्योमैव किलास्तीह पारावारविवर्जितम् ।
सर्वत्रासंभवच्चेत्यं कल्पान्तेषु च शिष्यते ।। ६पू.२९.१३४
५१४ बोधः साम्यं शमश्चेति पुष्पाण्यग्र्याणि तस्य तैः ।
शिवं चिन्मात्रममलं पूज्यं पूजाविदो विदुः ।। ६पू.२९.१२७
५१५ शमबोधादिभिः पुष्पैर्देव आत्मा यदर्च्यते ।
तत्तु देवार्चनं विद्धि नाकारार्चनमर्चनम् ।। ६पू.२९.१२८
५१६ अकृत्रिममनाद्यन्तमद्वितीयमखण्डितम् ।

अबहिःसाधनासाध्यं सुखं तस्मादवाप्यते ।। ६पू.३०.३
५१७ यत्किंचिदपि संकल्प्य नरो दुःखे निमज्जति ।
न किंचिदपि संकल्प्य सुखमव्ययमश्नुते ।। ६पू.३३.३५
५१८ स्वविवेकानिलैः कृत्वा संकल्पजलदक्षयम् ।
परां निर्मलतामेहि शरदीव नभोन्तरम् ।। ६पू.३३.३७
५१९ एष देवः स परमः पूज्य एष सदासताम् ।
पूजनं ध्यानमेवान्तर्नान्यदस्त्यस्य पूजनम् ।। ६पू.३८.१/६
५२० तस्मात् त्रिभुवनाधारं नित्यं ध्यानेन पूजयेत् ।
चिद्रूपं सूर्यलक्षाभं समस्ताभासभासनम् ।। ६पू.३८.७
५२१ स्वसंविदात्मा देवोयं नोपहारेण पूज्यते ।
नित्यमक्लेशलभ्येन शीतलेनाविनाशिना ।। ६पू.३८.२२/२४
५२२ एतदेव परं ध्यानं पूजैषैव परा स्मृता ।
यदनारातमन्तःस्थशुद्धचिन्मात्रवेदनम् ।। ६पू.३८.२५
५२३ बाह्यसंपूजनं प्रोक्तमेतदुत्तममात्मनः ।
इदानीं संप्रवक्ष्येऽहमन्तःपूजनमात्मनः ।। ६पू.३८.३६/३९.१
५२४ एवं देवार्चनं नित्यं ज्ञः कुर्वन् मुनिनायक ।
यत्रास्यदादयो भृत्यास्तत्प्रयाति परं पदम् ।। ६पू.४१.२६
५२५ यथा प्राप्तिक्षणे वस्तु प्रथमं तुष्टये तथा ।
न प्राप्त्येकक्षणादूर्ध्वमिति को नानुभूतवान् ।। ६पू.४४.२
५२६ वाञ्छाकाले यथा वस्तु तुष्टये नान्यदा तदा ।
तस्मात्क्षणसुखे सक्तिं बालो बध्नाति नेतरः ।। ६पू.४४.३
५२७ वाञ्छाक्षणे तु या तुष्टिस्तत्र वाञ्छैव कारणम् ।
तुष्टिस्त्वतुष्टिपर्यन्ता तस्माद्वाञ्छां परित्यज ।। ६पू.४४.४
५२८ आशा यातु निराशत्वमभावं यातु भावना ।
अमनस्त्वं मनो यातु तवासङ्गेन जीवतः ।। ६पू.४४.१०
५२९ चित्तोन्मेषनिमेषाभ्यां संसारप्रलयोदयौ ।
वासनाप्राणसंरोधादनिमेषं मनः कुरु ।। ६पू.४४.१६
५३० असंवित्स्पन्दमात्रेण याति चित्तमचित्तताम् ।
प्राणानां वा निरोधेन तदेव परमं पदम् ।। ६पू.४४.२४

५३१ दृश्यदर्शनसंबन्धे यत्सुखं पारमार्थिकम् ।
तदन्तैकान्तसंवित्त्या ब्रह्मदृष्ट्या मनःक्षयः ।। ६पू.४४.२५
५३२ यत्र नाभ्युदितं चित्तं तद्वै सुखमनुत्तमम् ।
क्षयातिशयनिर्मुक्तं नोदेति न च शाम्यति ।। ६पू.४४.२६/२७
५३३ ज्ञस्य चित्तं न चित्ताख्यं ज्ञचित्तं सत्यमुच्यते ।
नानार्थान्यत्वभाक्चित्तं बोधात्ताम्रं सुवर्णवत् ।। ६पू.४४.३०
५३४ ब्रह्मैव भूरिभुवनभ्रमविभ्रमोच्चै-
रित्थं स्थितं सममनेकतयैकमेव ।
सर्वात्मकं भवति नेतरदङ्ग किंचि-
च्चित्तादिकं च न हृदीव हि संनिवेशः ।। ६पू.४४.३४
५३५ सर्वसंकल्पसंशान्तौ प्रशान्तघनवासनम् ।
न किंचिद्भावनाकारं तद्ब्रह्म परमं विदुः ।। ६पू.५३.२२
५३६ अपि स्फुटति विन्ध्याद्रौ वाति वा प्रलयानिले ।
गुरुशास्त्रानुगो मार्गः परित्याज्यो न धीमता ।। ६पू.५५.३३
५३७ सर्वमस्ति चितः कोशे यद्यथालोकयत्यसौ ।
चित्तथा तदवाप्नोति सर्वात्मत्वादसंशयम् ।। ६पू.६४.१३/१४
५३८ यत्स्वप्ने दृश्यते यच्च संकल्पैरवलोक्यते ।
तत्तथा विद्यते तत्र सर्वकालं तदात्मकम् ।। ६पू.६४.११
५३९ संकल्पस्वप्नगं वस्तु यया च दशयाप्यते ।
परमाभ्यासयोगाभ्यां विना त्वेतन्न लभ्यते ।। ६पू.६४.१४/१५
५४० येषां तु योगविज्ञानदृष्टयः फलिताः स्थिताः ।
सर्वं सर्वत्र पश्यन्ति त एते शङ्करादयः ।। ६पू.६४.१५/१६
५४१ सर्वं ह्यभिमतं कार्यमेकनिष्ठस्य सिद्ध्यति ।
दक्षिणां ककुभं पश्यन्कः प्राप्नोत्युत्तरां दिशम् ।। ६पू.६४.१७/१८
५४२ संकल्पार्थपरैरेव संकल्पार्थोऽवगम्यते ।
अग्रस्थार्थपरैरेव अग्रस्थार्थोऽवगम्यते ।। ६पू.६४.१८/१९
५४३ अग्रस्थे बुद्धिसंस्थे यः संकल्पं प्राप्तुमिच्छिति ।
तदासावेकनिष्ठत्वाभावात्तन्नाशयेत् द्वयम् ।। ६पू.६४.१९/२०
५४४ अभावितायां शुष्कायां क्रियायां बद्धनिश्चयः ।

हठाज्जितेन्द्रियग्रामो मुनिः स्यात्काष्ठतापसः ।। ६पू.६८.४
५४५ यथा भूतमिदं बुद्ध्वा भावितात्मात्मनि स्थितः ।
लोकोपमोऽपि तृप्तोऽन्तर्यः स मुक्तो मुनिः स्मृतः ।।६पू.६८.५
५४६ एतयोर्योऽभवद्भावः शान्तयोर्मुनिनाथयो : ।
चित्तनिश्चयरूपात्मा मौनशब्देन कथ्यते ।। ६पू.६८.६
५४७ वाङ्मौनं वचसां रोधो बलादिन्द्रियनिग्रहः ।
अक्षमौनं परित्यागश्चेष्टानां काष्ठसंज्ञकम् ।। ६पू.६८.८
५४८ प्रस्फुरच्चित्तकलनमेतन्मौनत्रयं स्थितम् ।
एतेषां हठमौनानां विषयः काष्ठतापसः ।। ६पू.६८.१३
५४९ अविभागमनायासं यदनाद्यन्तमास्थितम् ।
ध्यायतोऽध्यायतश्चैव सौषुप्तं मौनमुच्यते ।। ६पू.६८.१८
५५० यथाभूतमिदं बुद्ध्वा जगन्नानात्वविभ्रमम् ।
यदास्थितमसंदेहं सौषुप्तं मौनमुच्यते ।। ६पू.६८.१९
५५१ अनेकसंविद्रूपात्म शिवमेवेदमाततम् ।
इत्यास्थितमनन्तं यत्सौषुप्तं मौनमुच्यते ।। ६पू.६८.२०
५५२ आकाशं नैव चाकाशं सर्वमस्ति च नास्ति च ।
इति स्थितं समं शान्तं यत्तन्मौनं सुषुप्तवत् ।। ६पू.६८.२१
५५३ सुषुप्तमौनं योगीशैर्द्विविधैः प्राप्यते खलु ।
सांख्ययोगिन एके स्युरपरे योगयोगिनः ।।
५५४ सम्यग्ज्ञानावबोधेन सुसिद्धैकसमाधिनः ।
संख्ययैवावबुद्ध्येयुस्ते सांख्या योगिनः स्मृताः ।। ६पू.६९.१८
५५५ प्राणाद्यनिलसंशान्तौ युक्त्या ये पदमागताः ।
अनामयमनाद्यन्तं ते स्मृता योगयोगिनः ।। ६पू.६९.१९
५५६ उपादेयं तु सर्वेषां शान्तं पदमकृत्रिमम् ।
यत्सांख्यैः प्राप्यते स्थानं परं योगैस्तदेव हि ।।६पू.६९.२०/२१
५५७ यत्र प्राणमनोवृत्तिरत्यन्तं नोपलभ्यते ।
वासनावागुराक्रान्ता यद्विद्धि परमं पदम् ।। ६पू.६९.२२
५५८ मनो मुधैवाभ्युदितमसदेवानवेक्षणात् ।
स्वप्ने स्वमरणाकारं प्रेक्षमाणं न विद्यते ।। ६पू.६९.२५

५५९ एकतत्त्वघनाभ्यासः प्राणानां विलयस्तथा ।
मनोविनिग्रहश्चेति मोक्षशब्दार्थसंग्रहः ।। ६पू.६९.२७
५६० एकार्थाभ्यसनप्राणरोधचित्तपरिक्षयाः ।
एकस्मिन्नेव संसिद्धे संसिद्ध्यन्ति परस्परम् ।। ६पू.६९.४०
५६१ अविनाभाविनी नित्यं जन्तूनां प्राणचेतसी ।
कुसुमामोदवन्मिश्रे तिलतैल इव स्थिते ।। ६पू.६९.४५
५६२ आधाराधेयवच्चैव एकाभावे विनश्यतः ।
कुरुतश्च स्वनाशेन कार्यं मोक्षाख्यमुत्तमम् ।। ६पू.६९.४७
५६३ एकस्मिन्सुदृढे तत्त्वे तावद्भावं विभावयेत् ।
भावो भावत्वमायाति स्वाभ्यासाद्यावदाततम् ।। ६पू.६९.५१
५६४ यदेकतानं भवति चेतस्तद्भवति क्षणात् ।
शान्ताशेषविशेषौघं चिराभ्यासस्वभावतः ।। ६पू.६९.५३
५६५ संहृत्य सर्वतश्चित्तं स्तिमितेनान्तरात्मना ।
प्रवाहपतितं कुर्वन्निरिच्छस्तिष्ठ शान्तधीः ।। ६पू.७३.५
५६६ शरीरेऽस्मिंश्चिरारूढो गिरौ तरुरिव स्वके ।
अहंभावो महाभाग वद मे त्यज्यते कथम् ।। ६पू.७४.३२
५६७ पौरुषेण प्रयत्नेन त्यक्त्वा भौगौघभावनाम् ।
गत्वा विकसितां सत्तामहंकारलयं व्रजेत् ।। ६पू.७४.३३
५६८ यन्त्राणां पञ्जरं यावद्भग्नं लज्जादिनाखिलम् ।
अकिंचनत्वशेषेण स्फुटा तावदहंकृतिः ।। ६पू.७४.३४
५६९ सर्वमेतद्धिया त्यक्त्वा यदि तिष्ठसि निश्चलः ।
तदहंकारविलये त्वमेव परमं पदम् ।। ६पू.७४.३५
५७० इदं पूर्वं परित्यज्य क्रोडीकृत्य मनःखगम् ।
शान्त आत्मनि तिष्ठ त्वं शिखिध्वज इवाचलः ।। ६पू.७७.२
५७१ उपदेशक्रमो राम व्यवस्थामात्रपालनम् ।
ज्ञप्तेस्तु कारणं शुद्धा शिष्यप्रज्ञैव केवला ।। ६पू.८३.१३
५७२ अनर्थमकरागारादस्मात्संसारसागरात् ।
उत्तीर्यते निरुद्वेगं सर्वत्यागेन पुत्रक ।। ६पू.१११.९
५७३ चित्तं सर्वमिति प्राहुस्तत्त्यक्त्वा पुत्र राजसे ।

चित्तत्यागं विदुः सर्वत्यागं सर्वविदो जनाः ।। ६पू.१११.२१
५७४ इत्युक्त्वा वाक्पतिः पुत्रं पुप्लुवे तरसा नभः ।
अन्वियेष कचश्चित्तं परित्यक्तुमखिन्नधीः ।। ६पू.१११.२२
५७५ चिन्तयन्नप्यसौ चित्तं न यदा वेद कानने ।
तदा संचिन्तयामास धियैवमविखिन्नया ।। ६पू.१११.२३
५७६ पदार्थवृन्दं देहादि न चित्तमिति कथ्यते ।
तदेतत्किं क्व वा व्यर्थं निरागस्कं त्यजाम्यहम् ।।६पू.१११.२४
५७७ पितुः सकाशं गच्छामि ज्ञातुं चित्तं महारिपुम् ।
ज्ञात्वा तावत्त्यजाम्याशु ततस्तिष्ठामि विज्वरः ।। ६पू.१११.२५
५७८ चिन्तयित्वा जगामेति कचः स्वं पितरं गुरुम् ।
पप्रच्छ प्रयतो भूत्वा चित्तं तात किमुच्यते ।।
५७९ चित्तं निजमहंकारं विदुश्चित्तविदो जनाः ।
अन्तर्योऽयमहंभावो जन्तोस्तच्चित्तमुच्यते ।। ६पू.१११.२८
५८० मन्येऽस्य दुष्करस्त्यागो न सिद्धिमुपगच्छति ।
कथमेष किल त्यक्तुं शक्यते योगिनां वर ।। ६पू.१११.३०
५८१ अपि पुष्पावदलनादपि लोचनमीलनात् ।
सुकरोऽहंकृतेस्त्यागो न क्लेशोऽत्र मनागपि ।। ६पू.१११.३१
५८२ एकमाद्यन्तरहितं चिन्मात्रममलं ततम् ।
खादप्यतितरामच्छं विद्यते सर्ववेदनम् ।। ६पू.१११.३६
५८३ तदेव भावयन्साधुः शान्तस्तिष्ठ गतव्यथः ।
मिथ्यारूपो ह्यहंभावो लीयते तत्त्वभावनात् ।।
५८४ चिति कोऽयमहंभावःकोवा नु कथमुत्थितः।
अन्तः कोऽयमहंभावः कुतो नु कथमुत्थितः।। ६पू.१११.३८
५८५ क्वाप्सु जातो रजोराशिः क्वानलादुत्थितं जलम् ।
अयं सोऽहमिति व्यर्थं प्रत्ययं त्यज पुत्रक ।।६पू.१११.३८/३९
५८६ तुच्छं परिमिताकारं दिक्कालविवशीकृतम् ।। ६पू.१११.३९
५८७ दिक्कालाद्यनवच्छिन्नं स्वच्छं नित्योदितं ततम् ।
सर्वार्थमयमेकार्थं चिन्मात्रममलं भवान् ।। ६पू.१११.४०
५८८ इति प्राप्य परं योगमुपदेशमनुत्तमम् ।

जीवन्मुक्तो बभूवासौ ततो देवगुरोः सुतः ।। ६पू.११२.१
५८९ निर्ममो निरहंकारश्छिन्नग्रन्थिः प्रशान्तधीः।
कचो यथा स्थितो राम तथा तिष्ठाविकारवान् ।। ६पू.११२.२
५९० अहंकारमसद्विद्धि मैनमाश्रय मा त्यज्य ।
असतः शशशृङ्गस्य किल त्यागग्रहौ कुतः ।। ६पू.११२.३
५९१ द्वित्वैकत्वमतस्त्यक्त्वा शेषस्थः सुखितो भव ।
मा दुःखितो भव व्यर्थं त्वं मिथ्यापुरुषो यथा ।। ६पू.११२.८
५९२ तस्यादृश्यात्मतत्त्वस्य विस्मृत्यैव गतं स्थितिम् ।
नान्यस्मादागतं राम जगद्रज्जुभुजङ्गवत् ।। ६पू.११४.३
५९३ नानातामखिलां त्यक्त्वा शुद्धचिन्मात्रकोटरे ।
संवेद्येन विनिर्मुक्ते संवित्तत्त्वे स्थिरो भव ।। ६पू.११४.१४
५९४ स्वयमात्मात्मनैवाशु शुक्तिं संकल्पनामिकाम् ।
यदा करोति स्फुरितां स्पन्दशक्तिमिवानिलः।। ६पू.११४.१५
५९५ तदा पृथगिवाभासं संकल्पकलनामयम् ।
मनो भवति विश्वात्मा भावयन्स्वाकृतिं स्वयम् ।। ६पू.११४.१६
५९६ संकल्पमात्रमेवेदं जगदाभोगि दृश्यताम् ।
न सत्यं नच मिथ्यैव स्वप्नजालमिवोत्थितम् ।। ६पू.११४.२०
५९७ पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्वदन्व्यवहरन्स्वपन् ।
नापूर्वं विद्यते सर्वं सत्यमित्येव भावयन् ।। ६पू.११४.२५/२६
५९८ यद्यत्करोति तद्विद्धि चिन्मात्रममलं ततम् ।
ब्रह्म प्रबृंहिताकारं तस्मादन्यन्न विद्यते ।। ६पू.११४.२६/२७
५९९ पदार्थजाते सर्वस्मिन्संवित्सारतया स्थिते ।
संविदेवेदमखिलं जगन्नान्यास्ति कल्पना ।। ६पू.११४.२७/२८
६०० संभवादखिलाकारेणैकस्या एव संविदः ।
संवेद्यमपि नास्त्येव बन्धमोक्षावतः कथम् ।। ६पू.११४.२९
६०१ मोक्षोऽयमेष खलु बन्ध इति प्रसह्य
चिन्तां निरस्य सकलां विकलाभिमानः ।
मौनी वशी विगतमानमदो महात्मा
कुर्वन्स्वकार्यमनहंकृतिरेव तिष्ठ ।। ६पू.११४.३०

६०२ महाकर्ता महाभोक्ता महात्यागी भवानघ ।
सर्वाः शङ्काः परित्यज्य धैर्यमालम्ब्य शाश्वतम् ।। ६पू.११५.१
६०३ संसाररचनां नाथ तरङ्गतरलामिमाम् ।
अवलोक्य विमुह्यामि तत्त्वविश्रान्तिवर्जितः ।। ६पू.११५.७
६०४ कमन्तर्निश्चयं कान्तमुररीकृत्य सुस्थिरम् ।
अस्मिञ्जगज्जीर्णगृहे तिष्ठामि विगतज्वरः ।। ज़ ६पू.११५.८
६०५ सर्वाः शङ्काः परित्यज्य धैर्यमालम्ब्य शाश्वतम् ।
महाकर्ता महाभोक्ता महात्यागी भवानघ ।। ६पू.११५.९
६०६ धर्माधर्मौ महाभाग शङ्काविरहिताक्षयः ।
यः करोति यथप्राप्तौ महाकर्ता स उच्यते ।। ६पू.११५.११
६०७ रागद्वेषौ सुखं दुःखं धर्माधर्मौ फलाफले ।
यः करोत्यनपेक्षैव महाकर्ता स उच्यते ।। ६पू.११५.१२
६०८ मौनवान्निरहंभावो निर्मानो मुक्तमत्सरः ।
यः करोति गतोद्वेगं महाकर्ता स उच्यते ।। ६पू.११५.१३
६०९ सर्वत्र विगतस्नेहो यः साक्षिवदवस्थितः ।
निरिच्छं वर्तते कार्ये महाकर्ता स उच्यते ।। ६पू.११५.१५
६१० उद्वेगानन्दरहितः समया स्वच्छया धिया ।
न शोचति न चोदेति महाकर्ता स उच्यते ।। ६पू.११५.१६
६११ जन्मस्थितिविनाशेषु सोदयास्तमयेष्वलम् ।
सममेव मनो यस्य महाकर्ता स उच्यते ।। ६पू.११५.२०
६१२ न किंचन द्वेष्टि तथा न किंचिदभिकाङ्क्षति ।
भुङ्क्ते च प्रकृतं सर्वं महाभोक्ता स उच्यते ।। ६पू.११५.२१
६१३ सुखैर्दुःखैः क्रियायोगैर्भावाभावैर्भ्रमप्रदैः ।
भुक्तैर्न संक्षुभ्यति यो महाभोक्ता स उच्यते ।। ६पू.११५.२४
६१४ जरामरणमापच्च राज्यं दारिद्र्यमेव च ।
रम्यमित्येव यो भुङ्क्ते महाभोक्ता स उच्यते ।। ६पू.११५.२५
६१५ कट्वम्ललवणं तिक्तममृष्टं मृष्टमुत्तमम् ।
अन्धः संयाति साम्येन महाभोक्ता स उच्यते ।। ६पू.११५.२८
६१६ सरसं नीरसं चैव सुरतं विरतं तथा ।

यः पश्यति समं सौम्यो महाभोक्ता स उच्यते ।। ६पू.११५.२९
६१७ क्षीरे खण्डप्रकारे च शुभे वाप्यशुभे तथा ।
समता सुस्थिरा यस्य महाभोक्ता स उच्यते ।। ६पू.११५.३०
६१८ इदं भोज्यमभोज्यं चेत्येवं त्यक्त्वा विकल्पितम् ।
गताभिलाषं यो भुङ्क्ते महाभोक्ता स उच्यते ।। ६पू.११५.३१
६१९ आपदं संपदं मोहमानन्दमपरम्परम् ।
यो भुङ्क्ते समया बुद्ध्या महाभोक्ता स उच्यते ।। ६पू.११५.३२
६२० धर्माधर्मौ सुखं दुःखं तथा मरणजन्मनी ।
धिया येनेति संत्यक्तं महात्यागी स उच्यते ।। ६पू.११५.३३
६२१ सर्वेच्छाः सकलाः शङ्काः सर्वेहाः सर्वनिश्चयाः ।
धिया येन परित्यक्ता महात्यागी स उच्यते ।। ६पू.११५.३४
६२२ येन धर्ममधर्मं च मनो मननमीहितम् ।
सर्वमन्तः परित्यक्तं महात्यागी स उच्यते ।। ६पू.११५.३७
६२३ यावती दृश्यकलना सकलेयं विलोक्यते ।
सा येन सुष्ठु संत्यक्ता महात्यागी स उच्यते ।। ६पू.११५.३८
६२४ इत्युक्तं देवदेवेन भृङ्गीशाय पुरानघ ।
एतां दृष्टिमवष्टभ्य तिष्ठ राम गतज्वरः ।। ६पू.११५.३९
६२५ नित्योदितं विमलरूपमनन्तमाद्यं
ब्रह्मास्ति नेतरकलाकलनं हि किंचित् ।
इत्येव भावय निरञ्जनतामुपेतो
निर्वाणमेहि सकलामलशान्तवृत्तिः ।। ६पू.११५.४०
६२६ अनामयं ब्रह्म समस्तकल्प-
कार्यैकबीजं परमात्मरूपम् ।
बृहच्च तद्बृंहितसर्वभावं
खमस्तिभातीव यदङ्ग किंचित् ।। ६पू.११५.४१
६२७ अन्यत्क्वचित्किंचिदिदं कदाचि-
न्न संभवत्येव सदप्यसच्च ।
इत्येव साधो दृढनिश्चयोऽन्तः
स्थित्वा गतशङ्कविलासमास्व ।। ६पू.११५.४२

६२८ अन्तर्मुखः सन्सततं समस्तं
कुर्वन्बहिष्ठं खलु कार्यजातम् ।
न खेदमायासि कदाचिदेव
निराकृताहंकृतितामुपैषि ।। ६पू.११५.४३
६२९ कुतः सर्गोऽयमायातः स्वरूपं चास्य कीदृशम् ।
कियदेतज्जगत्कस्य कदा केनेति कथ्यते ।। ६पू.११७.६/७
६३० अहं कथं च विषमादस्मात्संसृतिविभ्रमात् ।
विमुच्येय घनास्तीर्णाज्जालादिव विहंगमः ।। ६पू.११७.७/८
६३१ यदिदं दृश्यते किंचित्तन्नास्ति नृप किंचन ।
यथा गन्धर्वनगरं यथा वारि मरुस्थले ।। ६पू.११७.९/१०
६३२ मनःषष्ठेन्द्रियातीतं यत्तु नो दृश्यते क्वचित् ।
अविनाशं तदस्तीह तत्सदात्मेति कथ्यते ।।
६३३ इयं तु सर्वदृश्याद्या राजन्सर्गपरम्परा ।
तस्मिन्नेव महादर्शे प्रतिबिम्बमुपागता ।। ६पू.११७.१२
६३४ न बन्धोऽस्ति न मोक्षोऽस्ति ब्रह्मैवास्ति निरामयम् ।
नैक्यमस्ति न च द्वित्वं संवित्सारं विजृम्भते ।। ६पू.११७.१४
६३५ एकं यथा स्फुरति वारि तरङ्गभङ्गै-
रेवं परिस्फुरति चिन्नच किंचिदेतत् ।
त्वं बन्धमोक्षकलने प्रविमुच्य दूरे
स्वस्थो भवाभवभयोऽभयसार एव ।। ६पू.११७.१५
६३६ संकल्पोन्मुखतां याताः सत्यश्चिन्मात्रसंविदः ।
आपस्तरङ्गत्वमिव यान्ति भूमिप जीवताम् ।। ६पू.११८.१
६३७ ते जीवाः संसरन्तीह संसारे पूर्वमुत्थिते ।
सुखदुःखदशामोहो मनस्येवास्ति नात्मनि ।। ६पू.११८.२
६३८ अदृश्यो दृश्यते राहुर्गृहीतेन यथेन्दुना ।
तथानुभवमात्रात्मा दृश्येनात्मावलोक्यते ।। ६पू.११८.३
६३९ न शास्त्रेणापि गुरुणा दृश्यते परमेश्वरः।
दृश्यते स्वात्मनैवात्मा स्वया सत्त्वस्थया धिया ।। ६पू.११८.४
६४० पथिकाः पथि दृश्यन्ते रागद्वेषविमुक्तया ।

यथा धिया तथैवते द्रष्टव्याः स्वेन्द्रियादयः ।। ६पू.११८.५
६४१ एतेषु नादरः कार्यः सता नैवावधीरणम् ।
पदार्थमात्रताविष्टास्तिष्ठन्त्वेते यथास्थितम् ।। ६पू.११८.६
६४२ पदार्थजातं देहादि धिया संत्यज्य दूरतः ।
आशीतलान्तःकरणो नित्यमात्ममयो भव ।। ६पू.११८.७
६४३ देहोऽहमिति या बुद्धिः सा संसारनिबन्धिनी ।
न कदाचिदियं बुद्धिरादेया हि मुमुक्षुभिः ।। ६पू.११८.८
६४४ न किंचिन्मात्रचिन्मात्ररूपोऽस्मि गगनादणुः ।
इति या शाश्वती बुद्धिः सा न संसारबन्धनी ।। ६पू.११८.९
६४५ कुचकोटरसंसुप्तं विस्मृत्य जननी सुतम् ।
यथा रोदिति पुत्रार्थं तथात्मार्थमयं जनः ।। ६पू.११८.१५
६४६ अहो नु चित्रा मायेयं तात विश्वविमोहिनी ।
सर्वाङ्गप्रोतमप्यात्मा यदात्मानं न पश्यति ।। ६पू.११९.५
६४७ चिदाकाशमयं सर्वं जगदित्येव भावयन् ।
यस्तिष्ठत्युपशान्तोऽतः स ब्रह्मकवचः सुखी ।। ६पू.११९.६
६४८ अहमर्थविमुक्तेन भावेनाभावरूपिणा ।
सर्वं शून्यं निरालम्बं चिद्रूपमिति भावयेत् ।। ६पू.११९.७
६४९ इदं रम्यमिदं नेति बीजं ते दुःखसंततेः ।
तस्मिन्साम्याग्निना दग्धे दुःखस्यावसरः कुतः ।। ६पू.११९.८
६५० शास्त्रसज्जनसंपर्कैः प्रज्ञामादौ विवर्धयेत् ।
प्रथमा भूमिकैषोक्ता योगस्यैव च योगिनः । ६पू.१२०.१
६५१ विचारणा द्वितीया स्यात्तृतीयाऽसङ्गभावना ।
विलापनी चतुर्थी स्याद्वासनाविलयात्मिका ।। ६पू.१२०.२
६५२ शुद्धसंविन्मयानन्दरूपा भवति पञ्चमी ।
अर्धसुप्तप्रबुद्धाभो जीवन्मुक्तोऽत्र तिष्ठति ।। ६पू.१२०.३
६५३ स्वसंवेदनरूपा च षष्ठी भवति भूमिका ।
आनन्दैकघनाकारा सुषुप्तसदृशस्थितिः ।। ६पू.१२०.४
६५४ तुर्यावस्थोपशान्ताथ मुक्तिरेवेह केवलम् ।
समता स्वच्छता सौम्या सप्तमी भूमिका भवेत् ।। ६पू.१२०.५

६५५ तुर्यातीता तु यावस्था परा निर्वाणरूपिणी ।
सप्तमी सा परिप्रौढा विषयः स्यान्न जीवताम् ।। ६पू.१२०.६
६५६ पूर्वावस्थात्रयं त्वत्र जाग्रदित्येव संस्थितम् ।
चर्तुर्थी स्वप्न इत्युक्ता स्वप्नाभं यत्र वै जगत् ।। ६पू.१२०.७
६५७ आनन्दैकघनीभावात्सुषुप्ताख्या तु पञ्चमी ।
असंवेदनरूपाथ षष्ठी तुर्यपदाभिधा ।। ६पू.१२०.८
६५८ तुर्यातीतपदावस्था सप्तमी भूमिकोत्तमा ।। ६पू.१२०.९
६५९ मनोवचोभिरग्राह्या स्वप्रकाशपदात्मिका ।। ६पू.१२०.९
६६० अन्तःप्रत्याहृतिवशाच्चेत्यं चेन्न विभावितम् ।
मुक्त एवास्यसंदेहो महासमतया तया ।। ६पू.१२०.१०
६६१ अविनाभावनिष्ठत्वं प्रसिद्धं सुखदुःखयोः ।
तनुवासनमर्थो यः सेव्यते वा विवासनम् ।
नासौ सुखायते नासौ नाशकाले न दुःखदः ।।६पू.१२०.१९/२०
६६२ भावनां सर्वभावेभ्यः समुत्सृज्य समुत्थितः ।
शशाङ्कशीतलः पूर्णो भाति भासेव भास्करः ।।६पू.१२०.२२/२३
६६३ सर्वैव हि कला जन्तोरनभ्यासेन नश्यति ।
एषा ज्ञानकला त्वन्तः सकृज्जाता दिने दिने ।।६पू.१२०.२४/२५
६६४ वृद्धिमेति बलादेव सुक्षेत्रव्युप्तबीजवत् ।। ६पू.१२०.२५
६६५ यावद्विषयभोगाशा जीवाख्या तावदात्मनः ।
अविवेकेन संपन्ना या साप्याशा न तु स्वतः ।। ६पू.१२१.१
६६६ विवेकवशतो याता क्षयमाशा यदा तदा ।
आत्मा जीवत्वमुत्सृज्य ब्रह्मतामेत्यनामयः ।। ६पू.१२१.२
६६७ स्वप्रकाशं स्वमात्मानमवलम्ब्याविलम्बितम् ।
आस्व संपूरिताकाशं जगन्ति नृप पश्य हे ।। ६पू.१२१.६
६६८ यदैवैवं चितो रूपं ततं बुद्धमखण्डितम् ।
तदैव तीर्णसंसारः परमेश्वरतां गतः ।। ६पू.१२१.७
६६९ ब्रह्मेन्द्रविष्णुवरुणा यद्यत्कर्तुं समुद्यताः ।
तदहं चिद्वपुः सर्वं करोमीत्येव भावयेत् ।। ६पू.१२१.८
६७० येषु येषु यदा यद्यद्दर्शनेषु निगद्यते ।

सर्वमेवाङ्ग तत्सत्यं चिद्विलासो ह्यनङ्कुशः ।। ६पू.१२१.९

६७१ चिन्मात्रत्वं प्रयातस्य तीर्णमृत्योरचेतसः ।
यो भवेत्परमानन्दः केनासावुपमीयते ।। ६पू.१२१.१०

६७२ न देशो मोक्षनामास्ति न कालो नेतरा स्थितिः ।
अहंकृतेर्विमोहस्य क्षयेणेयं विलीयते ।
प्रकृतिर्भावनानाम्नी मोक्षः स्यादेष एव सः ।। ६पू.१२१.१३

६७३ प्रशान्तशास्त्रार्थविचारचापलो
निवृत्तनानारसकाव्यकौतुकः ।
निरस्तनिःशेषविकल्पविप्लवः
समः सुखं तिष्ठति शाश्वतात्मकः ।। ६पू.१२१.१४

६७४ गम्भीरश्च प्रसन्नश्च गिराविव महाह्नदः ।
परानन्दरसाक्षुब्धो रमते स्वात्मनात्मनि ।। ६पू.१२२.४

६७५ आत्माज्ञानात्समुत्पन्नः संकल्पः कर्मकारणम् । ६पू.१२४.५

६७६ संकल्पित्वं हि बन्धस्य कारणं तत्परित्यज ।
मोक्षस्तु निःसंकल्पित्वं तदभ्यासं धिया कुरु ।। ६पू.१२४.६

६७७ सावधानो भव त्वं च ग्राह्यग्राहकसंगमे ।
अजस्रमेव संकल्पदशाः परिहरञ्शनैः ।। ६पू.१२४.७

६७८ मा भव ग्राह्यभावात्मा ग्राहकात्मा च मा भव ।
भावनामखिलां त्यक्त्वा यच्छिष्टं तन्मयो भव ।। ६पू.१२४.८

६७९ सन्तोऽतीतं न शोचन्ति भविष्यच्चिन्तयन्ति नो ।
वर्तमानं च गृह्णन्ति क्रमप्राप्तं सदानघ ।। ६पू.१२४.१३

६८० जीवस्य त्रीणि रूपाणि स्थूलसूक्ष्मपराणि तु ।
तत्रास्य यत्परं रूपं तद्भज द्वे परित्यज ।। ६पू.१२४.१७

६८१ पाणिपादमयो योऽयं देहो भोगाय वल्गति ।
भोगार्थमेतेज्जीवस्य रूपं स्थूलमिह स्थितम् ।। ६पू.१२४.१८

६८२ स्वसंकल्पमयाकारं यावत्संसारभावि यत् ।
चित्तं तद्विद्धि जीवस्य रूपं रामातिवाहिकम् ।। ६पू.१२४.१९

६८३ आद्यन्तरहितं सत्यं चिन्मात्रं निर्विकल्पकम् ।
यत्तद्विद्धि परं रूपं जीवस्याद्यं तृतीयकम् ।। ६पू.१२४.२०

६८४ एतत्तुर्यपदं शुद्धमत्र बद्धपदो भव ।

संपरित्यज्य पूर्वे द्वे मा तत्रात्ममतिर्भव ।। ६पू.१२४.२१

६८५ सिद्धान्तोऽध्यात्मशास्त्राणां सर्वापह्नव एव हि ।
नाविद्यास्तीह नो माया शान्तं ब्रह्मेदमग्रिमम् ।। ६पू.१२५.१

६८६ जाग्रत्येव सुषुप्तस्थः कुरु कर्माणि राघव ।
अन्तः सर्वपरित्यागी बहिः कुरु यथागतम् ।। ६पू.१२५.६

६८७ चित्तसत्ता परं दुःखं चित्तासत्ता परं सुखम् ।
अन्तश्चित्तं चिदेकात्मा नय क्षयमवेदनात् ।। ६पू.१२५.७

६८८ दृष्ट्वा रम्यमरम्यं वा स्थेयं पाषाणवत्समम् ।
एतावतात्मयत्नेन जिता भवति संसृतिः ।। ६पू.१२५.८

६८९ संवेदनीयं न सुखं नासुखं नैव मध्यमम् ।
एतावतात्मयत्नेन दुःखान्तोऽनन्त आप्यते ।। ६पू.१२५.९

६९० यावदस्त्विदमित्येवमियमन्तर्विजृम्भते ।
तावदुग्रा कुसंसारमहाविषविषूचिका ।। ६पू.१२६.८४/८५

६९१ एतावानेव संसार इदमस्त्विति यन्मनः ।
अस्य तूपशमो मोक्ष इत्येवं ज्ञानसंग्रहः ।। ६पू.१२६.८५/८६

६९२ मनागप्युदितैवेच्छा छेत्तव्यानर्थकारिणी ।
असंवेदनशस्त्रेण विषस्येवाङ्कुरावली ।। ६पू.१२६.८८

६९३ इच्छाविच्छुरितो जीवो विजहाति न दीनताम् ।
असंवेदनमात्रेण नोदेतीच्छाभवाङ्कुरः ।। ६पू.१२६.८९/८७

६९४ असंवेदनशस्त्रं तु तूष्णीं चित्तव्यवस्थितिः ।
प्रत्याहारः स विज्ञेयस्तेनेच्छा विनिवार्यते ।। ६पू.१२६.८९

६९५ इदं मेस्त्विति विज्ञानमाहुः कल्पनमुत्तमाः ।
अर्थस्याभावनं यत्तत्कल्पनात्याग उच्यते ।। ६पू.१२६.९१

६९६ स्मरणं विद्धि संकल्पं शिवमस्मरणं विदुः ।
तत्र प्रागनुभूतं च नानुभूतं च भाव्यते ।। ६पू.१२६.९२

६९७ अनुभूतां नानुभूतां स्मृतिं विस्मृत्य काष्ठवत् ।
सर्वमेवाशु विस्मृत्य मूढस्तिष्ठ महामतिः ।। ६पू.१२६.९३

६९८ ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति तत् ।
असंकल्पः परं श्रेयः स किमन्तर्न भाव्यते ।। ६पू.१२६.९४

६९९ किल तूष्णींस्थितेनैव तत्पदं प्राप्यते परम् ।

परमं यत्र साम्राज्यमपि राम तृणायते ।। ६उ.१.४

७०० गम्यदेशैकनिष्ठस्य यथा पान्थस्य पादयोः ।
स्पन्दो विगतसंकल्पस्तथा स्पन्दः स्वकर्मसु ।। ६उ.१.१५

७०१ बहुनात्र किमुक्तेन संक्षेपादिदमुच्यते ।
संकल्पनं परो बन्धस्तदभावो विमुक्तता ।। ६पू.१२६.९७

७०२ सर्वं जगदिदं शान्तमनन्तं ध्रुवमव्ययम् ।
पश्यन्भूतार्थचिद्रूपं शान्त आस्व यथासुखम् ।। ६पू.१२६.९८

७०३ अवेदनं विदुर्योगं शान्तमासनमुत्तमम् ।
योगस्थः कुरु कर्माणि विकर्माण्यथ मा कुरु ।। ६पू.१२६.९९

७०४ अवेदनं विदुर्योगं चित्तक्षयमकृत्रिमम् ।
अत्यन्तं तन्मयो भूत्वा तथा तिष्ठ यथासि भोः।।
६उ.१.३०/६पू.१२६.१००

७०५ अहंममेति संविदन्न दुःखतो विमुच्यसे ।
असंविदन्विमुच्यसे यदीप्सितं तदाचर ।।६उ.१.३५/६पू.१२६.१०२

७०६ शिवं सर्गगतं शान्तं बोधात्मकमजं शुभम् ।
तदेकभावनं राम कर्मत्याग इति स्मृतः ।। ६पू.१२६.१०१

७०७ महेश्वरेण यत्प्रोक्तं देव्या यच्चापि विष्णुना ।
मुनीनां नारदादीनां तदिदं ज्ञानमुत्तमम् ।।

७०८ महारामायणाख्यं यन्मोक्षोपायापराभिधम् ।
ततः क्षीरनिधिप्रख्यात्पीयूषमिदमुद्धृतम् ।।

७०९ प्रियार्थादिवियोगेन जातखेदस्य देहिनः ।
शास्त्रं विना किमत्र स्यादन्तःसंतापशान्तिदम् ।।

७१० धिया विचार्यानुपरामृश स्वयं
मयापि वेद्यं कथनीयमत्र ते ।। ६पू.१२७.१०

७११ अविद्यया प्रपञ्चोऽयं नास्ति सत्यमिहाण्वपि ।
विवेचयन्ति विबुधा विवदन्त्यविवेकिनः ।। ६पू.१२७.११

७१२ नास्ति भिन्नं चितः किंचित्किं प्रपंचेन रुद्ध्यते ।
अभ्यासेन रहस्यानां वयस्य विशदो भव ।। ६पू.१२७.१२

७१३ प्राङ्नास्ति चरमं नास्ति वस्तु सर्वमिदं सखे ।
विद्धि मध्येऽपि तन्नास्ति स्वप्नवृत्तमिदं जगत् ।। ६पू.१२७.१९

७१४ अविद्यायोनयो भेदाः सर्वेऽमी बुद्बुदा इव ।
क्षणमुद्भूय गच्छन्ति ज्ञानैकजलधौ लयम् ।। ६पू.१२७.२०

७१५ सुशीतलोदकनदीं विदित्वा प्रविगाह्यताम् ।
बहिर्भ्रान्तिनिदाघास्ते निर्यान्तु कलिताः शुचा ।। ६पू.१२७.२१

७१६ बालान्प्रति विवर्तोऽयं ब्रह्मणः सकलं जगत् ।
अविवर्तितमानन्दमास्थिताः कृतिनः सदा ।। ६पू.१२७.२८

७१७ साकारं भज तावत्त्वं यावत्सत्त्वं प्रसीदति ।
निराकारे परे तत्त्वे ततः स्थितिरकृत्रिमा ।। ६पू.१२७.३५

७१८ त्यज शोकममङ्गल्यं मङ्गलानि विचिन्तय ।
चिदानन्दघनस्वच्छमात्मानं च विभावय ।। ६पू.१२७.५७

७१९ देवद्विजगुरुप्राज्ञामरसाधुषु चेतसाम् ।
सदागमप्रमाणानां महेशानुग्रहो भवेत् ।। ६पू.१२७.५८

७२० न वैराग्यात्परं भाग्यं न संसारात्परो रिपुः ।। ६पू.१२७.५९

७२१ भज संभरिताभोगं परमेशं जगद्गुरुम् ।। ६पू.१२८.५३

७२२ इति ते वर्णितं सर्वं वसिष्ठस्योपदेशनम् ।
अनेन ज्ञानमार्गेण योगमार्गेण पुत्रक ।। ६पू.१२८.५४

७२३ भरद्वाज महाप्राज्ञ सर्वं ज्ञास्यसि निश्चितम् ।
परामर्शेन शास्त्रस्य गुरुवाक्यार्थबोधनात् ।। ६पू.१२८.५५

७२४ अभ्यासात्सर्वसिद्धिः स्यादिति वेदानुशासनम् ।
तस्मात्त्वं सर्वमुत्सृज्य कुर्वभ्यासे स्थिरं मनः ।। ६पू.१२८.५६

७२५ हे वसिष्ठ महाभाग ब्रह्मपुत्र महानसि ।
गुरुत्वं शक्तिपातेन तत्क्षणादेव दर्शितम् ।। ६पू.१२८.६०

७२६ दर्शनात्स्पर्शनाच्छब्दात्कृपया शिष्यदेहके ।
जनयेद्यः समादेशं शांभवं स हि देशिकः ।। ६पू.१२८.६१

७२७ यत् सर्वं खलु इदं ब्रह्म तज्जलानिति च स्फुटम् ।
श्रुत्या ह्युदीर्यते साम्नि तस्मै ब्रह्मात्मने नमः ।। ६उ.२१६.२५

७२८ यन्मयो यो भवत्यन्तः स तदाप्नोत्यसंशयम् ।
ब्रह्मसत्यमवाप्तुं त्वं ब्रह्मसत्यमयो भव ।। ६पू.५४.२३

७२९ न कुर्याद्भोगसंत्यागं न कुर्याद्भोगभावनम् ।
स्थातव्यं सुसमेनैव यथाप्राप्तानुवर्तिना ।। ६पू.५५.१

Supplement to योगवासिष्ठ selected verses taught after the verse 729

वृष्णिवीरं हि ददृशुस्तगा संन्यासिनो हि ते ।।

पादानतं प्रब्रुवाणा नमो नारायणेति च ।

संन्यासिनः ऊचुः

नारायणस्त्वमात्मानमात्मनासि नमस्कृतः ।।

नारायणेति हि गिरास्मान्निर्वक्तुं न पार्यते ।

यतो वाचो निवर्तन्ते स भवान् पादयोर्नतः ।।

वेदान्तवेद्यमभयं प्रत्यक्षं त्वामुपास्महे ।

द्वे रूपे वासुदेवस्य चलं चाचलमेव च ।।

चलं संन्यासिनां रूपमचलं प्रतिमादिकम् ।

प्रणवभ्यासनिरताः प्रणवोऽपि पदाम्बुजम् ।।

त्वदीयं चिन्तयत्येव सदाद्यापि न वेत्ति तत् ।

७३० भोगभावनया याति बन्धो दार्ढ्यमवस्तुज : ।
तयोपशान्तया याति बन्धो जगति तानवम् ।। २.२.४

७३१ स्वात्मतत्वाभिगमनं भवति प्रायशो नृणाम् ।
मुने विषयवैरस्यं कदर्थादुपजायते ।। २.२.६

७३२ सम्यक्पश्यति यस्तज्ज्ञो ज्ञातज्ञेयः स पण्डितः ।
न स्वदन्ते बलादेव तस्मै भोगा महात्मने ।। २.२.७

३ ज्ञेयं यावन्न विज्ञातं तावत्तावन्न जायते ।
विषयेष्वरतिर्जन्तोर्मरूभूमौ लता यथा ।। २.२.९

७३४ सौम्याम्बुत्वे तरङ्गत्वे सलिलस्याम्बुता यथा ।
समैवाब्धौ तथाऽदेहसदेहमुनिमुक्तता ।। २.४.१

७३५ सदेहा वास्त्वदेहा वा मुक्तता विषये न च ।
अनास्वादितभोगस्य कुतो भोज्यानुभूतयः ।। २.४.२

७३६ जीवन्मुक्तं मुनिश्रेष्ठं केवलं हि पदार्थवत् ।
पश्यामः पुरतो नास्य पुनर्विघ्नोऽन्तराशयम् ।। २.४.३

७३७ सदेहादेहमुक्तानां भेदः को बोधरूपिणाम् ।
यदेवाम्बुतरङ्गत्वे सौम्यत्वेऽपि तदेव तत् ।। २.४.४

७३८ न मनागपि भेदोऽस्ति सदेहादेहमुक्तयोः ।
सस्पन्दोऽप्यथवाऽस्पन्दो वायुरेव यथानिलः ।। २.४.५

७३९ सदेहा वा विदेहा वा मुक्तता न प्रमास्पदम् ।
अस्माकमपि तस्यास्ति स्वैकतास्त्यविभागिनी ।। २.४.६

७४० सर्वमेवेह हि सदा संसारे रघुनंदन ।
सम्यक्प्रयुक्तात्सर्वेण पौरूषात्समवाप्यते ।। २.४.८

७४१ प्राक्तनं चैहिकं चेति द्विविधं विध्दि पौरुषम् ।
प्राक्तनोऽद्यतनेनाशु पुरुषार्थेन जीयते ।। २.४.१७

७४२ यथा संयतते येन तथा तेनानुभूयते ।
स्वकर्मैवेति चास्तेऽन्या व्यतिरिक्ता न दैवदृक् ।। २.५.३

७४३ शुभेन पौरुषेणाशु शुभमासाद्यते फलम् ।
अशुभेनाशुभं नित्यं दैवं नाम न किंचन ।। २.५.१८

७४४ क्रमेणोपार्जितेऽप्यर्थे नष्टे कार्या न खेदिता ।
न बलं यत्र मे शक्तं तत्र का परिदेवना ।। २.६.२१

७४५ यन्न शक्नोमि तस्यार्थे यदि दुःखं करोम्यहम् ।
तदमारितमृत्योर्मे युक्तं प्रत्यहरोदनम् ।। २.६.२२

७४६ देशकालक्रियाद्रव्यवशतो विस्फुरन्त्यमी ।
सर्व एव जगद्भावा जयत्यधिकयत्नवान् ।। २.६.२३

७४७ तस्मात्पौरुषमाश्रित्य सच्छास्त्रैः सत्समागमैः ।
प्रज्ञाममलतां नीत्वा संसारजलधिं तरेत् ।। २.६.२४

७४८ यथास्थितं ब्रह्मतत्वं सत्तानियतिरुच्यते ।
सा विनेतुर्विनेतृत्वं सा विनेयविनेयता ।। २.१०.१

७४९ अतः पौरुषमाश्रित्य श्रेयसे नित्यबान्धवम् ।
एकाग्रं कुरु तच्चित्तं श्रृणु चोक्तमिदं मम ।। २.१०.२

७५० अवान्तरनिपातीनि स्वरूढानि मनोरथम् ।
पौरुषेणेन्द्रियाण्याशु संयम्य समतां नय ।। २.१०.३

७५१ निर्वाणं नाम परमं सुखं येन पुनर्जनः ।
न जायते न म्रियते तज्ज्ञानादेव लभ्यते ।। २.१०.२१

७५२ मोक्षद्वारे द्वारपालाश्चत्वारः परिकीर्तिताः ।
शमो विचारः संतोषश्चतुर्थः साधुसंगमः ।। २.११.५९

७५३ एते सेव्याः प्रयत्नेन चत्वारो द्वौ त्रयोऽथवा ।
द्वारमुध्दाटयन्त्येते मोक्षराजगृहे तथा ।। २.११.६०

७५४ कोऽहं कथमयं दोषः संसाराख्य उपागतः ।
न्यायेनेति परामर्शो विचार इति कथ्यते ।। २.१४.५०

७५५ भावाभावग्रहोत्सर्गदृशामिह हि राघव ।
न विचारादृते तत्वं ज्ञायते साधु किंचन ।। २.१४.५२

७५६ विचाराज्ज्ञायते तत्वं तत्वाद्विश्रान्तिरात्मनि
अतो मनसि शान्तत्वं सर्व दुःखपरिक्षयः ।। २.१४.५३

७५७ अप्राप्तवाञ्छामुत्सृज्य संप्राप्ते समतां गतः
अदृष्टखेदाखेदो यः स संतुष्ट इहोच्यते ।। २.१५.६

७५८ नाभिवाञ्छत्यसंप्राप्तं प्राप्तं भुङ्क्ते यथाक्रमम् ।
यः सुसौम्यसमाचारः संतुष्ट इति कथ्यते ।। २.१५.१२

७५९ विशेषेण महाबुध्दे संसारोत्तरणे नृणाम्
सर्वत्रोपकरोतीह साधुः साधुसमागमः ।। २.१६.१

७६० साधुसङ्गतरोर्जातं विवेककुसुमं सितम् ।
रक्षन्ति ये महात्मानो भाजनं ते फलश्रियः ।। २.१६.२

७६१ शून्यमाकीर्णतामेति मृतिरप्युत्सवायते ।
आपत्संपदिवाभाति विद्वज्जनसमागमे ।। २.१६.३

७६२ विवेकः परमो दीपो जायते साधुसंगमात् । २.१६.६

७६३ संतोषः साधुसङ्गश्च विचारोऽथ शमस्तथा ।
एत एव भवाम्भोधावुपायास्तरणे नृणाम् ।। २.१६.१८

७६४ संतोषः परमो लाभः सत्सङ्गः परमा गतिः ।
विचारः परमं ज्ञानं शमो हि परमं सुखम् ।। २.१६.१९

७६५ एकस्मिन्नेव वै तेषामभ्यस्ते विमलोदये ।
चत्वारोऽपि किलाभ्यस्ता भवन्ति सुधियां वर ।। २.१६.२१

७६६ अपि पौरुषमादेयं शास्त्रं चेद्युक्तिबोधकम् ।
अन्यत्वार्षमपि त्याज्यं भाव्यं न्याय्यैकसेविना ।। २.१८.२

७६७ युक्तियुक्तमुपादेयं वचनं बालकादपि ।
अन्यत्तृणमिव त्याज्यमप्युक्तं पद्मजन्मना ।। २.१८.३

७६८ अहं जगदिति प्रौढो द्रष्टृदृश्यपिशाचकः ।
पिशाचोऽर्कोदयेनेव स्वयं शाम्यत्ययत्नतः ।। २.१८ ३७

७६९ शान्तिः श्रेयः परं विद्धि तत्प्राप्तौ यत्नवान्भव
भोक्तव्यमोदनं प्राप्तं किं तत्सिद्धौ विकल्पितैः ।। २.१९.४

७७० शास्त्रोपदेशसौजन्यप्रज्ञातज्ज्ञसमागमैः ।
अन्तरान्तरसंपन्नधर्मार्थोपार्जनक्रियः ।। २.१९.८

७७१ तावद्विचारयेत्प्राज्ञो यावद्विश्रान्तिमात्मनि ।
संप्रयात्यपुनर्नाशां शान्तिं तुर्यपदाभिधाम् ।। २.१९.९

७७२ सर्वप्रमाणसत्तानां पदमब्धिरपामिव ।
प्रमाणमेकमेवेह प्रत्यक्षं तदतः शृणु ।। २.१९.१६

७७३ सर्वाक्षसारमध्यक्षं वेदनं विदुरुत्तमाः ।
नूनं तत्प्रतिपत्सिद्धं तत्प्रत्यक्षमुदाहृतम् ।। २.१९.१७

७७४ अनुभूतेर्वेदनस्य प्रतिपत्तेर्यथाभिधम् ।
प्रत्यक्षमिति नामेह कृतं जीवः स एव नः ।। २.१९.१८

७७५ स एव संवित्स पुमानहंताप्रत्ययात्मकः ।
स ययोदेती संवित्त्या सा पदार्थ इति स्मृता ।। २.१९.१९

७७६ ससंकल्पविकल्पाद्यैः कृतनानाक्रमभ्रमैः ।
जगत्तया स्फुरत्यम्बु तरङ्गादितया यथा ।। २.१९.२०

७७७ प्रागकारणमेवाशु सर्गादौ सर्गलीलया ।
स्फुरित्वा कारणं भूतं प्रत्यक्षं स्वयमात्मनि ।। २.१९.२१

७७८ कारणं त्वविचारोत्थजीवस्यासदपि स्थितम् ।
सदिवास्यां जगद्रूपं प्रकृतौ व्यक्तिमागतम् ।। २.१९.२२

७७९ स्वयमेव विचारस्तु स्वत उत्थं स्वकं वपुः ।
नाशयित्वा करोत्याशु प्रत्यक्षं परमं महत् ।। २.१९.२३

७८० विचारवान्विचारोऽपि आत्मानमवगच्छति ।
यदा तदा निरुल्लेखं परमेवावशिष्यते ।। २.१९.२४

७८१ वाग्भाभिर्ब्रह्मविद्ब्रह्म भाति स्वप्न इवात्मनि ।
यदिदंतत्स्वशब्दोत्थैर्यो यद्वेत्ति स वेत्ति तत् ।। ३.१.१

७८२ न्यायेनानेन लोकेऽस्मिन्सर्गे ब्रह्माम्बरे सति ।
किमिदं कस्य कुत्रेति चोद्यमूचे निराकृतम् ।। ३.१.२

७८३ अहं तावद्यथाज्ञानं यथावस्तु यथाक्रमम् ।
यथास्वभावं तत्सर्वं वच्मीदं श्रूयतां बुध ।। ३.१.३

७८४ भगवन्मनसो रूपं कीदृशं वद मे स्फुटम् ।
यस्मात्तेनेयमखिला तन्यते लोकमञ्जरी ।। ३.४.३७

७८५ रामास्य मनसो रुपं न किंचिदपि दृश्यते ।
नाममात्रादृते व्योम्नो यथा शून्यजडाकृतेः ।। ३.४.३८

७८६ न बाह्ये नापि हृदये सद्रूपं विद्यते मनः
सर्वत्रैव स्थितं चैतद्विध्दि राम यथा नभः ।। ३.४.३९

७८७ इदमास्मात्समुत्पन्नं मृगतृष्णाम्बुसंनिभम् ।
रुपं तु क्षणसंकल्पाद्द्वितीयेन्दुभ्रमोपमम् ।। ३.४.४०

७८८ मध्ये यदेतदर्थस्य प्रतिभानं प्रथां गतम् ।
सतो वाप्यसतो वापि तन्मनो विध्दि नेतरत् ।। ३.४.४१

७८९ यदर्थप्रतिभानं तन्मन इत्यभिधीयते ।
अन्यन्न किंचिदप्यस्ति मनो नाम कदाचन ।। ३.४.४२

७९० संकल्पनं मनो विध्दि संकल्पात्तन्न भिद्यते ।
यथा द्रवत्वात्सलिलं तथा स्पंदो यथानिलात् ।। ३.४.४३

७९१ यत्र संकल्पनं तत्र तन्मनोऽङ्ग तथा स्थितम् ।
संकल्पमनसी भिन्ने न कदाचन केचन ।। ३.४.४४

७९२ सत्यमस्त्वथवाऽसत्यं पदार्थप्रतिभासनम् ।
तावन्मात्रं मनो विद्धि तद्ब्रह्मैव पितामहः ।। ३.४.४५

७९३ अतिवाहिकदेहात्मा मन इत्यभिधीयते ।
आधिभौतिकबुद्धिं तु स आधत्ते चिरस्थितेः ।। ३.४.४६

७९४ अविद्या संसृतिश्चित्तं मनो बन्धो मलस्तमः ।
इति पर्यायनामानि दृश्यस्य विदुरुत्तमाः ।। ३.४.४७

७९५ नहि दृश्यादृते किंचिन्मनसो रूपमस्ति हि ।
दृश्यं चोत्पन्नमेवैतन्नेति वक्ष्याम्यहं पुनः ।। ३.४.४८

७९६ यथा कमलबीजान्तः स्थिता कमलवल्लरी ।
महाचित्परमाण्वन्तस्तथा दृश्यं जगत्स्थितम् ।। ३.४.४९

७९७ प्रकाशस्य यथाऽऽलोको यथा वातस्य चापलम् ।
यथा द्रवत्वं पयसि दृश्यत्वं द्रष्टरीदृशम् ।। ३.४.५०

७९८ अङ्गदत्वं यथा हेम्नि मृगनद्यां यथा जलम् ।
भित्तिर्यथा स्वप्नपुरे तथा द्रष्टरि दृश्यधीः ।। ३.४.५१

७९९ एवं द्रष्टरि दृश्यत्वमनन्यदिव यत्स्थितम् ।
तदप्युन्मार्जयाम्याशु त्वच्चित्तादर्शतो मलम् ।। ३.४.५२

८०० यद्द्रष्टुरस्यांद्रष्टृत्वं दृश्याभावे भवेद्बलात् ।
तद्विद्धि केवलीभावं तत एवासतः सतः ।। ३.४.५३

८०१ तत्तामुपगते भावे रागद्वेषादिवासनाः ।
श्याम्यन्त्यस्पन्दिते वाते स्पन्दनक्षुब्धता यथा ।। ३.४.५४

८०२ असंभवति सर्वस्मिन्दिग्भूम्याकाशरूपिणि ।
प्रकाश्ये यादृशं रूपं प्रकाशस्यामलं भवेत् ।। ३.४.५५

८०३ त्रिजगत्त्वमहं चेति दृश्येऽसत्तामुपागते ।
द्रष्टुः स्यात्केवलीभावस्तादृशो विमलात्मनः ।। ३.४.५६

८०४ अनाप्ताखिलशैलादि प्रतिबिम्बे हि यादृशी ।
स्याद्दर्पणे दर्पणता केवलात्मस्वरूपिणी ।। ३.४.५७

८०५ अहं त्वं जगदित्यादौ प्रशान्ते दृश्यसंभ्रमे ।
स्यात्तादृशी केवलता स्थिते द्रष्टर्यवीक्षणे ।। ३.४.५८

८०६ अयमाकाशभूतादिरूपोऽहं चेति लक्षितः ।
जगच्छब्दस्य नामार्थो ननु नास्त्येव कश्चन ।। ३.४.६७

८०७ यदिदं दृश्यते किंचिद्दृश्यजातं पुरोगतम् ।
परं ब्रह्मैव तत्सर्वमजरामरमव्ययम् ।। ३.४.६८

८०८ पूर्णे पूर्णं प्रसरति शान्ते शान्तं व्यवस्थितम् ।
व्योमन्येवोदितं व्योम ब्रह्मणि ब्रह्म तिष्ठति ।। ३.४.६९

८०९ न दृश्यमस्ति सद्रूपं न द्रष्टा न च दर्शनम् ।
न शून्यं न जडं नो चिच्छान्तमेवेदमाततम् ।। ३.४.७०

८१० इदमादावनुत्पन्नं सर्गादौ तेन नास्त्यलम् ।
इदं हि मनसो भाति स्वप्नादौ पत्तनं यथा ।। ३.४.७६

८११ मन एव च सर्गादावनुत्पन्नमसद्वपुः ।
तदेतच्छृणु वक्ष्यामि यथैवमनुभूयते ।। ३.४.७७

८१२ मनोदृश्यमयं दोषं तनोतीमं क्षयात्मकम् ।
असदेव सदाकारं स्वप्नः स्वप्नान्तरं यथा ।। ३.४.७८

८१३ तत्स्वयं स्वैरमेवाशु संकल्पयति देहकम् ।
तेनेयमिन्द्रजालश्रीर्वितितेन वितन्यते ।। ३.४.७९

८१४ स्फुरति वल्गति गच्छति याचते
भ्रमति मज्जति संहरति स्वयम् ।
अपरतामुपयात्यपि केवलं
चलति चञ्चलशक्तितया मनः ।। ३.४.८०

८१५ य एष देवः कथितो यस्मिञ्ज्ञाते विमुच्यते ।
वद क्वासौ स्थितो ब्रह्मन्कथमेनमहं लभे ।। ३.७.१

८१६ य एष देवः कथितो नैष दूरेऽवतिष्ठते ।
शरीरे संस्थितो नित्यं चिन्मात्रमिति विश्रुतः ।। ३.७.२

८१७ एष सर्वमिदं विश्वं न विश्वं चैष सर्वगः ।
विद्यते ह्येष एवैको न तु विश्वाभिधास्ति दृक् ।। ३.७.३

८१८ चिन्मात्रमेष शशिभृच्चिन्मात्रं गरुडेश्वरः ।
चिन्मात्रमेव तपनश्चिन्मात्रं कमलोद्भवः ।। ३.७.४

८१९ चेत्यनिर्मुक्तता या स्यादचेत्योन्मुखताथवा ।
अस्य सा भरितावस्था तां ज्ञात्वा नानुशोचति ।। ३.७.९

८२० भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ।। ३.७.१०

८२१ तस्य चेत्योन्मुखत्वं तु चेत्यासंभवनं विना ।
रोद्धुं न शक्यते दृश्यं चेत्यं शाम्यति वै कथम् ।। ३.७.११

८२२ अचेत्यचित्स्वरूपं यत्तच्चासंभवनं विना ।
क्क स्वरूपोन्मुखत्वं हि केवलं चेत्यरोधतः ।। ३.७.१२

८२३ भ्रमस्य जागतस्यास्य जातस्याकाशवर्णवत् ।
अत्यन्ताभावसंबोधे यदि रूढिरलं भवेत् ।। ३.७.२७

८२४ तज्ज्ञातं ब्रह्मणो रूपं भवेन्नान्येन कर्मणा ।
दृश्यात्यन्ताभावतस्तु ऋते नान्या शुभा गतिः ।। ३.७.२८

८२५ अत्यन्ताभावसंपत्तौ दृश्यस्यास्य यथा स्थितेः ।
शिष्यते परमार्थोऽसौ बुध्यते जायते ततः ।। ३.७.२९

८२६ न विदः प्रतिबिम्बोऽस्ति दृश्याभावादृते क्कचित् ।
क्कचिन्नाप्रतिबिम्बेन किलादर्शोऽवतिष्ठते ।। ३.७.३०

८२७ जगन्नाम्नोऽस्य दृश्यस्य स्वसत्तासंभवं विना ।
बुध्यते परमं तत्त्वं न कदाचन केनचित् ।। ३.७.३१

८२८ अथोत्पत्तिप्रकरणं मयेदं तव कथ्यते ।
यत्किलोत्पद्यते राम तेन मुक्तेन भूयते ।। ३.९.४३

८२९ इयमित्थं जगद्भ्रान्तिर्भात्यजातैव खात्मिका ।
इत्युत्पत्तिप्रकरणे कथ्यतेऽस्मिन्मयाधुना ।। ३.९.४४

८३० यदिदं दृश्यते किंचिज्जगत्स्थावरजङ्गमम् ।
सर्वं सर्वप्रकाराढ्यं ससुरासुरकिन्नरम् ।। ३.९.४५

८३१ तन्महाप्रलये प्राप्ते रुद्रादिपरिणामिनि ।
भवत्यसददृश्यात्म क्कापि याति विनश्यति ।। ३.९.४६

८३२ ततः स्तिमितगम्भीरं न तेजो न तमस्ततम् ।
अनाख्यमनभिव्यक्तं सत्किंचिदवशिष्यते ।। ३.९.४७

८३३ न शून्यं नापि चाकारं न दृश्यं न च दर्शनम् ।
न च भूतपदार्थौघो यदनन्ततया स्थितम् ।। ३.९.४८

८३४ किमप्यव्यपदेशात्म पूर्णात्पूर्णतराकृति ।
न सन्नासन्न सदसन्न भावो भवनं न च ।। ३.९.४९

८३५ चिन्मात्रं चेत्यरहितमनन्तमजरं शिवम् ।
अनादिमध्यपर्यन्तं यदनादि निरामयम् ।। ३.९.५०

८३६ यस्मिञ्जगत्प्रस्फुरति दृष्टमौक्तिकहंसवत् ।
यश्चेदं यश्च नैवेदं देवः सदसदात्मकः ।। ३.९.५१

८३७ अकर्णजिह्वानासात्वग्नेत्रः सर्वत्र सर्वदा ।
शृणोत्यास्वादयति यो जिघ्रेत्स्पृशति पश्यति ।। ३.९.५२

८३८ स एव सदसद्रूपं येनालोकेन लक्ष्यते ।
सर्गचित्रमनाद्यन्तं स्वरूपं चाप्य रञ्जनम् ।। ३.९.५३

८३९ यस्यान्यदस्ति न विभोः कारणं शशशृङ्गवत् ।
यस्येदं च जगत्कार्यं तरङ्गौध इवाम्भसः ।। ३.९.५५

८४० अनुत्कीर्णा यथा स्तम्भे संस्थिता शालभञ्जिका ।
तथा विश्वं स्थितं तत्र तेन शून्यं न तत्पदम् ।। ३.१०.७

८४१ अयमित्थं महाभोगो जगदाख्योऽवभासते ।
सत्यो भवत्वसत्यो वा यत्र तत्र त्वशून्यता ।। ३.१०.८

८४२ यथा न पुत्रिकाशून्यः स्तम्भोऽनुत्कीर्णपुत्रिकः ।
तथा भातं जगद्ब्रह्म तेन शून्यं न तत्पदम् ।। ३.१०.९

८४३ सौम्याम्भसि यथा वीचिर्न चास्ति नच नास्ति च ।
तथा जगद्ब्रह्मणीदं शून्याशून्यपदं गतम् ।। ३.१०.१०

८४४ देशकालादि शान्तत्वात्पुत्रिकारचनं द्रुमे ।
संभवत्ययथाऽतो वै तेनानन्ते विमुह्यते ।। ३.१०.११

८४५ न कदाचिदुदेतीदं परस्मान्न च शाम्यति ।
इत्थं स्थितं केवलं सद्ब्रह्म स्वात्मनि संस्थितम् ।। ३.१०.१३

८४६ जगन्तीमान्यमूर्तानि मूर्तिमन्ति मुधाग्रहात् ।
भवद्भिरवबुद्धानि हेमानीवोर्मिकाधिया ।। ३.२१.३२

८४७ हेम्न्यूर्मिकारूपधरेऽप्यूर्मिकात्वं न विद्यते ।
यथा तथा जगद्रूपे जगन्नास्ति च ब्रह्मणि ।। ३.२१.३३

८४८ जगदाकाशमेवेदं ब्रह्मैवेह तु दृश्यते ।
दृश्यते काचिदप्यत्र धूलिरम्बुनिधाविव ।। ३.२१.३४

८४९ अयं प्रपञ्चो मिथ्यैव सत्यं ब्रह्माहमद्वयम् ।
अत्र प्रमाणं वेदान्ता गुरवोऽनुभवस्तथा ।। ३.२१.३५

Supplement to page 62

Verses to be inserted between 839 - 840

८३९.१ ज्वलतः सर्वतोऽजस्त्रं चित्तस्थानेषु तिष्ठतः ।
यस्य चिन्मात्रदीपस्य भासा भाति जगत्त्रयम् ।। ३.९.५६
८३९.२ यं विनाऽर्कादयोऽप्येते प्रकाशास्तिमिरोपमाः ।
सति यस्मिन् प्रवर्त्तन्ते त्रिजगन्मृगतृष्णिकाः ।। ३.९.५७
८३९.३ सस्पन्दे समुदेतीव निःस्पन्दान्तर्गते न च ।
इयं यस्मिन् जगल्लक्ष्मीरलात इव चक्रता ।। ३.९.५८
८३९.४ जगन्निर्माणविलयविलासो व्यापको महान् ।
स्पन्दास्पन्दात्मको यस्य स्वभावो निर्मलोऽक्षयः ।। ३.९.५९
८३९.५ स्पन्दास्पन्दमयी यस्य पवनस्येव सर्वगा ।
सत्ता नाम्नैव भिन्नेव व्यवहारान्न वस्तुतः ।। ३.९.६०
८३९.६ सर्वदैव प्रबुद्धो यः सुप्तो यः सर्वदैव च ।
न सुप्तो न प्रबुद्धश्च यः सर्वत्रैव सर्वदा ।। ३.९.६१
८३९.७ यदस्पन्दं शिवं शान्तं यत्स्पन्दं त्रिजगत्स्थितिः ।
स्पन्दास्पन्दविलासात्मा य एको भरिताकृतिः ।। ३.९.६२
८३९.८ आमोद इव पुष्पेषु न नश्यति विनाशिषु ।
प्रत्यक्षस्थोऽप्यथाऽग्राह्यः शौक्ल्यं शुक्लपटे यथा ।। ३.९.६३
८३९.९ मूकोपमोऽपि योऽमूको मन्ता योऽप्युपलोपमः ।
यो भोक्ता नित्यतृप्तोऽपि कर्त्ता यश्चाऽप्यकिञ्चनः ।। ३.९.६४
८३९.१० योऽनङ्गोऽपि समस्ताङ्गः सहस्त्रकरलोचनः ।
न किञ्चित्संस्थितेनाऽपि येन व्याप्तमिदं जगत् ।। ३.९.६५
८३९.११ निरिन्द्रियबलस्याऽपि यस्याऽशेषेन्द्रियक्रियाः ।
यस्य निर्मननस्यैता मनोनिर्माणरीतयः ।। ३.९.६६
८३९.१२ यदनालोकनाद् भ्रान्तिसंसारोरगभीतयः ।
यस्मिन् दृष्टे पलायन्ते सर्वाशाः सर्वभीतयः ।। ३.९.६७
८३९.१३ साक्षिणि स्फार आभासे ध्रुवे दीप इव क्रियाः ।
सति यस्मिन् प्रवर्तन्ते चित्तेहाः स्पन्दपूर्विकाः ।। ३.९.६८
८३९.१४ यस्माद् घटपटाकारपदार्थशतपङ्क्तयः ।
तरङ्गणकल्लोलवीचयो वारिधेरिव ।। ३.९.६९

८३९.१५ स एवाऽन्यतयोदेति यत्पदार्थशतभ्रमैः ।
कटकाङ्गदकेयूरनूपुरैरिव काञ्चनम् ।। ३.९.७०
८३९.१६ यस्त्वमेकोऽवभासात्मा योऽहमेते जनाश्च ये ।
यश्च न त्वमबुद्धात्मा नाऽहं नैते जनाश्च यः ।। ३.९.७१
८३९.१७ अन्येवाऽप्यतिरिक्तेव सैवाऽसेव च भङ्गुरा ।
पयसीव तरङ्गाली यस्मात् स्फुरति दृश्यभूः ।। ३.९.७२
८३९.१८ यतः कालस्य कलना यतो दृश्यस्य दृश्यता ।
मानसी कलना येन यस्य भासा विभासनम् ।। ३.९.७३
८३९.१९ क्रियां रूपं रसं गन्धं शब्दं स्पर्शं च चेतनम् ।
यद्वेत्सि तदसौ देवो येन वेत्सि तदप्यसौ ।। ३.९.७४
८३९.२० द्रष्टृदर्शनदृश्यानां मध्ये यद्दर्शनं स्थितम् ।
साधो तदवधानेन स्वात्मानमवबुद्ध्यसे ।। ३.९.७५
८३९.२१ अजमजरमनाद्यं शाश्वतं ब्रह्म नित्यं
शिवममलममोघं वन्द्यमुच्चैरनिन्द्यम् ।
सकलकलनशून्यं कारणं कारणाना-
मनुभवनमवेद्यं वेदनं विश्वमंतः ।। ३.९.७६

८५० ब्रह्मैव पश्यति ब्रह्म नाब्रह्म ब्रह्म पश्यति ।
सर्गादिनाम्ना प्रथितः स्वभावोऽस्यैव चेदृशः ।। ३.२१.३६

८५१ न ब्रह्मजगतामस्ति कार्यकारणतोदयः ।
कारणानामभावेन सर्वेषां सहकारिणाम् ।। ३.२१.३७

८५२ यावदभ्यासयोगेन न शान्ता भेदधीस्तव ।
नूनं तावदतद्रूपा न ब्रह्म परिपश्यसि ।। ३.२१.३८

८५३ तत्र रूढिमुपायाता य इमे त्वस्मदादयः ।
अभ्यासाद्ब्रह्मसंपत्तेः पश्यामस्ते हि तत्परम् ।। ३.२१.३९

८५४ अविचारेण तरले भ्रान्तासि चिरमाकुला ।
अविचारः स्वभावोत्थः स विचाराद्विनश्यति ।। ३.२१.७०

८५५ अविचारो विचारेण निमेषादेव नश्यति ।
एषा सत्तैव तेनान्तरविद्यैषा न विद्यते ।। ३.२१.७१

८५६ तस्मान्नैवाविचारोऽस्ति नाविद्यास्ति न बन्धनम् ।
न मोक्षोऽस्ति निराबाधं शुद्धबोधमिदं जगत् ।। ३.२१.७२

८५७ अत्रोपकुरु मे ब्रूहि कोऽभ्यासः कीदृशोऽथवा ।
स कथं पोषमायाति पुष्टे तस्मिंश्च किं भवेत् ।। ३.२२.२२

८५८ यद्येन क्रियते किंचिद्येन येन यदा यदा ।
विनाभ्यासेन तन्नेह सिद्धिमेति कदाचन ।। ३.२२.२३

८५९ तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनम् ।
एतदेकपरत्वं च तदभ्यासं विदुर्बुधाः ।। ३.२२. २४

८६० ये विरक्ता महात्मानो भोगभावनतानवम् ।
भावयन्त्यभवायान्तर्भव्या भुवि जयन्ति ते ।। ३.२२.२५

८६१ उदितौदार्यसौन्दर्यवैराग्यसरञ्जिता ।
आनन्दस्पन्दिनी येषां मतिस्तेऽभ्यासिनः परे ।। ३.२२.२६

८६२ अत्यन्ताभावसंपत्तौ ज्ञातृज्ञेयस्य वस्तुनः ।
युक्त्या शास्त्रैर्यतन्ते ये ते ब्रह्माभ्यासिनः स्थिताः ।। ३.२२.२७

८६३ सर्गादावेव नोत्पन्नं दृश्यं नास्त्येव तत्सदा ।
इदं जगदहं चेति बोधाभ्यास उदाहृतः ।। ३.२२.२८

८६४ दृश्यासंभवबोधेन रागद्वेषादितानवे ।
रतिर्बलोदिता यासौ ब्रह्माभ्यास उदाहृतः ।। ३.२२.२९

८६५ दृश्यासंभवबोधेन विना द्वेषादितानवम् ।
तप इत्युच्यते तस्मान्न ज्ञानं तच्च दुःखतत् ।। ३.२२.३०

८६६ दृश्यासंभवबोधो हि ज्ञानं ज्ञेयं च कथ्यते ।
तदभ्यासेन निर्वाणमित्यभ्यासो महोदयः ।। ३.२२.३१

८६७ एतत्ते कथितं राम दृश्यदोषनिवृत्तये ।
लीलोपाख्यानमनघं घनतां जगतस्त्यज ।। ३.६०.१

८६८ शान्तैव दृश्यसत्तास्याः शमनं नोपयुज्यते ।
सतो हि मार्जनक्लेशो नासतस्तु कदाचन ।। ३.६०.२

८६९ ज्ञानेनाकाशरूपेण दृश्यं ज्ञेयस्वरूपकम् ।
इत्येकीभूतमालोक्य ज्ञस्तिष्ठत्यम्बरोपमः ।। ३.६०.३

८७० पृथ्व्यादिरहितेनेदं चिद्भासैव स्वयंभुवा ।
साधितं यदि सिध्देन ततः स्वात्मनि साधितम् ।। ३.६०.४

८७१ संविद्यथा या यतते तथा सैव व्यवस्थिता ।
विसृष्टा सृष्टिविन्नद्यां यावद्यत्नान्न रोधिता ।। ३.६०.५

८७२ चिदाकाशावभासोऽयं जगदित्यवबुध्यते ।
चिद्व्योम्न्येवात्मनि स्वच्छे परमाणुकणं प्रति ।। ३.६०.६

८७३ एवमस्या मुधाभ्रान्तेः का सत्ता केव वासना ।
का वास्था का च नियतिः कावश्यंभावितोच्यताम् ।।३.६०.७

८७४ सर्वं चैतद्यथादृष्टं स्थितमित्थमखण्डितम् ।
मायैवेयमनन्तेयं न च मायास्ति काचन ।। ३.६०.८

८७५ अहं जगदिति भ्रान्तिः परस्मात्कारणं विना ।
यथोदेति तथा ब्रह्मन्भूयः कथय साधु मे ।। ३.६१.१

८७६ समस्ताः समतैवान्ताः संविदो बुध्यते यतः ।
सर्वथा सर्वदा सर्वं सर्वात्मकमजस्ततः ।। ३.६१.२

८७७ सर्वा हि शब्दार्थदृशो ब्रह्मैवैताः पृथङ्न तत् ।
सर्वार्थशब्दार्थकलारूपमासां न विद्यते ।। ३.६१.३

८७८ कटकत्वं पृथग्धेम्नस्तरङ्गत्वं पृथग्जलात् ।
यथा न संभवत्येवं न जगत्पृथगीश्वरात् ।। ३.६१.४

८७९ एष एव जगद्रूपं जगद्रूपं तु नेश्वरे ।
हेमैव कटकादित्वं कटकत्वं न हेमनि ।। ३.६१.५

८८० यथावयविनो रूपमनेकावयवात्मकम् ।
तथाऽनवयवायास्तु चितः सर्वात्मकं च यत् ।। ३.६१.६

८८१ यत्तुल्यकालमखिलं तन्मात्रावेदनं परे ।
अन्तस्थं तदिदं भाति जगदित्यहमित्यपि ।। ३.६१.७

८८२ लेखौघानां यथा भेदसंनिवेशः शिलोदरे ।
तथानन्यज्जगदहं चेत्यन्तश्चिद्घने घनम् ।। ३.६१.८

८८३ स्थितास्तरङ्गाः सलिले यथान्तरतरङ्गिते
सृष्टिशब्दार्थरहितास्तथान्तः सृष्टयः परे ।। ३.६१.९

८८४ न सर्गे तिष्ठति परं सर्गस्तिष्ठति नो परे ।
अवयवावयविवत्सत्तानवयवैस्तयोः ।। ३.६१.१०

८८५ चिद्रूपेण स्वसंवित्त्या स्वचिन्मात्रं विभाव्यते ।
स्वमेव रूपहृदयं वातेन स्पन्दनं यथा ।। ३.६१.११

८८६ तत्कालमेष शब्दाणुश्चिच्चमत्काररूपधृक ।
चेतते खमिवैवान्तः संकल्प इव चेतसा ।। ३.६१.१२

८८७ तदेवानिलतां वेत्ति निजसत्तात्मिकां स्वयम् ।
अन्तर्गतस्पर्शरसां पवनस्पन्दतामिव ।। ३.६१.१३

८८८ तदेवाभासतामेति निजसत्तात्मिकां स्वयम् ।
कोशस्थितालोकलवां तेजः प्रगटतामिव ।। ३.६१.१४

८८९ तदेवं जलतां याति निजसत्तात्मिकां स्वयम् ।
अन्तःस्थितास्वादलवां सलिलं द्रवतामिव ।। ३.६१ १५

८९० तदेदावनितां वेत्ति स्वचित्तैकात्मतामयीम् ।
अन्तःस्थगन्धतन्मात्रामुर्वी स्थैर्यकलामिव ।। ३.६१.१६

८९१ तुल्यकालनिमेषांशलक्षभागप्रतीति यत् ।
निजं विदः प्रकचनं तत्सर्गौघपरम्परा ।। ३.६१.१७

८९२ शुद्धं सकृत्प्रभातान्तर्दृश्यमध्यमनामयम् ।
उदयास्तमयोन्मुक्तं ब्रह्म तिष्ठत्यनिष्ठितम् ।। ३.६१.१८

८९३ बुद्धं सदपवर्गं तत्ससर्गमपि सत्समम् ।
अबुद्धं सर्गरुपात्म विसर्गमपि तत्सदा ।। ३.६१.१९

८९४ चिद्ब्रह्म यद्यथा येन बुध्यते स्वात्मनात्मनि ।
तत्तत्तथा नु भवति सर्वं सर्वाङ्गशक्तिमत् ।। ३.६१.२०

८९५ तत्सत्यं चिद्विलासत्वान्नित्यानुभवरूपतः ।
तदसत्यं मनः षष्ठात्सर्वाख्या निगतं यतः ।। ३.६१.२१

८९६ जाता चेदरतिर्जन्तोर्भोगान्प्रति मनागपि ।
तदसौ तावतैवोच्चैः पदं प्राप्त इति श्रुतिः ।। ३.६१.३४

८९७ यतो यतो विरज्यते ततस्ततो विमुच्यते ।
अतोऽहमित्यसंविदन्क एति जन्मसंविदम् ।। ३.६१.३५

८९८ परस्मात्कारणादेव मनः प्रथममुत्थितम् ।
मननात्मकमाभोगि तत्स्थमेव स्थितिं गतम् ।। ३.६५.१

८९९ भावाभावलसद्दोलं तेनायमवलोक्यते ।
सर्गः सदसदाभासः पूर्वगन्ध इवेच्छया ।। ३.६५.२

९०० न कश्चिद्विद्यते भेदो द्वैतैक्यकलनात्मकः ।
ब्रह्मजीवमनोमायाकर्तृकर्मजगद्दृशाम् ।। ३.६५.३

९०१ अपारावारविस्तारसंवित्सलिलवल्गनैः ।
चिदेकार्णव एवायं स्वयमात्मा विजृम्भते ।। ३.६५.४

९०२ असत्यमस्थैर्यवशात्सत्यं संप्रतिभासतः ।
यथा स्वप्नस्तथा चित्तं जगत्सदसदात्मकम् ।। ३.६५.५

९०३ न सन्नासन्न संजातश्चेतसो जगतो भ्रमः ।
अथ धीसमवायानामिन्द्रजालमिवोत्थितः ।। ३.६५.६

९०४ दीर्घः स्वप्नः स्थितिं यातः संसाराख्यो मनोबलात् ।
असम्यग्दर्शनात्स्थाणाविव पुंस्प्रत्ययो मुधा ।। ३.६५.७

९०५ अनात्मालोकनाच्चितं चित्तत्वं नानुशोचति ।
वेतालकल्पनाद्बाल इव संकल्पिते भये ।। ३.६५.८

९०६ अनाख्यस्य स्वरूपस्य सर्वाशातिगतात्मनः ।
चेत्योन्मुखतया चित्तं चित्ताज्जीवत्वकल्पनम् ।। ३.६५.९

९०७ जीवत्वादप्यहंभावस्त्वहंभावाच्च चित्तता ।
चित्तत्वादिन्द्रियादित्वं ततो देहादिविभ्रमाः ।। ३.६५.१०

९०८ देहादिमोहतः स्वर्गनरकौ मोक्षबन्धने ।
बीजाङ्कुरवदारम्भसंरूढे देहकर्मणोः ।। ३.६५.११

९०९ द्वैतं यथा नास्ति चिदात्मजीवयो -
स्तथैव भेदोऽस्ति न जीवचित्तयोः

यथैव भेदोऽस्ति न जीवचित्तयो -
स्तथैव भेदोऽस्ति न देहकर्मणोः ।। ३.६५.१२

११० कर्मैव देहो ननु देह एव
चित्तं तदेवाहमितीह जीवः ।
स जीव एवेश्वरचित्स आत्मा
सर्वः शिवस्त्वेकपदोक्तमेतत् ।। ३.६५.१३

१११ एवमेकं परं वस्तु राम नानात्वमेत्यलम् ।
नानात्वमिव संजातं दीपाद्दीपशतं यथा ।। ३.६६.१

११२ यथाभूतमसद्रूपमात्मानं यदि पश्यति ।
विचार्यतेऽन्तस्तदनुभावहीनं न शोचति ।। ३.६६.२

११३ चित्तमात्रं नरस्तस्मिन्गते शान्तमिदं जगत् ।
उपानद्गूढपादस्य ननु चर्मास्तृतैव भूः ।। ३.६६.३

११४ पत्रमात्रादृते नान्यत्कदल्या विद्यते यथा ।
भ्रममात्रादृते नान्यज्जगतो विद्यते तथा ।। ३.६६.४

११५ यथा लीलाभ्रमाद्बालाः कुम्भकृच्चक्रवज्जगत् ।
भ्रान्तं पश्यन्ति चित्तात्तु विद्धि दृश्यं तथैव हि ।। ३.६६.९

११६ यदा चिच्चेतति द्वित्वं तदा द्वैतैक्यविभ्रमः ।
यदा न चेतति द्वैतं तदा द्वैतैक्ययोः क्षयः ।। ३.६६.१०

११७ यच्चेत्यते तदितरद्व्यतिरिक्तं चितोऽस्ति न ।
किंचिन्नास्तीति संशान्त्या चितः शाम्यति चेतनं ।। ३.६६.११

११८ चिद्घनेनैकतामेत्य यदा तिष्ठति निश्चलः ।
शाम्यन्व्यवहरन्वापि तदा संशान्त उच्यते ।। ३.६६.१२

११९ संविन्मात्रचिकित्स्येऽस्मिन्व्याधौ संसारनामनि ।
चित्तमात्रपरिस्पन्दे संरम्भो न च किंचन ।। ३.६६.१८

१२० यदि सर्वं परित्यज्य तिष्ठस्युत्क्रान्तवासनः ।
अमुनैव निमेषेण तन्मुक्तोऽसि न संशयः ।। ३.६६.१९

१२१ यथा रज्ज्वां भुजङ्गाभा विनश्यत्येव वीक्षणात् ।
संविन्मात्रविवर्तेन नश्यत्येव हि संसृतिः ।। ३.६६.२०

१२२ यत्राभिलाषस्तन्नूनं संत्यज्य स्थीयते यदि ।
प्राप्त एवाङ्ग तन्मोक्षः किमेतावति दुष्करम् ।। ३.६६.२१

१२३ अपि प्राणांस्तृणमिव जयन्तीह महाशयाः ।
यत्राभिलाषस्तन्मात्रत्यागे कृपणता कथम् ।। ३.६६.२२

१२४ यत्रभिलाषस्तत्त्यक्त्वा चेतसा निरवग्रहम् ।
प्राप्तं कर्मेन्द्रियैर्गृहणंस्त्यजन्नष्टं च तिष्ठ भोः ।। ३.६६.२३

१२५ यथा करतले बिल्वं यथा वा पर्वतः पुरः ।
प्रत्यक्षमेव तस्यालमजत्वं परमात्मनः ।। ३.६६.२४

१२६ आत्मैव भाति जगदित्युदितस्तरङ्गैः
कल्पान्त एक इव वारिधिरप्रमेयः ।
ज्ञातः स एव हि ददाति विमोक्षसिद्धिं
त्वज्ञात एव मनसे चिरबन्धनाय ।। ३.६६.२५

१२७ स्पन्दास्पन्दस्वभावं हि चिन्मात्रमिह विद्यते ।
खे वात इव तत्स्पन्दात्सोल्लासं शान्तमन्यथा ।। ३.६७.६

१२८ चित्त्वं चित्तं भावितं सत्स्पन्द इत्युच्यते बुधैः ।
दृश्यत्वभावितं चैतदस्पन्दनमिति स्मृतम् ।। ३.६७.७

१२९ स्पन्दात्स्फुरति चित्सर्गो निःस्पन्दाद्ब्रह्म शाश्वतम् ।
जीवकारणकर्माद्या चित्स्पन्दस्याभिधा स्मृता ।। ३.६७.८

१३० य एवानुभवात्मायं चित्स्पन्दोऽस्ति स एव हि ।
जीवकारणकर्माख्यो बीजमेतद्धि संसृतेः ।। ३.६७.९

१३१ यथा शून्ये दृशः स्फारान्मुक्तावल्यादिदर्शनम् ।
यथा स्वप्ने भ्रमश्चैव तथा चित्तस्य संसृतिः ।। ३.६७.२३

१३२ शुद्ध आत्मा नित्यतृप्त इव शान्तः समस्थितः ।
अपश्यन्पश्यतीवेमं चित्ताख्यं स्वप्नविभ्रमम् ।। ३.६७.२४

१३३ संसृतिर्जाग्रदित्युक्तं स्वप्नं विदुरहंकृतिम् ।
चित्तं सुषुप्तभावः स्याच्चिन्मात्रं तुर्यमुच्यते ।। ३.६७.२५

१३४ अत्यन्तशुद्धे सन्मात्रे परिणामनिरामयम् ।
तुर्यातीतं पदं तत्स्यात्तत्स्थो भूयो न शोचति ।। ३.६७.२६

१३५ तस्मिन्सर्वमुदेतीदं तस्मिन्नेव प्रलीयते ।
न चेदं न च तत्रेदं दृष्टौ मुक्तावली यथा ।। ३.६७.२७

१३६ यद्यन्निखन्यते भूमेर्यथा तत्तन्नभो भवेत् ।
या या विचार्यते विद्या तथा सा सा परं भवेत् ।। ३.६७.३४

९३७ स्फटिकान्तःसन्निवेशः स्थाणुताऽवेदनाद्यथा ।
शुद्धेऽनानापि नानेव तथा ब्रह्मोदरे जगत् ।। ३.६७.३५

९३८ मातृमेयप्रमाणादि यदा ब्रह्मैव वेदनात् ।
तदातिवाहिकोक्तीनां कः प्रसङ्गस्तदेव तत् ।। ३.६७.५७

९३९ अन्यत्ववेदनादन्यः परस्मादातिवाहिकः ।
ब्रह्मत्ववेदनाद्ब्रह्म सा संवित्तिर्हि नान्यजा ।। ३.६७.५८

९४० असंभवादसंवित्तेर्ब्रह्मात्मैकतयाथवा ।
को मोक्षः को विचारश्चेत्यलं भेदविकल्पनैः ।। ३.६७.५९

९४१ सिद्धान्तकाल एवैष प्रश्नस्ते राम राजते ।
अकालपुष्पमाला हि शोभनापि न शोभते ।। ३.६७.६०

९४२ सार्थैवानर्थिकाऽकालमाला विलसिता यथा ।
तथैवाऽकालमिज्जन्तौ सर्वं काले हि शोभते ।। ३.६७.६१

९४३ विदितपरमकारणाद्य जाता
स्वयमनुचेतनसंविदं विचार्य ।
स्वमननकलनानुसार एक -
स्त्विह हि गुरुः परमो न राघवान्यः ।। ३.७४.२८

९४४ जागतप्रत्ययाभावो यस्याहुः प्रत्ययं परम् ।
सर्वसंकल्पसंन्यासश्चेतसा यत्परिग्रहः ।। ३.८१.२

९४५ यत्संकोचविकासाभ्यां जगत्प्रलयसृष्टयः ।
निष्ठा वेदान्तवाक्यानामथ वाचामगोचरः ।। ३.८१.३

९४६ कोटिद्वयान्तरालस्थं मध्ये कोटिद्वयीमयम् ।
यस्य चित्तमयी लीला जगदेतच्चराचरम् ।। ३.८१.४

९४७ यस्य विश्वात्मकत्वेऽपि खण्ड्यते नैकपिण्डता ।
सन्मात्रं तत्त्वया भद्रे कथ्यते ब्रह्म शाश्वतम् ।। ३.८१.५

९४८ आत्मा यत्नशतप्राप्यो लब्धेऽस्मिन्न च किंचन ।
लब्धं भवति तच्चैतत्परमं वा न किंचन ।। ३.८१.९

९४९ तावज्जन्म वसन्तेषु संसृतिव्रततिश्चिरम् ।
विकसत्युदितो यावन्न बोधो मूलकाषकृत् ।। ३.८१.१०

९५० प्रतिभासमुपायाति यद्यदस्य हि चेतसः ।
तत्तत्प्रकटतामेति स्थैर्यं सफलतामपि ।। ३.९१.१७

९५१ चित्तं हि प्रतिभासात्म यच्च तत्प्रतिभासनम् ।
तदिदं भाति देहादि स्वान्तं नान्यास्ति देहदृक् ।। ३.९१.२०

९५२ चित्तमात्मचमत्कारं तच्च तत्कुरुते स्वतः ।
यथावत्संभवं स्वात्मन्येवान्तर्मरिचादिवत् ।। ३.९१.२१

९५३ तदेतच्चित्तवद्धातमातिवाहिकनामकम् ।
तदेवोदाहरन्त्येवं देहनाम्ना घनभ्रमम् ।। ३.९१.२२

९५४ कथ्यते जीवनाम्नैतच्चित्तं प्रतनुवासनम् ।
शान्तदेहचमत्कारं जीवं विद्धि क्रमात्परम् ।। ३.९१.२३

९५५ नाहं न चान्यदस्तीह चित्रं चित्तमिदं स्थितम् ।
वसिष्ठैन्दवसंविद्वदसत्सत्तामिवागतम् ।। ३.९१.२४

९५६ यथैन्दव मनो ब्रह्मा तथैवायमहं स्थितः ।
तत्कृतं चाहमेवेदं संकल्पात्मैव भासते ।। ३.९१.२५

९५७ कश्चिच्चित्तविलासोऽयं ब्रह्माहमिह संस्थितः ।
स्वभाव एव देहादि विद्धि शून्यतरात्मखात् ।। ३.९१.२६

९५८ शुद्धचित्परमार्थैकरूपिणीत्येव भावनात् ।
जीवो भूयो मनो भूत्वा वेत्तीत्थं देहतां मुधा ।। ३.९१.२७

९५९ सर्वमैन्दवसंसारवदिदं भाति चिद्वपुः ।
संपन्नसंप्रबोधात्मा स्वप्नो दीर्घः स्वशक्तिजः ।। ३.९१.२८

९६० जडचेतनभावादिशब्दार्थश्रीर्न विद्यते ।
अनिर्देश्यपदे पत्रलतादीव महामरौ ।। ३.९१.३६

९६१ चितो यच्चेत्यकलनं तन्मनस्त्वमुदाहृतम् ।
चिद्भागोऽत्राजडो भागो जाड्यमत्र हि चेत्यता ।। ३.९१.३७

९६२ चिद्भागोऽत्रावबोधांशो जडं चेत्यं हि दृश्यते ।
इति जीवो जगद्भ्रान्तिं पश्यन्गच्छति लोलताम् ।। ३.९१.३८

९६३ चित्तस्थ एव भावोऽसौ शुद्ध एव द्विधा कृतः ।
अतः सर्वं जगत्सैव द्वैतलब्धं च सैव तत् ।। ३.९१.३९

९६४ स्वमेवान्यतया दृष्ट्वा चितिर्दृश्यतया वपुः ।
निर्भागाप्येकभागाभं भ्रमतीव भ्रमातुरा ।। ३.९१.४०

९६५ न भ्रान्तिरस्ति भ्रमभाङ्गा नैवेतीह निश्चयः ।
परिपूर्णार्णवप्रख्यावेतीत्थं संस्थिता चितिः ।। ३.९१.४१

९६६ अहंतादिपरे तत्वे मनागपि न विद्यते ।
ऊर्म्यादीव पृथक्तोये संवित्सारं हि तद्यतः ।। ३.९१.४३

९६७ अहंप्रत्ययसंदृश्यं चेत्यं विद्धि समुत्थितम् ।
मृगतृष्णाम्बिवान्तस्थं नूनं विद्यत एव नो ।। ३.९१.४४

९६८ अहंतापदमन्तात्मपदं विद्धि निरामयम् ।
विदं विदुरहंतादि शैत्यमेव यथा हिमम् ।। ३.९१.४५

९६९ चित्तेव चेत्यते जाड्यं स्वप्ने स्वमरणोपमम् ।
सर्वात्मत्वात्सर्वशक्तीः कुर्वती नैति साम्यताम् ।। ३.९१.४६

९७० मनः पदार्थादितया सर्वरूपं विजृम्भते ।
नानात्माचित्तदेहोऽयमाकाशविशदाकृतिः ।। ३.९१ ४७

९७१ देहादिदेहप्रतिभारूपात्म्यं त्यजता सता ।
विचार्य प्रतिभासात्म चित्तं चित्तेन वै स्वयम् ।। ३.९१.४८

९७२ चित्तताम्रे शोधिते हि परमार्थसुवर्णताम् ।
गतेऽकृत्रिम आनन्दः किं देहोपलखण्डकैः ।। ३.९१.४९

९७३ अभिन्नौ कर्मकर्तारौ सममेव परात्पदात् ।
स्वयं प्रकटतां यातौ पुष्पामोदौ तरोरिव ।। ३.९५.१

९७४ सर्वसंकल्पनामुक्ते जीवा ब्रह्मणि निर्मले ।
स्फुरन्ति वितते व्योम्नि नीलिमेवाज्ञचक्षुषः ।। ३.९५.२

९७५ अप्रबुद्धजनाचारो यत्र राघव दृश्यते ।
तत्र ब्रह्मण उत्पन्ना जीवा इत्युक्तयः स्थिताः ।। ३.९५.३

९७६ संप्रबुद्धजनाचारे वक्तुमेतन्न शोभनम् ।
यद्ब्रह्मण इदं जातं न जातं चेति राघव ।। ३.९५.४

९७७ काचिद्वा कलना यावन्न नीता राघव प्रथाम् ।
उपदेश्योपदेशश्रीस्तावल्लोके न शोभते ।। ३.९५.५

९७८ मनो हि भावनामात्रं भावना स्पन्दधर्मिणी ।
क्रिया तद्भावितारूपं फलं सर्वोऽनुधावति ।। ३.९६.१

९७९ अनन्तस्यात्मतत्त्वस्य सर्वशक्तेर्महात्मनः ।
संकल्पशक्ति रचितं यद्रूपं तन्मनो विदुः ।। ३.९६.३

९८० भावः सदसतोर्मध्ये नृणां चलति यश्चलः ।
कलनोन्मुखतां यातस्तद्रूपं मनसो विदुः ।। ३.९६.४

९८१ नाहं वेदावभासात्मा कुर्वाणोऽस्मीति निश्चयः ।
तस्मादेकान्तकलनस्तद्रूपं मनसो विदुः ।। ३.९६.५

९८२ कल्पनात्मिकया कर्मशक्त्या विरहितं मनः ।
न संभवति लोकेऽस्मिन्गुणहीनो गुणी यथा ।। ३.९६.६

९८३ यथा वह्न्यौष्ण्ययोः सत्ता न संभवति भिन्नयोः ।
तथैव कर्ममनसोस्तथात्ममनसोरपि ।। ३.९६.७

९८४ ब्रह्मन्मनस एवेदमन्तश्चाडम्बरं सृतम् ।
यतस्तदेव कर्मेति वाक्यार्थादुपलभ्यते ।। ३.९७.१

९८५ दृढभावोपरक्तेन मनसैवोररीकृतम् ।
मरुचण्डातपेनेव भास्वरावरणं पुनः ।। ३.९७.२

९८६ ब्रह्मात्मनि जगत्यस्मिन्मन एकाकृतिं गतम् ।
क्वचिन्नरतया रूढं क्वचित्सुरतयोत्थितम् ।। ३.९७.३

९८७ नानाचारनभोभागपुरपत्तनरूपया ।
मन्ये विततयाकृत्या मन एव विजृम्भते ।। ३.९७.५

९८८ तेनेदं सर्वमाभोगि जगदित्याकुलं ततम् ।
मन्ये तद्व्यतिरेकेण परमात्मैव शिष्यते ।। ३.९७.७

९८९ आत्मा सर्वपदातीतः सर्वगः सर्वसंश्रयः ।
तत्प्रसादेन संसारे मनो धावति वल्गति ।। ३.९७.८

९९० मनो मन्ये मनः कर्म तच्छरीरेषु कारणम् ।
जायते म्रियते तद्धि नात्मनीदृग्विधा गुणाः ।। ३.९७.९

९९१ मन एव विचारेण मन्ये विलयमेष्यति ।
मनोविलयमात्रेण ततः श्रेयो भविष्यति ।। ३.९७.१०

९९२ मनोनाम्नि परिक्षीणे कर्मण्याहितसंभ्रमे ।
मुक्त इत्युच्यते जन्तुः पुनर्नाम न जायते ।। ३.९७.११

९९३ भगवन्भवता प्रोक्ता जातयस्त्रिविधा नृणाम् ।
प्रथमं कारणं तासां मनः सदसदात्मकम् ।। ३.९७.१२

९९४ तत्कथं शुद्धचिन्नाम्नस्तत्त्वाद्बुद्धिविवर्जितात् ।
उत्थितं स्फारतां यातं जगच्चित्रकरं मनः ।। ३.९७.१३

९९५ आकाशा हि त्रयो राम विद्यन्ते विततान्तराः ।
चित्ताकाशश्चिदाकाशो भूताकाशस्तृतीयकः ।। ३.९७.१४

९९६ एते हि सर्वसामान्याः सर्वत्रैव व्यवस्थिताः ।
शुद्धचित्तत्वशक्त्या तु लब्धसत्तात्मतां गताः ।। ३.९७.१५

९९७ सबाह्याभ्यन्तरस्थो यः सत्तासत्तावबोधकः ।
व्यापी समस्तभूतानां चिदाकाशः स उच्यते ।। ३.९७.१६

९९८ सर्वभूतहितः श्रेष्ठो यः कालकलनात्मकः ।
येनेदमाततं सर्वं चित्ताकाशः स उच्यते ।। ३.९७.१७

९९९ दशदिङ्मण्डलाभोगैरव्युच्छिन्नवपुर्हि यः ।
भूतात्मासौ य आकाशः पवनाब्दादिसंश्रयः ।। ३.९७.१८

१००० आकाशचित्ताकाशौ द्वौ चिदाकाशबलोद्भवौ ।
चित्कारणं हि सर्वस्य कार्यौघस्य दिनं यथा ।। ३.९७.१९

१००१ जडोऽस्मि न जडोऽस्मीति निश्चयो मलिनश्चितः ।
यस्तदेव मनो विद्धि तेनाकाशादि भाव्यते ।। ३.९७.२०

१००२ अप्रबुद्धात्मविषयमाकाशत्रयकल्पनम् ।
कल्प्यते उपदेशार्थं प्रबुद्धविषयं न तु ।। ३.९७.२१

१००३ एकमेव परं ब्रह्म सर्वं सर्वावपूरकम् ।
प्रबुद्धविषयं नित्यं कलाकलनवर्जितम् ।। ३.९७.२२

१००४ द्वैताद्वैतसमुद्भेदैर्वाक्यसंदर्भगर्भितैः ।
उपदेश्यत एवाज्ञो न प्रबुद्धः कथंचन ।। ३.९७.२३

१००५ यावद्रामाप्रबुद्धस्त्वमाकाशत्रयकल्पना ।
तावदेवावबोधार्थं मया त्वमुपदिश्यसे ।। ३.९७.२४

१००६ आकाशचित्ताकाशाद्याश्चिदाकाशकलङ्कितात् ।
प्रसूता दावदहनाद्यथा मरुमरीचयः ।। ३.९७.२५

१००७ चिनोति मलिनं रूपं चित्ततां समुपागतम् ।
त्रिजगन्तिन्द्रजालानि रचयत्याकुलात्मकम् ।। ३.९७.२६

१००८ चित्तत्वमस्य मलिनस्य चिदात्मकस्य
तत्त्वस्य दृश्यत इदं ननु बोधहीनैः ।
शुक्तौ यथा रजतता ननु बोधवद्भि -
मौर्ख्येण बन्ध इह बोधबलेन मोक्षः ।। ३.९७.२७

१००९ यतःकुतश्चिदुत्पन्नं चित्तं यत्किंचिदेव हि ।
नित्यमात्मविमोक्षाय योजयेद्यत्नतोऽनघ ।। ३.९८.१

१०१० संयोजितं परे चित्तं शुद्धं निर्वासनं भवेत् ।
ततस्तु कल्पनाशून्यमात्मतां याति राघव ।। ३.९८.२

१०११ चित्तायत्तमिदं सर्वं जगत्स्थिरचरात्मकम् ।
चित्ताधीनवतो राम बन्धमोक्षावपि स्फुटम् ।। ३.९८.३

१०१२ चित्तमेतदुपायातं ब्रह्मणः परमात्पदात् ।
अतन्मयं तन्मयं च तरङ्ग सागरादिव ।। ३.१००.१

१०१३ प्रबुद्धानां मनो राम ब्रह्मैवेह हि नेतरत् ।
जलसामान्यबुद्धीनामब्धेर्नान्यस्तरङ्गकः ।। ३.१००.२

१०१४ मनो रामाप्रबुद्धानां संसारभ्रमकारणम् ।
अपश्यतोऽम्बुसामान्यमन्यताम्बुतरङ्गयोः ।। ३.१००.३

१०१५ अप्रबुद्धदृशां पक्षे तत्प्रबोधाय केवलम् ।
वाच्यवाचकसंबन्धकृतो भेदः प्रकल्प्यते ।। ३.१००.४

१०१६ सर्वशक्ति परं ब्रह्म नित्यमापूर्णमव्ययम् ।
न तदस्ति न तस्मिन्यद्विद्यते विततात्मनि ।। ३.१००.५

१०१७ नित्यासंभवबन्धस्य बद्धोऽस्मीति कुकल्पना ।
यस्य काल्पनिकस्तस्य मोक्षो मिथ्या न तत्त्वतः ।। ३.१००.३७

१०१८ लब्धप्रतिष्ठं परमात्पदादुल्लसितं मनः ।
निमेषेणैव संसारान्करोति न करोति च ।। ३.१०३.४

१०१९ यदिदं दृश्यते किंचिज्जगत्स्थास्नु चरिष्णु च ।
सर्वं सर्वप्रकाराढ्यं चित्तादेतदुपागतम् ।। ३.१०३.५

१०२० देशकालक्रियाद्रव्यशक्तिपर्याकुलीकृतम् ।
भावाद्भावान्तरं याति लोलत्वान्नटवन्मनः ।। ३.१०३.६

१०२१ सदसत्तां नयत्याशु सत्तां वा सन्नयत्यलम् ।
तादृशान्येव चादत्ते सुखदुःखानि भावितम् ।। ३.१०३.७

१०२२ यदाप्तं स्वयमादत्ते यथैव चञ्चलं मनः ।
हस्तपादादिसंघातस्तदा प्रयतते तथा ।। ३.१०३.८

१०२३ मनोरथे तथा स्वप्ने संकल्पकलनासु च ।
गोष्पदं योजनव्यूहः स्वासु लीलासु चेतसः ।। ३.१०३.१३

१०२४ कल्पं क्षणीकरोत्यन्तः क्षणं नयति कल्पताम् ।
मनस्तदायत्तमतो देशकालक्रमं विदुः ।। ३.१०३.१४

१०२५ सकर्तृकर्मकरणं यदिदं चेत्यमागतम् ।
द्रष्टृदर्शनदृश्याढ्यं तत्सर्वं चित्तमेव च ।। ३.१०३.१८

१०२६ सुरपत्तननिर्माणमसत्सदिव पश्यति ।
वासनावलितं चेतः स्वप्नवज्जाग्रदेव हि ।। ३.११०.९

१०२७ येन च्छिन्ना विचारेण जीवस्य ज्ञेयवासना ।
निरभ्रस्येव सूर्यस्य तस्यालोको विराजते ।। ३.११०.१२

१०२८ अतस्त्वं मन एवेदं नरं विद्धि न देहकम् ।
जडो देहो मनश्चात्र न जडं नाजडं विदुः ।। ३.११०.१३

१०२९ मनोमात्रं जगत्कृत्स्नं मनः पर्यन्तमण्डलम् ।
मनो व्योम मनो भूमिर्मनो वायुर्मनो महान् ।। ३.११०.१५

१०३० मनो यदि पदार्थे तु तद्भावेन न योजयेत् ।
ततः सूर्योदयेऽप्येते न प्रकाशाः कदाचन ।। ३.११०.१६

१०३१ जिते मनसि सर्वैव विजिता चेन्द्रियावलिः ।
शीर्यते च यथा तन्तौ दग्धे मौक्तिकमालिका ।। ३.११०.२५

१०३२ अमृष्टसर्वभावानामलमात्मचमत्कृतिम् ।
मनः स्वाभिमताकारं रूपं सृजति वस्तुषु ।। ३.११०.३०

१०३३ स्वेनैव पौरूषेणाशु स्वसंवेदनरूपिणा ।
यत्नेन चित्तवेतालस्त्यक्त्वेष्टं वस्तु जीयते ।। ३.१११.२

१०३४ शास्त्रसत्सङ्गधीरेण चिन्तातप्तमतापिना ।
छिन्धि त्वमायसेनायो मनसैव मनो मुने ।। ३.१११.५

१०३५ पौरुषेण प्रयत्नेन चित्तमाश्वेव जीयते ।
अचित्तेनाप्रयत्नेन पदं ब्रह्मणि दीयते ।। ३.१११.१०

१०३६ ईप्सितावेदनाख्यात्तु मनःप्रशमनादृते ।
गुरुपदेशशास्त्रार्थमन्त्राद्या युक्तयस्तृणम् ।। ३.१११.१४

१०३७ नूनं दैवमनादृत्य मूढसंकल्पकल्पितम् ।
पुरुषार्थेन संवित्त्या नय चित्तमचित्तताम् ।। ३.१११.१७

१०३८ पुमान्मृतोऽस्मि जातोऽस्मि जीवामीति कुदृष्टयः ।
चेतसो वृत्तयो भान्ति चपलस्यासदुत्थिताः ।। ३.१११.२५

१०३९ न कश्चनेह म्रियते जायते न च कश्चन ।
स्वयं वेत्ति मृतं स्वस्य लोकमन्यं स्वकं मनः ।। ३.१११.२६

१०४० इतो याति परं लोकं स्फुरत्यन्यतया मनः ।
तत्तस्यैत्येतदामोक्षमतो मृतिभयं कुतः ।। ३.१११.२७

१०४१ इहलोकेन विचरत्विहलोके परत्र च ।
चित्तमामोक्षमास्तेऽस्य रूपमन्यन्न विद्यते ।। ३.१११.२८

१०४२ सति पथ्ये तते शुभ्रे चित्तोपशमनादृते ।
तिर्यगूर्ध्वमधस्ताच्च भूयोभूयो विचारितम् ।। ३.१११.३०

१०४३ यावन्नास्ति किलोपायश्चित्तोपशमनादृते ।
ऋते तथ्ये तते शुभ्रे बोधे हृद्युदिते सति ।
मनोविलयमात्रेण विश्रान्तिरुपजायते ।। ३.१११.३१

१०४४ तत्रेदंप्रथमया मनःकल्पनया देहीति सा ब्रह्म -
रूपिणी संकल्पमयी भूत्वा यदेव संकल्पयति
तदेव पश्यति तेनेदं भुवनाडम्बरं कल्प्यते ।। ३.११६.१३

१०४५ तत्र जननमरणसुखदुःखमोहादिकं संसरणं
कल्पयन्ती कल्पानुरचना बहुनाममन्थरं स्थित्वा
स्वयं विलीयते हिमकणिकेवातपगता ।। ३.११६.१४

१०४६ परे शान्ते परं नाम स्थितमित्थमिदंतया ।
नेह सर्गो न सर्गाख्या काचिदस्ति कदाचन ।। ३.११९.२५

१०४७ ईषद्विदः स्वयं चित्त्वाच्चेत्यतामिव गच्छति ।
बुद्ध्यते सर्ग इत्येव समास्थास्यति शाश्वतम् ।। ३.११९.२९

१०४८ चित्तात्सर्गसमापत्तिरचित्तात्सर्गसंक्षयः ।
परे परमसंशान्ते हेम्नीव कटकभ्रमः ।। ३.११९.३१

१०४९ सन्नेव सर्गो सत्यत्वमेति चित्तशमोदये ।
असत्सत्तामवाप्नोति स्वतः संवेदनोदये ।। ३.११९.३२

१०५० संवेदनमहंतावत्सर्गसंभ्रमसंभ्रमः ।
असंवेदनमाशान्तं परं विद्धि न तज्जडम् ।। ३.११९.३३

१०५१ शास्त्रसंव्यवहारार्थं तस्यास्य वितताकृतेः ।
चिद्ब्रह्मात्मेति नामानि कल्पितानि कृतात्मभिः ।।३.१२२.३५

१०५२ अत्यन्ताभाव एवास्य भावैर्यदुपशाम्यति ।
न शाम्यत्येव सचित्ते क्व शाम्यत्येव दृश्यता ।। ४.२.११

१०५३ अत्यन्ताभाव एवातो जगद्दृश्यस्य सर्वथा ।
वर्जयित्वेतरा युक्तिर्नास्त्येवानर्थसंक्षये ।। ४.२.१२

१०५४ चिदाकाशस्य बोधोऽयं जगद्धातीति यत्स्थितम् ।
अयं सोऽहमिदं नाहं लोके चित्रकथा यथा ।। ४.२.१३

१०५५ इन्द्रियग्रामसंग्रामसेतुना भवसागरः ।
तीर्यते नेतरेणेह केनचिन्नाम कर्मणा ।। ४.४.१

१०५६ शास्त्रसत्संगमाभ्यासात्सविवेको जितेन्द्रियः ।
अत्यन्ताभावमेतस्य दृश्यस्याप्यवगच्छति ।। ४.४.२

१०५७ बहुनात्र किमुक्तेन मनःकर्मद्रुमाङ्कुरः ।
तस्मिंश्छिन्ने जगच्छाखी छिन्नः कर्मतनुर्भवेत् ।। ४.४.४

१०५८ दृश्यात्यन्तासंभवेन ऋते न्यान्येन हेतुना ।
मनःपिशाचः प्रशमं याति कल्पशतैरपि ।। ४.४.७

१०५९ एतच्च संभवत्येव मनोव्याधिचिकित्सिते ।
दृश्यात्यन्तासंभवात्म परमौषधमुत्तमम् ।। ४.४.८

१०६० मनो मोहमुपादत्ते म्रियते जायते मनः ।
तत्स्वचिन्ताप्रसादेन बध्यते मुच्यते पुनः ।। ४.४.९

१०६१ मनो जगज्जगदखिलं तथा मनः
परस्परं त्वविरहिते सदैव हि ।
तयोर्द्वयोर्मनसि निरन्तरं क्षिते
क्षितं जगन्नतु जगति क्षिते मनः ।। ४.४.१५

१०६२ न मोक्षो मोक्ष ईशस्य न बन्धो बन्ध आत्मनः ।
बन्धमोक्षदृशौ लोके न जाने प्रोत्थिते कुतः ।। ४.११.६२

१०६३ नास्ति बन्धो न मोक्षोऽस्ति तन्मयस्त्विव लक्ष्यते ।
ग्रस्तं नित्यमनित्येन मायामयमहो जगत् ।। ४.११.६३

१०६४ यदैव चित्तं कलितं किलानेनाकलात्मना ।
कोशकारवदात्मायमनेनावलितस्तदा ।। ४.११.६४

१०६५ बहुसुखदुःखकराकराक्षयेयं
परमपदास्मरणात्समागतेह ।
परमपदावगमात्प्रयाति नाशं
विहगपतिस्मरणाद्द्विषव्यथेव ।। ४.१२.१६

१०६६ लोके प्रबुध्यमानानां भूतानामात्मसिद्धये ।
विहरन्तीह शास्त्राणि कल्पितान्युदितात्मभिः ।। ४.१३.४

१०६७ संप्रबुद्धाशया ये तु दुष्कृतानां परिक्षये ।
तेषां शास्त्रविचारेषु निर्मला धीः प्रवर्तते ।। ४.१३.५

१०६८ विलीयते मनोमोहः सच्छास्त्रप्रविचारणात् ।
नभोविहरणाद्भानोः शार्वरं तिमिरं यथा ।। ४.१३.६

१०६९ नास्तमेति नचोदेति जगत्किंचन कस्यचित् ।
भ्रान्तिमात्रमिदं मायामुग्धेव परिजृम्भते ।। ४.१७.८

१०७० दृश्यबुद्धिपरावृत्तौ सममेतदनन्तरम् ।
हेम्नीव कटकादित्वं परिज्ञातं विनश्यति ।। ४.१८.६३

१०७१ विचारो यस्य नोदेति कोऽहं किमिदमित्यलम् ।
तस्यान्तर्न विमुक्तोऽसौ दीर्घो जीवज्वरभ्रमः ।। ४.१८.६४

१०७२ विचारः सफलस्तस्य विज्ञेयो यस्य सन्मतेः ।
दिनानुदिनमायाति तानवं भोगगृध्नुता ।। ४.१८.६५

१०७३ यथा देहोपयुक्तं हि करोत्यारोग्यमौषधम् ।
तथेन्द्रियजयेऽभ्यस्ते विवेकः फलितो भवेत् ।। ४.१८.६६

१०७४ विवेकोऽस्ति वचस्येव चित्रेऽग्निरिव भास्वरः ।
यस्य तेनापरित्यक्ता दुःखायैवाविवेकिता ।। ४.१८.६७

१०७५ यथा स्पर्शेन पवनः सत्तामायाति नो गिरा ।
तथेच्छातानवेनैव विवेकोऽस्य विबुध्यते ।। ४.१८.६८

१०७६ चित्रामृतं नामृतमेव विद्धि
चित्रानलं नानलमेव विद्धि ।
चित्राङ्गना नूनमनङ्गनेति
वाचा विवेकस्त्वविवेक एव ।। ४.१८.६९

१०७७ पूर्वं विवेकेन तनुत्वमेति
रागोऽथ वैरं च समूलमेव ।
पश्चात्परिक्षीयत एव यत्नः
स पावनो यत्र विवेकितास्ति ।। ४.१८.७०

१०७८ स्थिरप्रत्ययुक्तं यत्तज्जाग्रदिति कथ्यते ।
अस्थिरप्रत्ययं यत्स्यात्तत्स्वप्नः समुदाहृतः ।। ४.१९.९

१०७९ जाग्रत्त्वे क्षणदृष्टः स्यात्स्वप्नः कालान्तरे स्थितः ।
तज्जाग्रत्स्वप्नतामेति स्वप्नो जाग्रत्त्वमृच्छति ।। ४.१९.१०

१०८० जाग्रत्स्वप्नदशाभेदो न स्थिरास्थिरते विना ।
समः सदैव सर्वत्र समस्तोऽनुभवोऽनयोः ।। ४.१९.११

१०८१ स्वप्नोऽपि स्वप्नसमये स्थैर्याज्जाग्रत्त्वमृच्छति ।
अस्थैर्याज्जाग्रदेवास्ते स्वप्नस्तादृशबोधतः ।। ४.१९.१२

१०८२ स्वप्नोऽपि जाग्रद्बुद्ध्यंशो जाग्रत्त्वमनुगच्छति ।
स्वप्नता स्वप्नबुद्ध्या तु यथासंवेदनं स्थिरम् ।। ४.१९.१३

१०८३ दृढनिश्चयवच्चेतो यद्भावयति भूरिशः ।
तत्तां यात्यनलाश्लेषादयःपिण्डोऽग्नितामिव ।। ४.२०.२

१०८४ भावाभावग्रहोत्सर्गदृशश्चेतनकल्पिताः ।
नासत्या नापि सत्यास्ता मनश्चापलकारिताः ।। ४.२०.३

१०८५ मनो मोहे तु कर्तृ स्यात्कारणं च जगत्स्थितेः ।
विश्वरूपतयैवेदं तनोति मलिनं मनः ।। ४.२०.४

१०८६ मनो हि पुरुषो नाम तं नियोज्य शुभे पथि ।
तज्जयैकान्तसाध्या हि सर्वा जगति भूतयः ।। ४.२०.५

१०८७ दिक्कालाद्यनवच्छिन्ने तते नित्ये निरामये ।
म्लाना संविन्मनोनाम्नी कुतः केयमुपस्थिता ।। ४.२१.२

१०८८ यस्मादन्यन्न नामास्ति न भूतं न भविष्यति ।
कुतः कीदृक्कथं तत्र कलङ्कस्तस्य विद्यते ।। ४.२१.३

१०८९ प्रश्नस्यास्य तु हे राम न कालस्तव संप्रति ।
सिद्धांतः कथ्यते यत्र तत्रायं प्रश्न उच्यते ।। ४.२१.६

१०९० सिद्धान्तकाले प्रश्नोक्तिरेषा तव विराजते ।
प्रावृषीव हि केकोक्तिर्युक्ता शरदि हंसगीः ।। ४.२१.८

१०९१ एवं प्रकृतिरूपेयं मनोमननधर्मिणी ।
कर्मेति राम निर्णीतं सर्वैरेव मुमुक्षुभिः ।। ४.२१.११

१०९२ श्रुणु दर्शनभेदेन तन्नामाभिमताकृतिम् ।
वाग्मिनां वदतां यातं चित्राभिः शास्त्रदृष्टिभिः ।। ४.२१.१२

१०९३ यं यं भावमुपादत्ते मनो मननचञ्चलम् ।
तत्तामेति घनामोदमन्तःस्थः पवनो यथा ।। ४.२१.१३

१०९४ यस्त्वकृत्रिम आनन्दस्तदर्थं प्रयतैर्नरैः ।
मनस्तन्मयतां नेयं येनासौ समवाप्यते ।। ४.२१.३४

१०९५ अपवित्रमसद्रूपं मोहनं भयकारणम् ।
दृश्यमाभासमाभोगि बन्धमाभावयानघ ।। ४.२१.३६

१०९६ मायैषा सा ह्यविद्यैषा भावनैषा भयावहा ।
संविदस्तन्मयत्वं यत्तत्कर्मेति विदुर्बुधाः ।। ४.२१.३७

१०९७ दृष्ट्वा दृश्यैकतानत्वं विद्धि त्वं मोहनं मनः ।
प्रमार्जयैव तन्मिथ्या महामलिनकर्दमम् ।। ४.२१.३८

१०९८ दृश्यतन्मयता यैषा स्वभावस्थानुभूयते ।
संसारमदिरा सेयमविद्येत्युच्यते बुधैः ।। ४.२१.३९

१०९९ स्वयमुत्पद्यते सा च संकल्पाद्व्योमवृक्षवत् ।
असंकल्पनमात्रेण भावनायां महामते ।। ४.२१.४१

११०० क्षीणायां स्वरसादेव विमर्शेन विलासिना ।
असंसङ्गः पदार्थेषु सर्वेषु स्थिरतां गतः ।। ४.२१.४२

११०१ सत्यदृष्टौ प्रपन्नायामसत्ये क्षयमागते ।
निर्विकल्पचिदच्छात्मा स आत्मा समवाप्यते ।। ४.२१.४३

११०२ न सत्ता यस्य नासत्ता न सुखं नापि दुःखिता ।
केवलं केवलीभावो यस्यान्तरुपलभ्यते ।। ४.२१.४४

११०३ विचारणा परिज्ञातस्वभावस्योदितात्मनः ।
अनुकम्प्या भवन्तीह ब्रह्मविष्णिवन्द्रशंकराः ।। ४.२२.१६

११०४ मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ।
चित्तं तु नाहमेवेति यः पश्यति स पश्यति ।। ४.२२.३१

११०५ यन्नाम किंचित्त्रैलोक्यं स एवावयवो मम ।
तरङ्गोऽब्धाविवेत्यन्तर्यः पश्यति स पश्यति ।। ४.२२.३३

११०६ शोच्या पाल्या मयैवेयं स्वसेयं मे कनीयसी ।
त्रिलोकी पेलवेत्युच्चैर्यः पश्यति स पश्यति ।। ४.२२.३४

११०७ आत्मतापरते त्वत्तामत्ते यस्य महात्मनः ।
भवादुपरते नूनं स पश्यति सुलोचनः ।। ४.२२.३५

११०८ चेत्यानुपातरहितं चिद्भैरवमयं वपुः ।
आपूरितजगज्जालं यः पश्यति स पश्यति ।। ४.२२.३६

११०९ सुखं दुःखं भवो भावो विवेककलनाश्च याः ।
अहमेवेति वा नूनं पश्यन्नपि न हीयते ।। ४.२२.३७

१११० स्वात्मसत्तापरापूर्णे जगत्यंशेन वर्तिना ।
किं मे हेयं किमादेयमिति पश्यन्सुदृङ्नरः ।। ४.२२.३८

११११ य आकाशवदेकात्मा सर्वभावगतोऽपि सन् ।
न भावरञ्जनामेति स महात्मा महेश्वरः ।। ४.२२.४०

१११२ तमःप्रकाशकलनामुक्तः कालात्मतां गतः ।
यः सौम्यः सुसमः स्वस्थस्तं नौमि पदमागतम् ।। ४.२२.४१

१११३ यस्योदयास्तमयसंकलनाकलासु
चित्रासु चारुविभवासु जगद्गतासु ।
वृत्तिः सदैव सकलैकमतेरनन्ता
तस्मैः नमः परमबोधवते शिवाय ।। ४.२२.४२

१११४ अयमहमिति निश्चयो वृथा य-
स्तमलमपास्य महामते स्वबुद्ध्या ।
यदितरदवलम्ब्य तत्पदं त्वं
व्रज पिब भुङ्क्ष्व न बध्यसे मनस्कः ।। ४.२४.२१

१११५ एषातिमूढविषय उक्तिरेव न राजते ।
अभ्यासेन विनोदेति नानुभूतेरपह्नवः ।। ४.३१.१९

१११६ इदं जगदसद्ब्रह्म सत्यमित्येव वक्ति यः ।
तमुन्मत्तमिवोन्मत्तो विमूढोऽपि हसत्यलम् ।। ४.३१.२१

१११७ अक्षीबक्षीबयोरैक्यं क्व किलेहाज्ञतज्ज्ञयोः ।
अन्धप्रकाशयोर्बोधे स्याच्छायातपयोरिव ।। ४.३१.२२

१११८ यत्नेनाप्यनुभूतोऽर्थः सत्ये कर्तुमपह्नवम् ।
अज्ञोऽन्तश्च न शक्नोति शवमाक्रमणं यथा ।। ४.३१.२३

१११९ ब्रह्म सर्वं जगदिति वक्तुं नाज्ञस्य युज्यते ।
तपोविद्याननुभवे स तदेवानुभूतवान् ।। ४.३१.२४

११२० अबुद्धविषये ह्येषा राम वाक्प्रविराजते ।
बुद्धस्यास्मीति रूपेण किल नास्त्येव किंचन ।। ४.३१.२५

११२१ ब्रह्मैवेदं परं शान्तमित्येवानुभवन्सुधीः ।
अपह्नवः स्वानुभूतेः कर्तुं तस्य क्व युज्यते ।। ४.३१.२६

११२२ नैर्मल्यप्राप्तमरणमसक्तं सर्वदृष्टिषु ।
अमनस्त्वमिहापन्नं ब्रह्म पश्यति नान्यथा ।। ४.३५.४१

११२३ मनो निर्मलतां यातं शुभसंतानवारिभिः ।
ब्राह्मीं दृष्टिमुपादत्ते रागं शुक्लपटो यथा ।। ४.३५.४२

११२४ सर्वमेव ममात्मेति सर्वभावनयानघ ।
हेयादेयबले क्षीणे बन्धमोक्षो विमुच्यताम् ।। ४.३५.४३

११२५ पदार्थेनैकतामेत्य मनसो नैकतानता ।
असत्यज्ञानदृष्टिं तां विद्धि क्षणविनाशिनीम् ।। ४.३५.४५

११२६ सबाह्याभ्यन्तरं त्यक्त्वा सर्वां दृश्यदृशं यदा ।
मनस्तिष्ठति तल्लीनं संप्राप्तं तत्पदं तदा ।। ४.३५.४६

११२७ दृश्यदृष्टिः स्फुटा येयं सा ह्यवश्यमसन्मयी ।
तन्मयत्वं च मनसः स्वरूपं विद्धि नेतरत् ।। ४.३५.४७

११२८ आद्यन्तयोर्विनाशित्वान्मध्येऽपि तदसन्मयम् ।
अज्ञातमनसस्तेन दुःखिता हस्तसंस्थिता ।। ४.३५.४८

११२९ आत्मैवेदं जगदिति विना भावेन दुःखदा ।
दृश्यश्रीरन्यथा त्वेषा भोगमोक्षप्रदायिनी ।। ४.३५.४९

११३० यथा सर्वगतः सौक्ष्म्यादाकोशो नोपलक्ष्यते ।
तथा निरशंश्चिद्भावः सर्वगोऽपि न लक्ष्यते ।। ४.३६.३

११३१ सुस्थितेवास्थितेवान्तः प्रतिभास्ति मणौ यथा ।
न सत्यभूता नासत्या तथेयं सृष्टिरात्मनि ।। ४.३६.४

११३२ स्वाधारैरम्बुदैः स्वस्थैर्न स्पृष्टं गगनं यथा ।
चित्स्थैः सर्गैश्चिदाधारैर्न स्पृष्टा चित्परा तथा ।। ४.३६.५

११३३ जलधिष्ठिततत्तेजो यथाङ्ग प्रतिबिम्बति ।
तथा पुर्यष्टकेष्वेव चिद्धि देहेषु लक्ष्यते ।। ४.३६.६

११३४ सर्वसंकल्परहिता सर्वसंज्ञाविवर्जिता ।
सैषा चिदविनाशात्मा तच्चेत्यादिकृताभिधा ।। ४.३६.७

११३५ आकाशशतभागाच्छा ज्ञेषु निष्कलरूपिणी ।
सकलाकलसंसारस्वरूपैकात्म्यदर्शिनी ।। ४.३६.८

११३६ चिच्चिनोति चितं चेत्यं तेनेदं स्थितमात्मनि ।
अज्ञेऽज्ञे त्वन्यदायातमन्यदस्तीति कल्पना ।। ४.३६.११

११३७ अज्ञेष्वसत्स्वभावोग्रसंसारगणगर्भिणी ।
ज्ञेषु प्रकाशरूपैव सकलैकात्मिका सती ।। ४.३६.१२

११३८ तेन तत्र कर्तुकर्तुर्वा नित्यमसंसक्तं भवतु चेतो नहि किंचिदस्त्यात्मतत्त्वव्यतिरिक्तं यत्र संसक्तिर्भाव्यते । यत्किंचिदिदं जगद्गतं तत्सर्वं शुद्धचित्तत्वादाभासमवेहि ।। ४.३८.१३

११३९ एवं चास्य ज्ञातज्ञेयस्य पुंसो नामात्मा सुखदुःखानां न गम्य इति निश्चये जाते नात्मव्यतिरिक्ता आधाराधेयदृष्टयो विद्यन्त इति निश्चये जाते कर्ता भोक्ता सर्वपदार्थव्यतिरिक्तो वालाग्रसहस्रभागोऽहमिति निश्चये जाते यत्किंचिदिदं तत्सर्वमहमेवेति वा निश्चये जाते सर्वसत्त्वावभासकः सर्वगस्तिष्ठाम्येवाहमिति निश्चये जाते नाहं सुखदुःखानां गम्य इति विगतज्वरतया चित्तवृत्तिर्लीलयैव तिष्ठते व्यवहारेषु ।। ४.३८.१४

११४० तज्ज्ञस्य संकटे च मुदितैव केवलं ज्योत्स्नेव भुवनभावमलंकरोति येन चित्तादृते तु ज्ञः कुर्वन्नप्यकर्ता संपन्नो मनसोऽलेपकत्वान्नासौ पादपाण्यादिविक्षेपस्य यत्नकृतस्यापि कर्मणः फलमनुभवति ।। ४.३८.१५

११४१ एवं मनः सर्वकर्मणां सर्वेहितानां सर्वभावानां सर्वलोकानां सर्वगतीनां बीजं तस्मिन्परिहृते सर्व-कर्माणि परिहृतानि भवन्ति सर्वदुःखानि क्षीयन्ते सर्वकर्माणि लयमुपयान्ति । मानसेनापि कर्मणा यत्कृतेनापि ज्ञो नाक्रम्यते न विवशीक्रियते न रञ्जनामुपैत्यव्यतिरिक्तात् ।। ४.३८.१६

११४२ मोक्षोऽस्ति न संसारे स्वसंसक्तमनसामिहा-संसक्तमनसां त्वेतत्सर्वमेवास्ति ।। ४.३८.२०

११४३ न बन्धोऽस्ति न मोक्षोऽस्ति नाबन्धोस्ति न बन्धनम् ।
अप्रबोधादिदं दुःखं प्रबोधात्प्रविलीयते ।। ४.३८.२२

११४४ संकल्पिता जगति मोक्षमतिर्मुधैव
संकल्पिता जगति बन्धमतिर्मुधैव ।
संत्यज्य सर्वमनहंकृतिरात्मनिष्ठो
धीरो धिया व्यवहरन्भुवि राम तिष्ठ ।। ४.३८.२३

११४५ भगवन्नेवं स्थिते परे ब्रह्मण्येव विद्यमाने कुत एवाभित्तिचित्ररूपायाः सृष्टेरागम इति कथय महात्मन् ।। ४.३९.१

११४६ राजपुत्र ब्रह्मतत्त्वमेवेदमावर्तते यस्मात्सर्वशक्ति तत्तस्मात्सर्वाः शक्तयो ब्रह्मणि दृश्यन्ते ।। ४.३९.२

११४७ सत्त्वमसत्त्वं द्वित्वमेकत्वमनेकत्वमाद्यत्वमन्तत्वमिति ।। ४.३९.३

११४८ तच्च नान्यत् । यथा जलराशेर्जलाशय उल्लासप्रफुल्लासेन नानाकारतां दर्शयन्प्रकटतां गच्छति ।। ४.३९.४

११४९ तथा चिद्धनश्चित्तं चित्त्वाच्च सर्वाः शक्तीः कर्ममयीर्वासनामयीर्मनोमयीश्चिनोति दर्शयति बिभर्ति जनयति क्षिपयति चेति ।। ४.३९.५

११५० सर्वेषामेव जीवानां सर्वासामभितो दृशाम् ।
समग्राणां पदार्थानामुत्पत्तिर्ब्रह्मणोऽनिशम् ।। ४.३९.६

११५१ लोकात्परादुपायान्ति तस्मिंश्चित्त्वाद्विशन्त्यलम् ।
तन्मया एव सततं तरङ्गा इव सागरे ।। ४.३९.७

११५२ भगवंस्तवातिगहनेयं वचनव्यक्तिर्न खल्वद्य वाक्यार्थमवगच्छामि ।। ४.३९.८

११५३ क्व किलातीतमनःषष्ठेन्द्रियवृत्ति ब्रह्मतत्त्वं क्व भङ्गुरेयं तज्जा पदार्थश्रीरिति वचनरचना । यदि चायमारम्भो ब्रह्मण आपतितस्तदनेन तत्सदृशेनैव भवितव्यम् ।। ४.३९.९

११५४ यो यस्माज्जायते स तत्सदृश एव भवति ।। ४.३९.१०

११५५ यथा दीपाद्दीपः पुरुषात्पुरुषः सस्यात्सस्यम् ।। ४.३९.११

११५६ यतो निर्विकाराद्यदागतं निर्विकारेणैवानेन भवितव्यम् ।।४.३९.१२

११५७ अथैतद्व्यतिरिक्तं चिदात्मनस्तन्निष्कलङ्कस्य परमेश्वरस्य येयं कलङ्कापत्तिरित्याकर्ण्य भगवान् ब्रह्मर्षिरुवाच ।। ४.३९.१३

११५८ ब्रह्मैवेदं स्थितं नाम मलमस्तीह नानघ ।
तरङ्गौघगणैरम्भः सिन्धौ स्फुरति नो रजः ।। ४.३९.१४
११५९ द्वितीया कल्पनैवेह न रघूद्वह विद्यते ।
ब्रह्ममात्रादृते वह्नावौष्ण्यमात्रादृते यथा ।। ४.३९.१५
११६० निर्दुःखं ब्रह्म निर्द्वन्द्वं तज्जं दुःखमयं जगत्
अस्पष्टार्थमिदं ब्रह्मन्न वेद्मि वचनं तव ।। ४.३९.१६
११६१ इत्युक्ते तत्र रामेण चिन्तयामास चेतसा ।
वसिष्ठो मुनिशार्दूलो राघवस्योपदेशने ।। ४.३९.१७
११६२ परं विकासमायाता नास्य तावदियं मतिः ।
किंचिन्निर्मलतां प्राप्ता प्रोह्यते चेह वस्तुनि ।। ४.३९.१८
११६३ यो व्युत्पन्नमनास्तस्य ज्ञातज्ञेयस्य धीमतः ।
मोक्षोपायगिरां पारं प्रयातस्य विवेकतः ।। ४.३९.१९
११६४ न कश्चित्कस्यचिद्दोषो नास्ति विद्यात्मनि ह्यलम् ।
यावन्नोक्तं न विश्रान्तिं तावदेत्येष राघवः ।। ४.३९.२०
११६५ अर्धव्युत्पन्नबुद्धेस्तु नैतद्व्यक्तं हि शोभते ।
दृश्यानया भोगदृशा भावयन्नेष नश्यति ।। ४.३९.२१
११६६ परां दृष्टिं प्रयातस्य भोगेच्छा नाभिजायते ।
सर्वं ब्रह्मेति सिद्धान्तः काले नामास्य युज्यते ।। ४.३९.२२
११६७ आदौ शमदमप्रायैर्गुणैः शिष्यं विशोधयेत् ।
पश्चात्सर्वमिदं ब्रह्म शुद्धस्त्वमिति बोधयेत् ।। ४.३९.२३
११६८ अज्ञस्यार्धप्रबुद्धस्य सर्वं ब्रह्मेति यो वदेत् ।
महानरकजालेषु स तेन विनियोजितः ।। ४.३९.२४
११६९ प्रबुद्धबुद्धेः प्रक्षीणभोगेच्छस्य निराशिषः ।
नास्त्यविद्यामलमिति युक्तं वक्तुं महात्मनः ।। ४.३९.२५
११७० अपरीक्ष्य च यः शिष्यं प्रशास्त्यतिविमूढधीः ।
स एव नरकं याति यावदाभूतसंप्लवम् ।। ४.३९.२६
११७१ इति संचिन्त्य भगवानज्ञानतिमिरापहः ।
तमुवाच मुनिश्रेष्ठो वसिष्ठो भूमिभास्करः ।। ४.३९.२७
११७२ कलङ्ककलना ब्रह्मण्यस्ति नास्तीति वानघ ।
सिद्धान्तकाले वक्तव्यं स्वयं ज्ञास्यसि राघव ।। ४.३९.२८
११७३ ब्रह्म सर्वशक्ति सर्वव्यापि सर्वगतं सर्वोहमेवेति ।। ४.३९.२९

११७४ यथेन्द्रजालिनः पश्यसि चित्रा मायया क्रिया
जनयन्तः सदसत्तां नयन्त्यसच्च सत्तां नयन्ति
तथैवात्मा अमायामयोऽपि मायामय इव परम
ऐन्द्रजालिको घटं पटं करोति पटं च घटं
करोति उपले लतां जनयति मेरौ कनकतटे
नन्दनवनमिव लतायामुपलमुत्पादयति कल्पपादपेषु
रत्नस्तबकमिव व्योम्नि काननमध्यारोपयति ।। ४.३९.३०
११७५ गन्धर्वउद्यानमिव तस्मिन् जगति भविष्यति
गगने कल्पनया नगरतां जनयति नष्टच्छायाङ्गनमिव
व्योम धरातलं नयतीति ।। ४.३९.३१
११७६ गन्धर्वनगरराजगृहे विपुलाङ्गनाजनमिव भूतले
व्योम निवेशयति ।। ४.३९.३२
११७७ रक्तकुट्टिमेष्वाकाशप्रतिबिम्बमिव किंचिदस्ति
जगति भविष्यति वा बभूव ।। ४.३९.३३
११७८ यदीश्वरो व्यक्तरूपो विचित्रतामुपेत्य निदर्शयति ।। ४.३९.३४
११७९ सर्वमेव सर्वथा सर्वत्र यथा संभवत्येकमेवेह
वस्तु विद्यत इति तस्माद्धर्षामर्षविस्मयानां क्व
वाऽवसरो राम ।। ४.३९.३५
११८० समतयैव सततं धृतिमता स्थातव्यम् ।। ४.३९.३६
विस्मयस्मयसंमोहहर्षामर्षविकारिताम् ।
समतावलितस्तज्ज्ञो न कदाचन गच्छति ।। ४.३९.३७
११८१ अपर्यवसाने देशकालवति चित्रा हि जगति
युक्तयो दृश्यन्ते ।। ४.३९.३८
११८२ एताश्च युक्तीर्नामासावात्मा यत्नेन रचनां करोति
न चोत्पन्नां तिरस्करोति सागर इव वीचीः ।। ४.३९.३९
११८३ किं तर्हि क्षीर इव धृतं घट इव मृदि
पट इव तन्तुषु वट इव धानायात्मन्येव स्थिताः
शक्तयः प्रकटतामागता व्यवह्रियन्तेऽविरचितमेव
तरङ्गवत् ।। ४.३९.४०
११८४ नात्र कश्चित्कर्ता न भोक्ता न विनाशमेति ।। ४.३९.४१
११८५ केवलमात्मतत्त्वे साक्षिणि निरामये ४.३९.४२

१११८६ समतयात्मनि नित्यमसंक्षुब्धे तिष्ठति सत्येवं
संपद्यते ।। ४.३९.४२
११८७ सति दीप इवालोकः सत्यर्क इव वासरः ।
सति पुष्प इवामोदः स्वतः संपद्यते जगत् ।। ४.३९.४३
११८८ आभासमात्रमेवेदं परिदृश्यत एव च ।
स्पंदः समीरणस्येव न सन्नासदवस्थितम् ।। ४.३९.४४
११८९ निर्दोषवदेव जागतीनां दृष्टीनां परमार्थतो
भगवान्स्थितो विनष्टानां पुनः कर्ता कृतानां वा
नाशयिता स केवलं कदाचित्प्रकटाः
कदाचिदल्पप्रकटाः कदाचिदप्रकटास्तारका इव
कुसुमराशयः ।। ४.३९.४५
११९० नश्यतीह हि तद्वस्तु नात्मभूतं यदात्मनः ।
कथं नश्यति तद्वस्तु स्वात्मभूतं यदात्मनः ।। ४.३९.४६
११९१ जायते नैव तद्वस्तु नात्मभूतं यदात्मनः ।
जायते चैव तद्वस्तु स्वात्मभूतं यदात्मनः ।। ४.३९.४७
११९२ कथं तज्जायते तस्मात्स्वात्मभूतं यदात्मनः ।। ४.३९.४८
११९३ तस्मात्सम्यग्ज्ञानवशाद्ब्रह्मणः सर्वपदार्थानामागमः ।।४.३९.४९
११९४ अवतीर्णानां च तेषामवतरणसमकालमेवा-
विद्योदेति तत्त्वज्ञानं दृढतामेति तदनु
शतसहस्रस्कन्धो विचित्रशुभाशुभफलभरफलितो
भूरिशाखः स्फारतामेति संसारद्रुमः ।। ४.३९.५०
११९५ आशामञ्जरिताकृतिं विफलितं दुःखादिभि-
र्दारुणैर्भोगैः पल्लवितं जराकुसुमितं
तृष्णालताभासुरम् । संसाराभिधवृक्षमात्मनिगडं
छित्वा विवेकासिना मुक्तस्त्वं विहरेह वारणपतिः
स्तम्भादिवोन्मोचितः ।। ४.३९.५१
११९६ भुवि संबध्यमानानां यान्तेनामुपदेश्यताम् ।
सर्वासां भूतजातीनां या एता नरजातयः ।। ४.४०.१२
११९७ अग्नेः शिखाया एकस्या द्वितीया जनकेति या ।
उक्तिवैचित्र्यमेवैतन्नोत्त्यर्थेऽत्रास्ति सत्यता ।। ४.४०.२५
११९८ न जन्यजनकाद्यास्ताः संभवन्त्युक्तयःपरे ।

एकमेव ह्यनन्तत्वात्किं कथं जनयिष्यति ।। ४.४०.२६
११९९ उपदेश्योपदेशार्थं शास्त्रार्थप्रतिपत्तये ।
शब्दार्थवाक्यरचनाभ्रमो मा तन्मयो भव ।। ४.४१.६
१२०० यदा पुरा ज्ञास्यसि तत्सत्यमत्यन्तनिर्मलम् ।
वाच्यवाचकशब्दार्थभेदं त्यक्ष्यसि वै तदा ।। ४.४१.७
१२०१ शब्दार्थवाक्प्रपञ्चोऽयमुपदेशेषु कल्पितः ।
सदाऽज्ञेषु न तज्ज्ञेषु विद्यते पारमार्थिकः ।। ४.४१.९
१२०२ वाक्प्रपञ्चं विना त्वेतदज्ञानमतुलं तमः ।
भेत्तुमन्योन्यमुदितं यत्नं कर्तुं न शक्यते ।। ४.४१.१२
१२०३ अतो राघव तत्त्वज्ञो व्यवहारेषु संसृतेः ।
नष्टं नष्टमुपेक्षस्व प्राप्तं प्राप्तमुपाहर ।। ४.४६.७
१२०४ अनागतानां भोगानामवाञ्छनमकृत्रिमम् ।
आगतानां च संभोग इति पण्डितलक्षणम् ।। ४.४६.८
१२०५ संसारसंभ्रमे ह्यस्मिंश्छन्नात्मन्याततायिनि ।
तथा विहर संबुद्धो यथा नायासि मूढताम् ।। ४.४६.९
१२०६ यदा ते नेन्द्रियार्थश्रीः स्वदते हृदि राघव ।
तदा विज्ञातविज्ञानः समुत्तीर्णभवार्णवः ।। ४.४६.१९
१२०७ अस्वादितेन्द्रियार्थस्य सतनोरतनोरपि ।
अनिच्छतोऽपि संपन्ना मुक्तिरर्थवशात्तव ।। ४.४६.२०
१२०८ सर्वा दृष्टीः परित्यज्य नियम्य मनसा मनः ।
सबाह्याभ्यन्तरार्थस्य संकल्पस्य क्षयं कुरु ।। ४.५३.३८
१२०९ हरो यद्युपदेष्टा ते हरिः कमलजोऽपि वा ।
अत्यन्तकरुणाक्रान्तो लोकनाथोऽथवा यतिः ।। ४.५३.४१
१२१० पातालस्थस्य भूस्थस्य स्वर्गस्थस्यापि तत्तव ।
नान्यः कश्चिदुपायोऽस्ति संकल्पोपशमादृते ।। ४.५३.४२
१२११ अनाबाधेऽविकारे च सुखे परमपावने ।
संकल्पोपशमे यत्नं पौरुषेण परं कुरु ।। ४.५३.४३
१२१२ संकल्पतन्तावखिला भावाः प्रोताः किलानघ ।
छिन्ने तन्तौ न जाने ते क्व यान्ति विशरारवः ।। ४.५३.४४
१२१३ संकल्प्यते यथा यद्यत्तत्तथा भवति क्षणात् ।
मा किंचिदपि तत्त्वज्ञ संकल्पय कदाचन ।। ४.५३.४६

१२१४ अधिगतपरमार्थतामुपेत्य
प्रसभमपास्य विकल्पजालमुच्चैः ।
अधिगमय पदं तदद्वितीयं
विततसुखाय सुषुप्तचित्तवृत्तिः ।। ४.५३.५०

१२१५ कीदृशस्तात संकल्पः कथमुत्पद्यते प्रभो ।
कथं च वृद्धिमाप्नोति कथं चैष विनश्यति ।। ४.५४.१

१२१६ अनन्तस्यात्मतत्त्वस्य सत्तासामान्यरूपिणः ।
चितश्चेत्योन्मुखत्वं यत्तत्संकल्पाङ्कुरं विदुः ।। ४.५४.२

१२१७ लेशतः प्राप्तसत्ताकः स एव घनतां शनैः ।
याति चित्तखमापूर्य दृढजाड्याय मेघवत् ।। ४.५४.३

१२१८ भावयन्ती चितिश्चेत्यं व्यतिरिक्तमिवात्मनः ।
संकल्पतामुपायाति बीजमङ्कुरतामिव ।। ४.५४.४

१२१९ संकल्पेन हि संकल्पः स्वयमेव प्रजायते ।
वर्धते स्वयमेवाशु दुःखाय न सुखाय तु ।। ४.५४.५

१२२० संकल्पमात्रं हि जगज्जलमात्रं यथार्णवः ।
ऋते संकल्पमन्या ते नास्ति संसारदुःखिता ।। ४.५४.६

१२२१ काकतालीययोगेन संजातोऽस्ति मुधैव हि ।
मृगतृष्णाद्विचंद्रत्वमिवासत्यं च वर्धते ।। ४.५४.७

१२२२ निगीर्णमातुलिङ्गस्य कनकप्रत्ययो यथा ।
स्वयमभ्येत्यसत्योऽन्तः संकल्पस्ते तथा हृदि ।। ४.५४.८

१२२३ असत्यमेव जातस्त्वमसत्यमपि वर्तसे ।
अस्मिञ्ज्ञाते च विज्ञाने ह्यसत्यं संविलीयते ।। ४.५४.९

१२२४ असौ सोऽहमिमे भावाः सुखदुःखमया मम ।
व्यर्थमेवेति नानास्था येनान्तः परितप्यसे ।। ४.५४.१०

१२२५ असन्नेवास्य जातोऽसि कृतो जन्मविलासतः ।
व्यर्थमेवावमूढोऽसि संकल्पवशतः स्वतः ।। ४.५४.११

१२२६ मा संकल्पय संकल्पं भावं भावय मा स्थितौ ।
एतावतैव भावेन भव्यो भवति भूतये ।। ४.५४.१२

१२२७ संकल्पनाशयत्नेन न भयान्यनुगच्छति ।
भावानाभावमात्रेण संकल्पः क्षीयते स्वयम् ।। ४.५४.१३

१२२८ सुमनःपल्लवामर्दे किंचिद्व्यतिकरो भवेत् ।
सुसाध्यो भावमात्रेण नतु संकल्पनाशने ।। ४.५४.१४

१२२९ पुष्पाक्रान्तौ करस्पन्दयत्नः पुत्रोपयुज्यते ।
तदप्युपकरोत्यस्मिन्न संकल्पपरिक्षये ।। ४.५४.१५

१२३० संकल्पो येन हन्तव्यस्तेन भावविपर्ययात् ।
अप्यर्धेन निमेषेण लीलयैव निहन्यते ।। ४.५४.१६

१२३१ भावमात्रोपसंपन्ने स्वात्मनि स्थितिमागते ।
साध्यते यदसाध्यं तत्कस्य स्यात्किमिवाङ्ग ते ।। ४.५४.१७

१२३२ संकल्पेनैव संकल्पं मनसा स्वमनो मुने ।
छित्त्वा स्वात्मनि तिष्ठ त्वं किमेतावति दुष्करम् ।। ४.५४.१८

१२३३ उपशान्ते हि संकल्पे उपशान्तमिदं भवेत् ।
संसारदुःखमखिलं मूलादपि महामते ।। ४.५४.१९

१२३४ संकल्पो हि मनो जीवश्चित्तं बुद्धिः सवासना ।
नाम्नैवान्यत्वमेतेषां नार्थेनार्थविदां वर ।। ४.५४.२०

१२३५ संकल्पनादृते नेह किंचिदेवास्ति कुत्रचित् ।
तमेव हृदयाच्छिन्धि किमेतत्परिशोचसि ।। ४.५४.२१

१२३६ यथैवेदं नभः शून्यं जगच्छून्यं तथैव हि ।
असन्मयविकल्पोत्थे उभे एते तते यतः ।। ४.५४.२२

१२३७ असिद्धं सर्वमेवैतदसिद्धेनैव साधितम् ।
संकल्पेन जगद्यस्माद्भावना क्वावतिष्ठताम् ।। ४.५४.२३

१२३८ [सत्यास्थायामसत्यां तु किंनिष्ठा वासना भवेत् ।]
भावनाक्षयतः सिद्धिस्ततः प्राप्यं न शिष्यते ।
तस्मादसदिदं सर्वं विज्ञेयं हेलयेच्छया ।। ४.५४.२४

१२३९ तनुभावनया तेन सुखदुःखैर्न लिप्यते ।
अवस्त्विति च निर्णीय स्नेहास्था न प्रवर्तते ।। ४.५४.२५

१२४० आस्थाक्षये न जायेते हर्षामर्षौ भवाभवौ ।
तस्मादसदिदं सर्वं सुखदुःखादिविभ्रमैः ।। ४.५४.२६

१२४१ मनो जीवः स्फुरत्युच्चैर्मानसं नगरं जगत् ।
भविष्यद्वर्तमानं च भूतं च परिवर्तयन् ।। ४.५४.२७

१२४२ वासनावलितं लोके स्फुरच्छक्ति मनः स्थितम् ।
करोति स्वाशयेनेमां व्यवस्थां मलिनच्छलः ।। ४.५४.२८

१२४३ आत्मनः सदृशीं लीलां जीवो हृद्वनमर्कटः ।
दीर्घमाकारमादाय निमेषाद्याति ह्रस्वताम् ।। ४.५४.२९

१२४४ ग्रहीतुं च न शक्यन्ते संकल्पजलवीचयः ।
मनाग्दृष्टा विवर्धन्ते ह्रसन्ति सपरिच्छदाः ।। ४.५४.३०

१२४५ तृणमात्रेण दीप्यन्ते संकल्पा वह्निशेषवत् ।
जगत्यप्रकटाकाराः प्रदीप्ताः क्षणभङ्गुराः ।। ४.५४.३१

१२४६ भ्रमदा जडसंस्थानाः संकल्पास्तडिदग्नयः ।
यदेवासन्मयं पुत्र तदेवाशु चिकित्सितुम् ।। ४.५४.३२

१२४७ शक्यते नात्र संदेहो नासत्सद्भवति क्वचित् ।
संस्थितो यदि संकल्पो दुश्चिकित्स्यःस्वतो भवेत् ।। ४.५४.३३

१२४८ किंत्वसद्भूत एवैष सुचिकित्स्यस्तदा भवेत् ।
अकृत्रिमं चेत्संसारमलमङ्गारकार्ष्ण्यवत् ।। ४.५४.३४

१२४९ तदेतत्क्षालने साधो कः प्रवर्तेत दुर्मतिः ।
किंत्वेतत्तण्डुलेष्वेव तुषकञ्चुकवत्स्थितम् ।। ४.५४.३५

१२५० यतस्ततः प्रयत्नेन पौरुषेण विनश्यति ।
अकृत्रिममपि प्राप्तं भृशं पुत्र तथा पुनः ।। ४.५४.३६

१२५१ सुखोच्छेद्यतया ज्ञस्य संसारमलमाततम् ।
तण्डुलस्य यथा चर्म यथा ताम्रस्य कालिमा ।। ४.५४.३७

१२५२ नश्यति क्रियया पुत्र पुरुषस्य तथा मलम् ।
नश्यत्येव न संदेहस्तस्मादुद्यमवान्भव ।। ४.५४.३८

१२५३ असत्कल्पैर्विकल्पैर्यत्संसारो न जितो मुधा ।
स्तोकेनाशु लयं याति क्वासद्वस्तु चिरं स्थितम् ।। ४.५४.३९

१२५४ असत्यामेति संसारः स्वव्यवस्थां विचारतः ।
दीपालोकादिवान्धस्य द्वीन्दुत्वं स्वीक्षितादिव ।। ४.५४.४०

१२५५ नासौ तव न चास्य त्वं भ्रान्तिं पुत्र परित्यज ।
असत्ये सत्यवद्दृष्टे भावना मा स्म हीदृशः ।। ४.५४.४१

१२५६ मम गुरुविभवोज्ज्वला विलासा
इति तव मास्तु वृथैव विभ्रमोऽन्तः ।
त्वमपि च वितताश्च ते विलासा
विलसति सर्वमिदं तदात्मतत्त्वम् ।। ४.५४.४२

१२५७ नास्तीदमिति निर्णीय सर्वतस्त्यज रञ्जनाम् ।
यन्नास्ति तत्प्रति किल केवास्थेह विचारिणाम् ।। ४.५६.१

१२५८ दृश्यमानमथेदं चेदस्ति सत्तमुपागतम् ।
तिष्ठ स्वात्मनि बध्नासि त्वं किमत्र किलात्मताम् ।। ४.५६.२

१२५९ अथ चेदस्ति नास्तीदमिति निश्चयवानसि ।
तथापि भावनासङ्ग कथं युक्तश्चलाचले ।। ४.५६.३

१२६० नेदमस्ति जगद्राम तव नास्ति महामते ।
केवलं स्वच्छमेवेत्थमाततं मितमीदृशम् ।। ४.५६.४

१२६१ एकस्मिन्नेव सततं स्थिते सन्मात्रवस्तुनि ।
जातोऽयमयमुन्नष्ट इति तेषां तवेह धीः ।। ४.६१.२१

१२६२ आभासमात्रमेवेदं न सन्नासच्च राघव ।। ४.६१.२२

१२६३ उद्भूतेनाप्रशान्तेन चेतसा सपदि स्थितम् ।
नेह मोहान्त आमोक्षान्नेदं यत्तदवस्तु च ।। ४.६१.२३

१२६४ किं किलासति रामेह मोहजाले समुज्झति ।
यत्किंचित्सङ्गसङ्गत्या विमोहे कारणं हि तत् ।। ४.६१.२४

१२६५ आदावन्ते च यन्नास्ति कीदृशी तस्य सत्यता ।
आदावन्ते च यन्नित्यं तत्सत्यं नाम नेतरत् ।। ५.५.९

१२६६ आद्यन्तासन्मये यस्य वस्तुन्यासज्जते मनः ।
तस्य मुग्धपशोर्जन्तोर्विवेकः केन जन्यते ।। ५.५.१०

१२६७ जायते मन एवेह मन एव विवर्धते ।
सम्यग्दर्शनदृष्ट्या तु मन एव हि मुच्यते ।। ५.५.११

१२६८ पूर्वं राघव शास्त्रेण वैराग्येण परेण च ।
तथा सज्जनसङ्गेन नीयतां पुण्यतां मनः ।। ५.५.१४

१२६९ सौजन्योपहितं चेतो यदा वैराग्यमागतम् ।
तदानुगम्या गुरवो विज्ञानगुरवोऽपि ये ।। ५.५.१५

१२७० ततस्तस्योपदिष्टेन कृत्वा ध्यानार्चनादिकम् ।
क्रमेण पदमाप्नोति तद्यत्परमपावनम् ।। ५.५.१६

१२७१ देहेनास्य न संबन्धो मनागेवामलात्मनः।
हेम्नः पङ्कलवेनेव तद्गतस्यापि मानवाः ।। ५.५.२५

१२७२ पृथगात्मा पृथग्देही जलपद्मलवोपमौ ।

ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे ।। ५.५.२६
१२७३ यथा रजोभिर्गगनं यथा कमलमम्बुभिः ।
न लिप्यते हि संश्लिष्टैर्देहैरात्मा तथैव च ।। ५.५.३१
१२७४ कर्दमादि यथा हेम्ना श्लिष्टिमेति पृथक्स्थितम् ।
नान्तःपरिणतिं याति जडो देहस्तथात्मना ।। ५.५.३२
१२७५ सुखदुःखे न देहस्य सर्वातीतस्य नात्मनः ।
एते ह्यज्ञानकस्यैव तस्मिन्नष्टे न कस्यचित् ।। ५.५.३४
१२७६ न कस्यचित्सुखं किंचिद्दुःखं च नच कस्यचित् ।
सर्वमात्ममयं शान्तमनन्तं पश्य राघव ।। ५.५.३५
१२७७ यथा मणिर्ददात्यात्मच्छायाः स्वयमकारणम् ।
तेजोमयीस्तथैवायमात्मा सृष्टीः प्रयच्छति ।। ५.५.३७
१२७८ एकस्मिन्नेव सर्वस्मिन्परमात्मनि वस्तुनि ।
द्वितीया कल्पना नास्ति वह्नौ हिमकणो यथा ।। ५.५.४१
१२७९ भावयन्नात्मनात्मानं चिद्रूपेणैव चिन्मयम् ।
ऋजूज्ज्वलमये ह्यात्मा स्वयमात्मनि जृम्भते ।। ५.५.४२
१२८० इमं विश्वपरिस्पन्दं करोमीत्यस्तवासनम् ।
प्रवर्तते यः कार्येषु स मुक्त इति मे मतिः ।। ५.६.१
१२८१ सर्वास्तदंशवस्तस्य सर्वशक्तेः किलात्मनः ।
पृथक्ता वाच्यता चेयं कुतो नाम तवोत्थिता ।। ५.१४.१२
१२८२ किं नाम जीव इत्युक्तं येनेहान्धीकृतं जगत् ।
चित्तं चैवासदेव त्वं विद्धि का तस्य शक्तता ।। ५.१४.१३
१२८३ चित्ततां श्रृङ्खलामेतां स्वरूपज्ञानयुक्तितः ।
बिलाच्चित्तान्महाबाहो स्वात्मसिंहं विमोचय ।। ५.१४.५५
१२८४ आत्मनो व्यतिरिक्तं सच्चित्तमित्यङ्ग संविदा ।
मनः संपद्यते दुःखि क्षीयते त्यक्तया तया ।। ५.१४.५७
१२८५ आत्मैवेदं जगत्सर्वमित्यन्तः संविदोदये ।
क्व चेता क्व च वा चित्तं किं चेत्यं चेतनं च किम् ।। ५.१४.५८
१२८६ अहमात्मेति जीवोऽस्मीत्येतावच्चित्तकं विदुः ।
अनेनेत्थमनाद्यन्तं दुःखं राघव तन्यते ।। ५.१४.५९
१२८७ अहमात्मा न जीवाख्याः सत्ताः सन्तीतराः क्वचित् ।
इत्येव चित्तोपशमः परमं सुखमुच्यते ।। ५.१४.६०

१२८८ आत्मैवेदं जगदिति जाते राघव निश्चये ।
असत्ता चेतसो जाता भवत्येव न संशयः ।। ५.१४.६१
१२८९ एवं सत्यावबोधेन स्वात्मैवेदमिति स्थितिः ।
मनः सुगलितं विद्धि सूर्यभासा तमो यथा ।। ५.१४.६२
१२९० मनःसर्पः शरीरस्थो यावत्तावन्महद्भयम् ।
तस्मिन्नुत्सारिते योगाद्भयस्यावसरः कुतः ।। ५.१४.६३
१२९१ भ्रान्तिमात्रोत्थितश्चित्ते वेतालोऽतिबलोऽनघ ।
सम्यग्ज्ञानेन मन्त्रेण प्रसभं विनिपात्यताम् ।। ५.१४.६४
१२९२ देहगेहाद्गते चित्तयक्षे बलवतां वरे ।
निराधिर्विगतोद्वेगस्तिष्ठ नास्ति भयं तव ।। ५.१४.६५
१२९३ नीराग एव निरुपार्जन एव चास्मी-
त्येतावतैव गलिता तव चित्तसत्ता ।
निर्दुःखमुत्तमपदं परमं गतोऽसि
तिष्ठोपशान्तपरमैषण एवमन्तः ।। ५.१४.६६
१२९४ तस्माद्राघव तृष्णां त्वं त्यज संकल्पवर्जनात् ।
मनस्त्वकल्पनं नास्ति निर्णीतमिति युक्तितः ।। ५.१५.२४
१२९५ अयं त्वमहमित्येव प्रथमं तावदाशये ।
मां दुराशां महाबाहो संकल्पय तमोमयीम् ।। ५.१५.२५
१२९६ एतां दुःखप्रसविनीमनात्मन्यात्मभावनाम् ।
न भावयसि चेद्राम तदा तज्ज्ञेषु गण्यसे ।। ५.१५.२६
१२९७ एतामहंभावमयीमपुण्यां
छित्त्वानहंभावशलाकयैव ।
स्वभावनां भव्य भवान्तभूमौ
भवभिभूताखिलभूतभीतिः ।। ५.१५.२७
१२९८ आपातमात्रमधुरमावश्यकपरिक्षयम् ।
भोगोपभोगमात्रं मे किं नामेदं सुखावहम् ।। ५.२२.३०
१२९९ पुनर्दिनैककलनाशर्वरीसंस्थितिः पुनः ।
पुनस्तान्येव कर्माणि लज्जायै नच तुष्टये ।। ५.२२.३१
१३०० पुनरालिङ्ग्यते कान्ता पुनरेव च भुज्यते ।
सेयं शिशुजनक्रीडा लाज्जायै महतामिह ।। ५.२२.३२
१३०१ तमेव भुक्तविरसं व्यापारौघं पुनःपुनः ।

दिवसे दिवसे कुर्वन्प्राज्ञः कस्मान्न लज्जते ।। ५.२२.३३
१३०२ पुनर्दिनं पुना रात्रिः पुनः कार्यपरम्पराः ।
पुनःपुनरहं मन्ये प्राज्ञस्येयं विडम्बना ।। ५.२२.३४
१३०३ विषयान्प्रति भोः पुत्र सर्वानेव हि सर्वथा ।
अनास्था परमा ह्येषा सा युक्तिर्मनसो जये ।। ५.२४.१७
१३०४ एषा ह्यत्यन्तदुष्प्रापा सुप्रापा च महामते ।
अनभ्यस्तातिदुष्प्रापा स्वभ्यस्ता प्राप्यते सुखम् ।। ५.२४.१९
१३०५ परं पौरुषमाश्रित्य भोगेष्वरतिमाहरेत् ।
न भोगेष्वरतिर्यावज्जायते भवनाशनी ।
न परा निवृतिस्तावत्प्राप्यते जयदायिनी ।। ५.२४.३७-३८
१३०६ चित्तस्य भोगैर्द्वौ भागौ शास्त्रेणैकं प्रपूरयेत् ।
गुरुशुश्रूषया चैकमव्युत्पन्नस्य सत्क्रमे ।। ५.२४.४५
१३०७ किंचिद्व्युत्पत्तियुक्तस्य भागं भोगैः प्रपूरयेत् ।
गुरुशुश्रूषया भागौ भागं शास्त्रार्थचिन्तया ।। ५.२४.४६
१३०८ व्युत्पत्तिमनुयातस्य पूरयेच्चेतसोऽन्वहम् ।
द्वौ भागौ शास्त्रवैराग्यैर्द्वौ ध्यानगुरुपूजया ।। ५.२४.४७
१३०९ साधुतामागतो जीवो योग्यो ज्ञानकथाक्रमे ।
निर्मलाकृतिरादत्ते पट उत्तमरङ्गनाम् ।। ५.२४.४८
१३१० शनैः शनैर्लालनीयं युक्तिभिः पावनोक्तिभिः ।
शास्त्रार्थपरिणामेन पालयेच्चित्तबालकम् ।। ५.२४.४९
१३११ परदृष्टौ वितृष्णत्वं तृष्णाभावे च दृक्परा ।
एते मिथः स्थिते दृष्टी तेजोदीपदशे यथा ।। ५.२४.५३
१३१२ चिच्चेत्यकलनाबन्धस्तन्मुक्तिर्मुक्तिरुच्यते ।
चिदचेत्याखिलात्मेति सर्वसिद्धान्तसंग्रहः ।। ५.२७.१३
१३१३ एनं निश्चयमादाय विलोकयसि हेलया ।
स्वयमेवात्मनात्मानमनन्तं पदमाप्स्यसि ।। ५.२७.१४
१३१४ आत्मनैव प्रयत्नेन यावदात्मावलोकने ।
न कृतोऽनुग्रहस्तावन्न विचारोदयो भवेत् ।। ५.२९.५९
१३१५ वेदवेदान्तशास्त्रार्थतर्कदृष्टिभिरप्ययम् ।
नात्मा प्रकटतामेति यावन्न स्वमवेक्षितम् ।। ५.२९.६०

१३१६ स्वल्पेयं मठिका ब्राह्मी जगन्नाम्नी सुसंकटा ।
गजो बिल्व इव स्वाङ्गे न माति विपुलं वपुः ।। ५.३४.६२
१३१७ अभिवन्द्याथ चालोक्य चिरमालिङ्ग्यसे मया ।
कोऽन्यः स्यात्त्वदृते बन्धुर्भगवन्भुवनत्रये ।। ५.३६.२
१३१८ सुखदुःखक्रमः प्राप्य भवन्तं परिनश्यति ।
प्राकाश्यमासाद्य यथा तमस्तेजोऽथवा हिमम् ।। ५.३६.६४
१३१९ त्वदालोकनयैवैते स्थितिं यान्ति सुखादयः ।
सूर्यालोकनया प्रातर्वर्णाः शुक्लादयो यथा ।। ५.३६.६५
१३२० लब्धात्मानो विनश्यन्ति संबन्धक्षण एव ते ।
ते तमांसीव दीपस्य दृष्टा एव व्रजन्त्यलम् ।। ५.३६.६६
१३२१ सामान्येन विचारेण क्षयमायाति दुष्कृतम् ।
योगवाक्यविचारेण को न याति परं पदम् ।। ५.४२.७
१३२२ अज्ञानमुच्यते पापं तद्विचारेण नश्यति ।
पापमूलच्छिदं तस्माद्विचारं न परित्यजेत् ।। ५.४२.८
१३२३ चिरमाराधितोऽप्येष परमप्रीतिमानपि ।
नाविचारवतो ज्ञानं दातुं शक्नोति माधवः ।। ५.४३.१०
१३२४ मुख्यः पुरुषयत्नोत्थो विचारः स्वात्मदर्शने ।
गौणो वरादिको हेतुर्मुख्यहेतुपरो भव।। ५.४३.११
१३२५ न हरेर्न गुरोर्नार्थात्किंचिदासाद्यते महत् ।
आक्रान्तमनसः स्वस्माद्यदासादितमात्मनः ।। ५.४३.१७
१३२६ अभ्यासवैराग्ययुतादाक्रान्तेन्द्रियपन्नगात् ।
नात्मनः प्राप्यते यत्तत्प्राप्यते न जगत्त्रयात् ।। ५.४३.१८
१३२७ आराधयात्मनात्मानमात्मनात्मानमर्चय ।
आत्मनात्मानमालोक्य संतिष्ठस्वात्मनात्मनि ।। ५.४३.१९
१३२८ शास्त्रयत्नविचारेभ्यो मूर्खाणां प्रपलायिनाम् ।
कल्पिता वैष्णवी भक्तिः प्रवृत्त्यर्थं शुभस्थितौ ।। ५.४३.२०
१३२९ अभ्यासयत्नौ प्रथमं मुख्यो विधिरुदाहृतः ।
तदभावे तु गौणः स्यात्पूज्यपूजामयक्रमः ।। ५.४३.२१
१३३० अस्ति चेदिन्द्रियाक्रान्तिः किं प्राप्यं पूजनैः फलम् ।
नास्ति चेदिन्द्रियाक्रान्तिः किं प्राप्यं पूजनैः फलम् ।। ५.४३.२२

१३३१ विचारोपशमाभ्यां हि न विनासाद्यते हरिः ।
विचारोपशमाभ्यां च मुक्तस्याब्जकरेण किम् ।। ५.४३.२३

१३३२ विचारोपशमोपेतं चित्तमाराधयात्मनः ।
तस्मिन्सिद्धे भवन्सिद्धो नो चेत्त्वं वनगर्दभः ।। ५.४३.२४

१३३३ क्रियते माधवादीनां प्रणयप्रार्थना स्वयम् ।
तथैव क्रियते कस्मान्न स्वकस्यैव चेतसः ।। ५.४३.२५

१३३४ सर्वस्यैव जनस्यास्य विष्णुरभ्यन्तरे स्थितः ।
तं परित्यज्य ये यान्ति बहिर्विष्णुं नराधमाः ।। ५.४३.२६

१३३५ हृद्गुहावासिचित्तत्त्वं मुख्यं सानातनं वपुः ।
शङ्खचक्रगदाहस्तो गौण आकार आत्मनः ।। ५.४३.२७

१३३६ अस्य संसाररूपस्य मायाचक्रस्य राघव ।
चित्तं विद्धि महानाभिं भ्रमतो भ्रमदायिनः ।। ५.५०.६

१३३७ तस्मिन्द्रुतमवष्टब्धे धिया पुरुषयत्नतः ।
गृहीतनाभिवहनान्मायाचक्रं निरुध्यते ।। ५.५०.७

१३३८ बाल्ययौवनवृद्धेषु दुःखेषु च सुखेषु च ।
जाग्रत्स्वप्नसुषुप्तेषु स्वसंवित्तिपरो भव ।। ५.५०.३३

१३३९ परिदीर्घासु तन्वीषु सुतीक्ष्णासु सितासु च ।
क्षुरधारोपमानासु चित्तवृत्तिषु तिष्ठ मा ।। ५.५१.१

१३४० कालेन महता क्षेत्रे जातेयं बुद्धिवल्लरी ।
वृद्धिं विवेकसेकेन नय तां नयकोविद ।। ५.५१.२

१३४१ अयि मूर्ख मनः कोऽर्थस्तव संसारवृत्तिभिः ।
धीमन्तो न निषेवन्ते पर्यन्ते दुःखदां क्रियाम् ।। ५.५२.८

१३४२ अनुधावति यो भोगांस्त्यक्त्वा शमरसायनम् ।
संत्यज्य मन्दारवनं स याति विषजङ्गलम् ।। ५.५२.९

१३४३ यदि यासि महीरन्ध्रं ब्रह्मलोकमथापि वा ।
तन्न निर्वाणमायासि विनोपशमनामृतम् ।। ५.५२ १०

१३४४ आशाशतावपूर्णत्वे त्वमेवं सर्वदुःखदम् ।
त्यज्य याहि परं श्रेयः परमेकान्तसुन्दरम् ।। ५.५२.११

१३४५ इमा विचित्राः कलना भावाभावमयात्मिकाः ।
दुःखायैव तवोग्राय न सुखाय कदाचन ।। ५.५२.१२

१३४६ यस्मात्किंचिदवाप्नोषि यस्मिन्वहसि निवृतिम् ।
तस्मिंश्चेतः शमे मूर्ख नानुबध्नासि किं पदम् ।। ५.५२.१५

१३४७ कुरङ्गालिपतङ्गेभमीनास्त्वेकैकशो हताः ।
सर्वैर्युक्तैरनर्थैस्तु व्याप्तस्याज्ञ कुतः सुखम् ।। ५.५२.२१

१३४८ हे चित्त वासनाजालं बन्धाय भवतोहितम् ।
स्वात्मनः सहजः फेनस्ततः कुकृमिणा यथा ।। ५.५२.२२

१३४९ शरदभ्रवदागत्य शुद्धिं त्यक्तभवामयाम् ।
यदि शाम्यसि निर्मूलं तदनन्तो जयस्तव ।। ५.५२.२३

१३५० करोम्यथ किमर्थं वा तवैतदनुशासनम् ।
विचारणवतः पुंसश्चित्तमस्ति हि नानघ ।। ५.५२.२५

१३५१ यावदज्ञानघनता तावत्प्रघनचित्तता ।
यावत्प्रावृड्जलदता तावन्नीहारभूरिता ।। ५.५२.२६

१३५२ यावदज्ञानतनुता तावच्चित्तस्य तानवम् ।
प्रावृट्परिक्षयो यावत्तावन्नीहारसंक्षयः ।। ५.५२.२७

१३५३ यावत्तानवमायातं शुद्धं चित्तं विचारतः ।
तावत्तत्क्षीणमेवाहं मन्ये शारदमेघवत् ।। ५.५२.२८

१३५४ तस्मात्संक्षीयमाणत्वात्त्यजामि त्वामसन्मयम् ।
मौर्ख्यं परममेवाहुः परित्याज्यानुशासनम् ।। ५.५२.३०

१३५५ निर्विकल्पोऽस्मि चिद्दीपो निरहंकारवासनः ।
त्वयाहंकारबीजेन न संबद्धोऽस्म्यसन्मय ।। ५.५२.३१

१३५६ अयं सोऽहमिति व्यर्थं दुर्दृष्टिरवलम्बिता ।
त्वया मूढविनाशाय शङ्काविषविषूचिका ।। ५.५२.३२

१३५७ अनन्तस्यात्मतत्त्वस्य तन्वीति मनसि स्थितिः ।
न संभवति बिल्वान्तर्वासितादन्तिनोर्यथा ।। ५.५२.३३

१३५८ महाश्वभ्रीव गम्भीरा दुःखदा वासनाश्रिता ।
त्वयैषा बत चित्तेति नैनामनुसराम्यहम् ।। ५.५२.३४

१३५९ वेद तत्त्वां स्वसंवेद्यमाततं दुःखकारणम् ।
विवेकजेन बोधेन तदिदं हन्यसे मया ।। ५.५२.३९

१३६० इदं मांसमिदं रक्तभिमान्यस्थीनि देहके ।
इमे ते श्वासमरुतः कोऽसावहमिती स्थितः ।। ५.५२.४०

१३६१ स्पन्दो हि वातशक्तीनामवबोधो महाचितः ।
जरा मृतिश्च कायेऽस्मिन्कोऽसावहमिति स्थितः ।। ५.५२.४१
१३६२ मांसमन्यदसृक्चान्यदस्थीन्यन्यानि चित्त हे ।
बोधोऽन्यः स्पंदनं चान्यत्कोसावहमिति स्थितः ।। ५.५२.४२
१३६३ इदं घ्राणमियं जिह्वा त्वगियं श्रवणे इमे ।
इंद चक्षुरसौ स्पर्शः कोऽसावहमिति स्थितः ।। ५.५२.४३
१३६४ यथाभूततया नाहं मनो न त्वं न वासना ।
आत्मा शुद्धचिदाभासः केवलोऽयं विजृम्भते ।। ५.५२.४४
१३६५ अहमेवेह सर्वत्र नाहं किंचिदपीह वा ।
इत्येव सन्मयी दृष्टिर्नेतरो विद्यते क्रमः ।। ५.५२.४५
१३६६ दिष्ट्येदानीं परिज्ञातो मयैवाज्ञानतस्करः ।
पुनर्न संश्रयाम्येनं स्वरूपार्थापहारिणम् ।। ५.५२.४७
१३६७ निर्दुःखो दुःखयोग्यस्य नाहं तस्य न चैष मे ।
काश्चिद्भवति शैलस्य तत्स्थ एव यथाम्बुदः ।। ५.५२.४८
१३६८ वासनाहीनमप्येतच्चक्षुरादीन्द्रियैः स्वतः ।
प्रवर्तते बहिः स्वार्थे वासना नात्र कारणम् ।। ५.५२.५९
१३६९ वासनारहितं कर्म क्रियते ननु चित्त हे ।
केवलं नानुभूयन्ते सुखदुःखदृशोऽग्रगाः ।। ५.५२.६०
१३७० तस्मान्मूर्खाणीन्द्रियाणि त्यक्त्वान्तर्वासनां निजाम् ।
कुरुध्वं कर्म हे सर्वं न दुःखं समवाप्स्यथ ।। ५.५२.६१
१३७१ भवद्भिरेव दुःखाय वासनावासिता मुधा ।
बालैः पङ्कक्रीडनकं विनाशेनेव खिन्नता ।। ५.५२.६२
१३७२ वासनाद्या दृशः सर्वा व्यक्तिरिक्तास्तु नात्मनः ।
जलादिव तरङ्गाद्या ज्ञस्यैवान्यस्य नानघ ।। ५.५२.६३
१३७३ तृष्णयैव विनष्टाः स्थ व्यर्थमिन्द्रियबालकाः ।
कोशकारकुकृमयस्तन्तुनेव स्वयंभुवा ।। ५.५२.६४
१३७४ विषयविषविषूचिकामनन्तां
निपुणमहंस्थितिवासनामपास्य ।
अभिमतपरिहारमन्त्रयुक्त्या
भव विभवो भगवान्भियामभूमिः ।। ५.५२.७०
१३७५ अपारपर्यंन्तवपुः परमाण्वणुरेव च ।

चिदचेत्या तदाक्रान्तौ न शक्ता वासनादयः ।। ५.५३.१
१३७६ मनः शेमुष्यहंकारप्रतिबिम्बैर्जडेन्द्रियैः ।
वासनावितताः शून्या वेतालत्रासनोद्यताः ।। ५.५३.२
१३७७ तत्कृतेभ्यो विचारेभ्योऽनुभूतेभ्योऽपि भूरिशः ।
भूयोऽप्यनुभवत्यन्तरहं हि चिदलेपिका ।। ५.५३.३
१३७८ स्वदुर्भावोपरचितां देहः संसारसंस्थितिम् ।
गृह‘णात्वथ त्यजतु वाप्यहं हि चिदलेपिका ।। ५.५३.४
१३७९ चितो न जन्ममरणे सर्वगायाश्रितः किल ।
किं नाम म्रियते जन्तुर्मार्यते केन वापि किम् ।। ५.५३.५
१३८० चितो न जीवितेनार्थः सर्वात्मा सर्वजीवितम् ।
किं प्राप्स्यति कदात्मैषा प्रायता यदि जीवितम् ।। ५.५३.६
१३८१ जीव्यते म्रियते चेति कुविकल्पकमालिनी ।
कलना मनसामेव नात्मनो विमलात्मनः ।। ५.५३.७
१३८२ यो ह्यहंभावतां प्राप्तो भावाभावैः स गृह्यते ।
आत्मनो नास्त्यहंभावो भावाभावाः कुतोऽस्य ते ।। ५.५३.८
१३८३ अहंभावो मुधा मोहो मनश्च मृगतृष्णिका ।
जडः पदार्थसंभारः कस्याहंकारभावना ।। ५.५३.९
१३८४ रक्तमांसमयो देहो मनो नष्टं विचारणात् ।
जडाश्चित्तादयः सर्वे कुतोऽहंभावभावना ।। ५.५३.१०
१३८५ आत्मंभरितया नित्यमिन्द्रियाणि स्थितान्यलम् ।
पदार्थाश्च पदार्थत्वे कुतोऽहंभावभावना ।। ५.५३.११
१३८६ गुणा गुणार्थे वर्तन्ते प्रकृतौ प्रकृतिः स्थिता ।
सदेव सति विश्रान्तं कुतोऽहंभावभावना ।। ५.५३.१२
१३८७ सर्वगं सर्वदेहस्थं सवेकालमयं महत् ।
केवलं परमात्मानं चिदात्मैवेह संस्थितः ।। ५.५३.१३
१३८८ एवं किमाकृतिः को वा किमादेशश्च किंकृतः ।
किंरूपः किंमयः कोहं किं गृह्णामि त्यजामि किम् ।। ५.५३.१४
१३८९ तेनाहं नाम नेहास्ति भावाभावोपपत्तिमान् ।
अनहंकाररूपस्य संबन्धः केन मे कथम् ।। ५.५३.१५
१३९० असत्यलमहंकारे संबन्धः कस्य केन कः ।
संबन्धाभावसंसिद्धौ विलीना द्वित्वकल्पना ।। ५.५३.१६

१३९१ एवं ब्रह्मात्मकमिदं यत्किंचिज्जगति स्थितम् ।
सदेवास्मि तदेवास्मि परिशोचामि किं मुधा ।। ५.५३.१७

१३९२ एकस्मिन्नेव विमले पदे सर्वगते स्थिते ।
अहंकारकलङ्कस्य कथं नामोदयः कुतः ।। ५.५३.१८

१३९३ आत्मनो व्यतिरेकेण न किंचिदपि विद्यते ।
सर्वं ब्रह्मेति मे तत्त्वमेतत्तद्भावयाम्यहम् ।। ५.५३.२४

१३९४ अहंकारभ्रमस्यास्य जातस्याकाशवर्णवत् ।
अपुनःस्मरणं मन्ये नूनं विस्मरणं वरम् ।। ५.५३.२५

१३९५ मयैवेहासदभ्यासान्मिथ्या सदिव लक्ष्यसे ।
मृगतृष्णेव तेनैतत्त्वत्कृतं मत्कृतं भवेत् ।। ५.५३.४५

१३९६ यदिदं किंचिदाभोगि तत्सर्वं दृश्यमण्डलम् ।
अवस्त्विति विनिर्णीय मनो यात्यमनःपदम् ।। ५.५३.४६

१३९७ अवस्त्विदमिती स्फारे रूढे मनसि निश्चये ।
हेमन्त इव मञ्जर्यः क्षीयन्ते भोगवासनाः ।। ५.५३.४७

१३९८ चित्त्वाद्दृष्टात्मना नूनं संत्यक्तमननौजसा ।
मनसा वीतरागेण स्वयं स्वस्थेन भूयते ।। ५.५३.४८

१३९९ परमात्मानले क्षिप्तं संवृत्त्यावयवं स्वयम् ।
दग्ध्वात्मानमलं चित्तं शुद्धतामेति शाश्वतीम् ।। ५.५३.४९

१४०० नाहं देह इति त्वस्मिन्युक्तिमाकर्णय क्रमे ।
सर्वाङ्गेष्वपि सत्स्वेव शवः कस्मान्न वल्गति ।। ५.५३.७१

१४०१ तस्माद्देहादतीतोऽहं नित्योऽनस्तमितद्युतिः ।
यः सङ्गं भास्वता प्राप्य वेद्मि व्योमनि भास्करम् ।। ५.५३.७२

१४०२ यत्रात्मा तत्र न मनो नेन्द्रियाणि न वासनाः ।
पामराः परितिष्ठन्ति निकटे न महीभृतः ।। ५.५३.७४

१४०३ यदा संक्षीयते चित्तमभावात्यन्तभावनात् ।
चित्सामान्यस्वरूपस्य सत्तासामान्यता तदा ।। ५.५५.२

१४०४ नूनं चेत्यांशरहिता चिद्यदात्मनि लीयते ।
असद्रूपवदत्यच्छा सत्तासामान्यता तदा ।। ५.५५.३

१४०५ यदा सर्वमिदं किंचित्सबाह्याभ्यन्तरात्मकम् ।
अपलप्य वसेच्चेतः सत्तासामान्यता तदा ।। ५.५५.४

१४०६ यदा सर्वाणि दृश्यानि सत्तासामान्यवेदनम् ।

स्वरूपेण स्वरूपाभं सत्तासामान्यता तदा ।। ५.५५.५

१४०७ कूर्मोऽङ्गानीव दृश्यानि लीयन्ते स्वात्मनात्मनि ।
अभावितान्येव यदा सत्तासामान्यता तदा ।। ५.५५.६

१४०८ दृष्टिरेषा हि परमा सदेहादेहयोः सदा ।
मुक्तयोः संभवत्येव तुर्यातीतपदोपमा ।। ५.५५.७

१४०९ व्युत्थितस्य भवत्येषा समाधिस्थस्य चानघ ।
ज्ञस्य केवलमज्ञस्य न भवत्येव बोधजा ।। ५.५५.८

१४१० अस्यां दृशि स्थिताः सर्वे जीवन्मुक्ता महाशयाः ।
सिद्धा रसा इव भुवि व्योमवीथ्यामिवानिला : ।। ५.५५.९

१४११ अस्मत्प्रभृतयः सर्वे नारदाद्याश्च राघव ।
ब्रह्मविष्णवीश्वराद्याश्च दृष्टावस्यां व्यवस्थिताः ।। ५.५५.१०

१४१२ मनोहंकारविलये सर्वभावान्तरस्थिता ।
समुदेति परानन्दा या तनुः पारमेश्वरी ।। ५.६४.५१

१४१३ सा स्वयं योगसंसिद्धा सुषुप्तादूरभाविनी ।
न गम्या वचसां राम हृद्येवेहानुभुयते ।। ५.६४.५२

१४१४ अनुभूतिं विना तत्त्वं खण्डादेर्नानुभूयते ।
अनुभूतिं विना रूपं नात्मनश्चानुभूयते ।। ५.६४.५३

१४१५ अखिलमिदमनन्तमात्मतत्त्वं
दृढपरिणामिनि चेतसि स्थितेऽन्तः ।
बहिरुपशमिते चराचरात्मा
स्वयमनुभूयत एव देवदेवः ।। ५.६४.५४

१४१६ तदनु विषयवासनाविनाश-
स्तदनु शुभः परमः स्फुटप्रकाशः ।
तदनु च समतावशात्स्वरूपे
परिणमनं महातामचिन्त्यरूपम् ।। ५.६४.५५

१४१७ देहभावनयैवात्मा देहदुःखवशे स्थितः ।
तत्त्यागेन ततो मुक्तो भवतीति विदुर्बुधाः ।। ५.६७.२६

१४१८ अन्तःसङ्गो हि संसारे सर्वेषां राम देहिनाम् ।
जरामरणमोहानां तरूणां बीजकारणम् ।। ५.६७.२९

१४१९ अन्तःसंसङ्गवाञ्जन्तुर्मग्नः संसारसागरे ।
अन्तःसंसक्तिमुक्तस्तु तीर्णः संसारसागरात् ।। ५.६७.३०

१४२० अन्तःसंसङ्गवच्चित्तं शतशाखमिवोच्यते ।
अन्तःसंसङ्गरहितं विलीनं चित्तमुच्यते ।। ५.६७.३१
१४२१ भग्नस्फटिकवद्विद्धि मनः सक्तमपावनम् ।
अभग्नस्फटिकाभासमसक्तं विद्धि मे मनः ।। ५.६७.३२
१४२२ यावत्तुर्यपरामर्शस्तावत्केवलतापदम् ।
जीवन्मुक्तस्य विषयो वचसां च रघूद्वह ।। ५.७१.१
१४२३ अत ऊर्ध्वमदेहानां मुक्तानां वचसां तथा ।
विषयो न महाबाहो पुरुषाणामिवाम्बरम् ।। ५.७१.२
१४२४ संनिवेशांशवैचित्र्यमज्ञानामेव तुष्टये ।
तज्ज्ञानां तु यथाभूतभूतपञ्चकदर्शनम् ।। ५.७२.१२
१४२५ मिथः शिलापुत्रकयोर्यथैकोपलपुत्रयोः।
श्लिष्टयोरपि नो रागस्तथा चित्तशरीरयोः ।। ५.७२.१३
१४२६ अहंकारदृशावेते सात्त्विके द्वेऽतिनिर्मले ।
तत्त्वज्ञानात्प्रवर्तेते मोक्षदे पारमार्थिके ।। ५.७३.९
१४२७ परोऽणुः सकलातीतरूपोऽहं चेत्यहंकृतिः ।
प्रथमा सर्वमेवाहमित्यन्योक्ता रघूद्वह ।। ५.७३.१०
१४२८ अहंकारदृगन्या तु तृतीया विद्यतेऽनघ ।
देहोऽहमिति तां विद्धि दुःखायैव न शान्तये ।। ५.७३.११
१४२९ अथ चैतत्त्रयमपि त्यक्त्वा सकलसिद्धये ।
यच्छेषं तदुपालम्ब्य तिष्ठावष्टब्धतत्परः ।। ५.७३.१२
१४३० स्वानुभूत्यैव पश्याशु स एवासि सदोदितः ।
साशयं हृदयग्रन्थिं त्यज तत्त्वविदांवर ।। ५.७३.१४
१४३१ नात्मास्त्यनुमया राम न चाप्तवचनादिना ।
सर्वदा सर्वथा सर्वं स प्रत्यक्षोऽनुभूतितः ।। ५.७३.१५
१४३२ यदिदं स्पर्शनं स्पन्दं किंचिद्यत्संविदाद्यपि ।
तत्सर्वमात्मा भगवान्दृश्यदर्शनवर्जितः ।। ५.७३.१६
१४३३ सत्स्वनन्तपदार्थेषु जीवत्वेनाभिबिम्बति ।
आत्मा पुर्यष्टकादर्शे स्वभाववशतः स्वतः ।। ५.७३.२१
१४३४ पुर्यष्टकोदयादेव स्वयमात्मानुभूयते ।
सर्वदा सर्वसंस्थः खे घनास्पन्दादिवानिलः ।। ५.७३.२२
१४३५ चिदात्मा सर्वगो व्यापी न क्वचिन्नाम संस्थितः ।

यद्वत्सर्वपदार्थानां सत्ता तद्वन्महेश्वरः ।। ५.७३.२३
१४३६ सति पुर्यष्टके तस्मिञ्जीवः स्फुरति नोपले ।
सति वायाविव रजः सति दीप इवेक्षणम् ।। ५.७३.२४
१४३७ इयं पुर्यष्टके स्वेच्छा स्वात्मन्येवात्मनि स्थिते ।
सति स्फुरत्यभ्युदिते भानाविव जनैषणा ।। ५.७३.२५
१४३८ यदि सूर्ये स्थिते व्योम्नि तादृशोचितसंस्थितिः ।
नश्यति व्यवहारोऽयं भास्करे तत्किमागतम् ।। ५.७३.२६
१४३९ यद्यात्मनि स्थिते देवे तत्सत्ता लब्धसंस्थितिः ।
देहो नाशमुपायाति तत्किं नष्टमिहात्मनि ।। ५.७३.२७
१४४० न जायते न म्रियते नादत्ते नाभिवाञ्छति ।
न मुक्तो न च बद्धोऽयमात्मा सर्वस्य सर्वदा ।। ५.७३.२८
१४४१ आत्माप्रबोधाभ्युदिता निरात्मन्यात्मतां गता ।
सर्परज्जुभ्रमाकारा भ्रान्तिर्दुःखाय केवलम् ।। ५.७३.२९
१४४२ अनादित्वान्न जातोऽयमजातत्वान्न नश्यति ।
आत्मात्मव्यतिरिक्तं तु नाभिवाञ्छत्यसंभवात् ।। ५.७३.३०
१४४३ दिक्कालाद्यनवच्छेदान्न बद्धोऽयं कदाचन ।
बन्धाभावे क्व मुक्तिः स्यादमोक्षस्तेन संस्थितः ।। ५.७३.३१
१४४४ न मोक्षो नभसः पृष्ठे न पाताले न भूतले ।
मोक्षो हि चेतो विमलं सम्यग्ज्ञानविबोधितम् ।। ५.७३.३५
१४४५ सकलाशास्वसंसक्त्या यत्स्वयं चेतसः क्षयः ।
स मोक्षनाम्ना कथितस्तत्त्वज्ञैरात्मदर्शिभिः ।। ५.७३.३६
१४४६ यावत्प्रबोधो विमलो नोदितस्तावदेव सः ।
मौर्ख्याद्दीनतया राम भक्त्या मोक्षोभिवाञ्छ्यते ।। ५.७३.३७
१४४७ परं प्रबोधमासाद्य चित्ते चित्तत्त्वतां गते ।
दश मोक्षा न वाञ्छ्यन्ते किमुतैको हि मोक्षकः ।। ५.७३.३८
१४४८ अयं मोक्षस्त्वयं बन्धः पेलवां कलनामिति ।
परित्यज्य महात्यागी स त्वमेव भवाभव ।। ५.७३.३९
१४४९ मनो बुद्धिरहंकारो वासनाश्चेन्द्रियाण्यपि ।
एवंकलितनामाङ्कैः स्फुरत्यात्माब्धिरम्बुभिः ।। ५.७४.४
१४५० चित्ताहंकारयोर्द्वित्वं वचस्यस्ति न वस्तुतः ।
यच्चित्तं स ह्यहंकारो योऽहंकारो मनो हि तत् ।। ५.७४.५

१४५१ व्यतिरिक्तं हिमाच्छौक्ल्यमिति संकल्प्यते यथा ।
मुधैव कल्प्यते भेदश्चित्ताहंकारयोस्तथा ।। ५.७४.६

१४५२ मनोहंकारयोरन्तर्द्वयोरेकतरक्षये ।
क्षीणे द्वे एव हि यथा पटशौक्ल्ये पटक्षये ।। ५.७४.७

१४५३ तुच्छां मोक्षधियं त्यक्त्वा बन्धबुद्धिं तथैषणाम् ।
स्ववैराग्यविवेकाभ्यां केवलं क्षपयेन्मनः ।। ५.७४.८

१४५४ मोक्षो मेऽस्त्विति चिन्तान्तर्जाता चेदुत्थितं मनः ।
मननोत्के मनस्युच्चैर्वपुर्दोषाय केवलम् ।। ५.७४.९

१४५५ आत्मन्यतीते सर्वस्मात्सर्वभूतेऽथवा तते ।
को बन्धः कश्च वा मोक्षो निर्मूलं मननं कुरु ।। ५.७४.१०

१४५६ इदमेवास्त्विदं मास्तु ममेति हृदि रञ्जना ।
न यस्यास्ति तमात्मेशं तोलयन्ति कथं जनाः ।। ५.७४.५०

१४५७ अयत्नोपनतं सर्वं लीलयाऽसक्तमानसः ।
भुङ्क्ते भोगभरं प्राज्ञस्त्वालोकमिव लोचनम् ।। ५.७४.६३

१४५८ सम्यग्दृष्टपथं तज्ज्ञं सुखदुःखमती मनाक् ।
द्वे वीच्याविव शैलेन्द्रं क्षोभं नेतुं न शक्नुतः ।। ५.७४.६५

१४५९ कलङ्क्यन्तःकलङ्केन प्रोच्यते हेम नान्यथा ।
भावासक्त्या समासक्त उक्तो जन्तुर्हि नान्यथा ।। ५.७४.७०

१४६० सकृत्प्रभातं विमलं यज्ज्ञातं ज्ञातमेव तत् ।
नहि बन्धुः परिज्ञातः पुनरज्ञातततां व्रजेत् ।। ५.७४.७२

१४६१ क्षीणे स्वहृदयग्रन्थौ न बन्धोऽस्ति पुनर्गुणैः ।
यत्नेनापि पुनर्बद्धं केन वृन्ते च्युतं फलम् ।। ५.७४.७५

१४६२ ब्रह्मणः समुपायान्ति जगन्तीमानि राघव ।
स्थैर्यं यान्त्यविवेकेन शाम्यन्त्येव विवेकतः ।। ५.७६.१

१४६३ जगज्जालजलावर्तवृत्तयो ब्रह्मवारिधौ ।
संख्यातुं केन शक्यन्ते भासां च त्रसरेणवः ।। ५.७६.२

१४६४ असम्यक्प्रेक्षणं विद्धि कारणं जगतः स्थितौ ।
संसारशान्तये कान्त कारणं सम्यगीक्षणम् ।। ५.७६.३

१४६५ अयं हि परदुष्पारो घोरः संसारसागरः ।
विना युक्तिप्रयत्नाभ्यामस्माद्राम न तीर्यते ।। ५.७६.४

१४६६ सत्यां प्रज्ञामहानावि विवेके सति नाविके ।
संसारसागरादस्माद्यो न तीर्णो धिगस्तु तम् ।। ५.७६.१३

१४६७ अपारावारमाक्रम्य प्रमेयीकृत्य सर्वतः ।
संसाराब्धिं गाहते यः स एव पुरुषः स्मृतः ।। ५.७६.१४

१४६८ विचार्यार्यैः सहालोक्य धिया संसारसागरम् ।
एतस्मिंस्तदनु क्रीडा शोभते राम नान्यथा ।। ५.७६.१५

१४६९ यथालातपरिस्पन्दादग्निचक्रं प्रदृश्यते ।
असदेव सदाभासं चित्तस्पन्दात्तथा जगत् ।। ५.७८.१

१४७० यथा जलपरिस्पन्दाद्व्यतिरिक्त इवाम्भसः ।
दृश्यते वर्तुलावर्तश्चित्तस्पन्दात्तथा जगत् ।। ५.७८.२

१४७१ येन प्रस्पन्दते चित्तं येन न स्पन्दते तथा ।
तद्ब्रह्मन्ब्रूहि मे येन चिकित्सेयं तदेव हि ।। ५.७८.४

१४७२ यथा शौक्ल्यहिमे राम तिलतैललवौ यथा ।
यथा कुसुमसौगन्ध्ये तथौष्ण्यदहनौ यथा ।। ५.७८.५

१४७३ तथा राघव संश्लिष्टौ चित्तस्पन्दौ तथैव हि ।
अभिनौ केवलं मिथ्या भेदः कल्पित एतयोः ।। ५.७८.६

१४७४ चित्तचित्तपरिस्पन्दपक्षयोरेकसंक्षये ।
स्वयं गुणगुणी स्थित्वा नश्यतो द्वौ न संशयः ।। ५.७८.७

१४७५ द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघव ।
योगस्तद्वृत्तिरोधो हि ज्ञानं सम्यगवेक्षणम् ।। ५.७८.८

१४७६ ओंकारोच्चारणप्रान्तशब्दतत्त्वानुभावनात् ।
सुषुप्ते संविदो जाते प्राणस्पन्दो निरुद्ध्यते ।। ५.७८.२१

१४७७ ब्रह्मन् जगति भूतानां हृदयं तत्किमुच्यते ।
इदं सर्वं महादर्शे यस्मिंस्तत्प्रतिबिम्बति ।। ५.७८.३२

१४७८ साधो जगति भूतानां हृदयं द्विविधं स्मृतम् ।
उपादेयं च हेयं च विभागोऽयं तयोः शृणु ।। ५.७८.३३

१४७९ इयत्तया परिच्छिन्ने देहे यद्वक्षसोऽन्तरम् ।
हेयं तद्धृदयं विद्धि तनावेकतटे स्थितम् ।। ५.७८.३४

१४८० संविन्मात्रं तु हृदयमुपादेयं स्थितं स्मृतम् ।
तदन्तरे च बाह्ये च न च बाह्ये न चान्तरे ।। ५.७८.३५

१४८१ तत्तु प्रधानं हृदयं तत्रेदं समवस्थितम् ।
तदादर्शः पदार्थानां तत्कोशः सर्वसंपदाम् ।। ५.७८.३६

१४८२ सर्वेषामेव जन्तूनां संविद्धृदयमुच्यते ।
न देहावयवैकांशो जडजीर्णोपलोपमः ।। ५.७८.३७

१४८३ तस्मात्संविन्मये शुद्धे हृदये हृतवासनः ।
बलान्नियोजिते चित्ते प्राणस्पन्दो निरुद्ध्यते ।। ५.७८.३८

१४८४ यत्र सर्वं यतः सर्वं यत्सर्वं सर्वतश्च यत् ।
यत्र नेदं यतो नेदं यन्नेदं नेदृशं जगत् ।। ५.७८.५०

१४८५ विनाशित्वाद्विकल्पत्वाद्गुणित्वान्निर्गुणात्मनः ।
यस्य नो सदृशो दृष्टो दृष्टान्तः कश्चिदेव हि ।। ५.७८.५१

१४८६ स्वादनी सर्वशालीनां दीपिका सर्वतेजसाम् ।
कलना सर्वकामानामन्तश्चिच्चन्द्रिकोदिता ।। ५.७८.५२

१४८७ यस्मात्कल्पतरोर्बह्व्यः संसारफलपङ्क्तयः ।
अनारतं बहुरसा जायन्ते च पतन्ति च ।। ५.७८.५३

१४८८ तत्पदं सर्वसीमान्तमवलम्ब्य महामतिः ।
यः स्थितः स्थिरधीस्तज्ज्ञः स जीवन्मुक्त उच्यते ।। ५.७८.५४

१४८९ विगतसर्वसमीहितकौतुकः
समुपशान्तहिताहितकल्पनः ।
सकलसंव्यवहारसमाशयो
भवति मुक्तमनाः पुरुषोत्तमः ।। ५.७८.५५

१४९० असम्यग्वेदनाज्जन्म मोक्षः सम्यगवेक्षणात् ।
असम्यग्वेदनाद्रज्जुः सर्पो नो सम्यगीक्षणात् ।। ५.७९.४

१४९१ संकल्पांशविनिर्मुक्ता संवित्संवेद्यवर्जिता ।
संवित्त्याभिसमाख्याता मुक्तावस्तीह नेतरत् ।। ५.७९.५

१४९२ सा शुद्धरूपा विज्ञाता परमात्मेति कथ्यते ।
शुद्धा त्वशुद्धरूपान्तरविद्येत्युच्यते बुधैः ।। ५.७९.६

१४९३ संवित्तिरेव संवेद्यं नानयोर्द्वित्वकल्पना ।
चिनोत्यात्मानमात्मैव रामैवं नान्यदस्ति हि ।। ५.७९.७

१४९४ परं व्योमेदमखिलं जगत्स्थावरजङ्गमम् ।
सुखदुःखक्रमः कुत्र विज्वरो भव राघव ।। ५.७९.१४

१४९५ द्वैताद्वैतसमुद्भूतैर्जरामरणविभ्रमैः ।
स्फुरत्यात्मभिरात्मैव चित्रैरम्बिव वीचिभिः ।। ५.७९.१५

१४९६ जगदात्मैव सकलमविद्या नास्ति कुत्रचित् ।

इति दृष्टिमवष्टभ्य सम्यग्रूपः स्थिरो भव ।। ५.७९.१९

१४९७ आत्मैवेदं जगदिति सत्यं चित्तेन मार्जितम् ।
उत्थितं स्यात्कुतश्चित्तमहो चित्तमवस्तु यत् ।। ५.८१.२

१४९८ अविद्यत्वादचित्तत्वान्मायात्वाच्चासदेव हि ।
ध्रुवं नास्त्येव वा चित्तं भ्रमादन्यत्खवृक्षवत् ।। ५.८१.३

१४९९ सिद्धः स्थाणुपरिस्पन्दो नौगतस्य यथा शिशोः ।
अबुद्धस्य न बुद्धस्य तथा चित्तमसन्मयम् ।। ५.८१.४

१५०० सत्यावलोकनाज्जाते चित्तजाड्यदृशोः क्षये ।
संपद्यते यत्तु तज्ज्ं स्वसंवेदनमात्रकम् ।। ५.८२.५६

१५०१ तेन मूढ न कर्तुत्वं न भोक्तृत्वं तवापि हि ।
तदेवासि परं ब्रह्म त्यज मौर्ख्यं भवात्मवान् ।। ५.८२.५७

१५०२ केवलं ज्ञत्वविषयमुपदेशार्थसिद्धये
त्वया करणभूतेन करोत्यात्मेति कथ्यते ।। ५.८२.५८

१५०३ निरानन्दोऽपि सानन्दः सच्चासच्चापि तत्र सः ।
आसीन्न किंचित्किंचित्तत्प्रकाशस्तिमिरं यथा ।। ५.८७.१५

१५०४ अचिन्मयं चिन्मयं च नेति नेति यदुच्यते ।
ततस्तत्संबभूवासौ यद्गिरामप्यगोचरः ।। ५.८७.१६

१५०५ कच्चिद्गृहीतो भवता मद्गिरामर्थ ईदृशः ।
त्यक्त्वा दुर्बोधमक्षीणो हंसेनेवाम्भसः पयः ।। ६पू.१.२४

१५०६ ब्रह्मबृंहैव हि जगज्जगच्च ब्रह्मबृंहणम् ।
विद्यते नानयोर्भेदश्चिद्घनब्रह्मणोरिव ।। ६पू.२.५१

१५०७ चिदन्तरस्ति त्रिजगन्मरिचे तीक्ष्णता यथा ।
नातश्चिज्जगती भिन्ने तस्मात्सदसती मुधा ।। ६पू.२.५२

१५०८ शब्दशब्दार्थसंकेतवासनेह न संविदा ।
चिद्व्योमत्वादुभे भातस्त्यजातः सदसन्मती ।। ६पू.२.५३

१५०९ भाविभूरितरङ्गाणां पयोवृन्दमिवाम्बुधौ
या चिद्वहत्यनन्तानि जगन्त्यनघ सो भवान् ।। ६पू.३.१

१५१० भव भावनया मुक्तो भावाभावविवर्जितः ।
चिदात्मन्संस्थिताः क्वेव वद ते वासनादयः ।। ६पू.३.२

१५११ जीवोऽयं वासनादीदमिति चित्कचति स्वतः ।
इतरोक्त्यर्थयोरत्र कः प्रसङ्गोऽङ्ग कथ्यताम् ।। ६पू.३.३

१५१२ आलोकश्च प्रकाशाङ्गदनुभूतिस्तथा चितेः।
जलाद्वीचिर्यथाऽभिन्ना चित्स्वभावात्तथा जगत् ।। ६पू.३.६
१५१३ चितो न भिन्नोऽनुभवो भिन्नो नानुभवादहम् ।
न मत्तो भिद्यते जीवो न जीवाद्भिद्यते मनः ।। ६पू.३.७
१५१४ मनसो नेन्द्रियं भिन्नं पृथग्देहश्च नेन्द्रियात् ।
न शरीराज्जगद्भिन्नं जगतो नान्यदस्ति हि ।। ६पू.३.८
१५१५ एवं प्रवर्तितमिदं महच्चक्रमिदं चिरम् ।
नच प्रवर्तितं किंचिन्न च शीघ्रं च नो चिरम् ।। ६पू.३.९
१५१६ य एवातितरां शत्रुः सत्वरं मारणोद्यतः ।
तमेवाकृत्रिमं मित्रं यः पश्यति स पश्यति ।। ६पू.३.१६
१५१७ यन्नास्ति तस्य सद्भावप्रतिपत्तिरुदाहृता ।
मायेति सा परिज्ञानादेव नश्यत्यसंशयम् ।। ६पू.३.२०
१५१८ उदेत्यविद्या विद्यायाः सलिलादिव बुद्बुदः ।
विद्यायां लीयतेऽविद्या पयसीव हि बुद्बुदः ।। ६पू.९.१६
१५१९ पयस्तरङ्गयोर्द्वित्वभावनादेव भिन्नता ।
विद्याविद्यादृशोर्भेदभावनादेव भिन्नता ।। ६पू.९.१७
१५२० पयस्तरङ्गयोरैक्यं यथैव परमार्थतः ।
नाविद्यात्वं न विद्यात्वमिह किंचन विद्यते ।। ६पू.९.१८
१५२१ विद्याविद्यादृशौ त्यक्त्वा यदस्तीह तदस्ति हि ।
प्रतियोगिव्यवच्छेदवशादेतद्रघूद्वह ।। ६पू.९.१९
१५२२ विद्याविद्यादृशौ न स्तः शेषे बद्धपदो भव ।
नाविद्यास्ति न विद्यास्ति कृतं कल्पनयानया ।। ६पू.९.२०
१५२३ अज्ञस्य दुःखौघमयं ज्ञस्यानन्दमयं जगत् ।
अन्धं भुवनमन्धस्य प्रकाशं तु सचक्षुषः ।। ६पू.११.३२-३३
१५२४ आभासमात्रममलं सर्वभूतात्मबोधकम् ।। ६पू.११.६७
१५२५ सर्वत्रावस्थितं शान्तं चिद्ब्रह्मेत्यनुभूयते ।
मनोबुद्धीन्द्रियव्रातसमस्तकलनान्वितम् ।। ६पू.११.६८
१५२६ अनारतगलत्स्वच्छचिद्धारागहनात्मकम् ।।
आलोकः सुमनोमौनं चिद्ब्रह्मास्म्यमृतं परम् ।
अनारतगलद्रूपं नित्यं चानुभवामृतम् ।। ६पू.११.७०-७१

१५२७ संभोगोत्तममाभासं चिद्ब्रह्मास्म्यपवासनम् ।
खण्डादिस्वादुसंवित्तिरीषन्मात्रा तु तिष्ठति ।।
चित्तादिष्ववबुद्धेषु तद्धि ब्रह्माहमच्युतः । ६पू.११.७३-७४
१५२८ संसारोत्तरणे युक्तिर्योगशब्देन कथ्यते ।
तां विद्धि द्विप्रकारां त्वं चित्तोपशमधर्मिणीम् ।। ६पू.१३.३
१५२९ आत्मज्ञानं प्रकारोऽस्या एकः प्रकटितो भुवि ।
द्वितीयः प्राणसंरोधः शृणु योऽयं मयोच्यते ।। ६पू.१३.४
१५३० प्रकारौ द्वावपि प्रोक्तौ योगशब्देन यद्यपि ।
तथापि रूढिमायातः प्राणयुक्तावसौ भृशम् ।। ६पू.१३.६
१५३१ एको योगस्तथा ज्ञानं संसारोत्तरणक्रमे ।
समावुपायौ द्वावेव प्रोक्तावेकफलप्रदौ ।। ६पू.१३.७
१५३२ असाध्यः कस्यचिद्योगः कस्यचिज्ज्ञाननिश्चयः ।
मम त्वभिमतः साधो सुसाध्यो ज्ञाननिश्चयः ।। ६पू.१३.८
१५३३ अज्ञानं पुनरज्ञातं स्वप्नेष्वपि न तद्भवेत ।
ज्ञानं सर्वास्ववस्थासु नित्यमेव प्रवर्तते ।। ६पू.१३.९
१५३४ आज्ञाचरणमेवाहुर्मुख्यमाराधनं सताम् ।। ६पू.२३.४
१५३५ यस्मिन्सर्व यतः सर्वं यत्सर्वं सर्वतश्च यत् ।
यच्च सर्वमयं नित्यं तच्चित्तत्त्वमुपास्महे ।। ६पू.२५.६६
१५३६ यदि नास्ति विकारादि ब्रह्मन्ब्रह्मणि बृंहिते ।
तदिदं कथमाभाति भावाभावमयं जगत् ।। ६पू.४९.१
१५३७ अपुनःप्रागवस्थानं यत्स्वरूपविपर्ययः ।
तद्विकारादिकं तात यत्क्षीरादिषु वर्तते ।। ६पू.४९.२
१५३८ पयस्तां पुनरभ्येति दधित्वान्न पुनः पयः ।
बुद्धमाद्यन्तमध्येषु ब्रह्म ब्रह्मैव निर्मलम् ।। ६पू.४९.३
१५३९ क्षीरादेरिव तेनास्ति ब्रह्मणो न विकारिता ।
अनाद्यन्तविभागस्य न चैषोऽवयविक्रमः ।। ६पू.४९.४
१५४० समस्याद्यन्तयोर्येयं दृश्यते विकृतिः क्षणात् ।
संविदः संभ्रमं विद्धि नाविकारेऽस्ति विक्रिया ।। ६पू.४९.५
१५४१ न संवेद्यं न संवित्तिस्तत्र ब्रह्मणि विद्यते ।
तद्ब्रह्मशब्दकथितं निःसंबन्धचिदात्मवत् ।। ६पू.४९.६

१५४२ यादृगाद्यन्तयोर्वस्तु तादृगेव तदुच्यते ।
मध्ये यस्य यदन्यत्वं तदबोधाद्विजृम्भितम् ।। ६पू.४९.७
१५४३ आत्मा त्वाद्यन्तमध्येषु समः सर्वत्र सर्वदा ।
स्वमप्यन्यत्वमायाति नात्मतत्त्वं कदाचन ।। ६पू.४९.८
१५४४ अरूपत्वात्तथैकत्वान्नित्यत्वादयमीश्वरः ।
वशं भावविकाराणां न कदाचन गच्छति ।। ६पू.४९.९
१५४५ विद्यमाने सदैकस्मिन्ब्रह्मण्येकान्तनिर्मले ।
संविद्भ्रमस्वरूपाया अविद्यायाः क आगमः ।। ६पू.४९.१०
१५४६ ब्रह्मतत्त्वमिदं सर्वमासीदस्ति भविष्यति ।
निर्विकारमनाद्यन्तं नाविद्यास्तीति निश्चयः ।। ६पू.४९.११
१५४७ यस्तु ब्रह्मेति शब्देन वाच्यवाचकयोः क्रमः ।
तत्रापि नान्यताभावमुपदेष्टुं क्रमो ह्यसौ ।। ६पू.४९.१२
१५४८ त्वमहं जगदाशाश्च द्यौर्भूश्चाप्यनलादि वा ।
ब्रह्ममात्रमनाद्यन्तं नाविद्यास्ति मनागपि ।। ६पू.४९.१३
१५४९ नामैवेदमविद्येति भ्रममात्रमसद्विदुः ।
न विद्यते या सा सत्या कीदृग्नाम भवेत्किल ।। ६पू.४९.१४
१५५० उपशमप्रकरणे ह्यस्तने तु त्वयेरितम् ।
अविद्येयं तथेत्थं च विचार्यत इति प्रभो ।। ६पू.४९.१५
१५५१ एतावन्तमबुद्धस्त्वमभूः कालं रघूद्वह ।
कल्पिताभिः किलैताभिर्बोधितोसि स्वयुक्तिभिः ।। ६पू.४९.१६
१५५२ अविद्येयमयं जीव इत्यादिकलनाक्रमः।
अप्रबुद्धप्रबोधाय कल्पितो वाग्विदां वरैः ।। ६पू.४९.१७
१५५३ अप्रबुद्धं मनो यावत्तावदेव भ्रमं विना ।
न प्रबोधमुपायाति तदाक्रोशशतैरपि ।। ६पू.४९.१८
१५५४ युक्त्यैव बोधयित्वैष जीव आत्मनि योज्यते ।
यद्युक्त्यासाद्यते कार्यं न तद्यत्नशतैरपि ।। ६पू.४९.१९
१५५५ सर्वं ब्रह्मेति यो ब्रूयादप्रबुद्धस्य दुर्मतेः ।
स करोति सुहृद्वृत्त्या स्थाणोर्दुःखनिवेदनम् ।। ६पू.४९.२०
१५५६ युक्त्या प्रबोध्यते मूढः प्राज्ञस्तत्त्वेन बोध्यते ।
मूढः प्राज्ञत्वमायाति न युक्त्या बोधनं विना ।। ६पू.४९.२१
१५५७ एतावन्तमबुद्धस्त्वं कालं युक्त्या प्रबोधितः ।

इदानीं संप्रबुद्धस्त्वं मया येनावबोध्यसे ।। ६पू.४९.२२
१५५८ ब्रह्माहं त्रिजगद्ब्रह्म त्वं ब्रह्म खलु दृश्यभूः ।
द्वितीया कलना नास्ति यथेच्छसि तथा कुरु ।। ६पू.४९.२३
१५५९ असंवेद्यमहासंवित्कोटिमात्रं जगत्त्रयम् ।
एकप्रत्ययवानन्तः कुर्वन्नपि न लिप्यसे ।। ६पू.४९.२४
१५६० भारूपश्चेतनो व्यापी परमात्माहमित्ययम् ।
राघवानुभवान्तस्त्वं तिष्ठन्गच्छञ्छ्वसन्स्वपन् ।। ६पू.४९.२५
१५६१ निर्ममो निरहंकारो बुद्धिमानसि साधु चेत् ।
तद्ब्रह्म वेदनं शान्तं सर्वभूतस्थितं भव ।। ६पू.४९.२६
१५६२ तदनाद्यन्तमाभासं सत्त्वमेव परं पदम् ।
स्थितोऽसि सर्वगैकात्मशुद्धसंविन्मयात्मकः ।। ६पू.४९.२७
१५६३ यद्ब्रह्मात्मापि तुर्यश्च याऽविद्या प्रकृतिश्च या ।
तदभिन्नसदैकात्म यथा कुम्भशतेषु मृत् ।। ६पू.४९.२८
१५६४ नात्मनः प्रकृतिर्भिन्ना घटान्मृन्मयता यथा ।
सन्मृन्मात्रं यथा चान्तरात्मैवं प्रकृतिः स्थिता ।। ६पू.४९.२९
१५६५ आवर्तः सलिलस्येव यः स्पन्दस्त्वयमात्मनः ।
प्रोक्तः प्रकृतिशब्देन तेनैवेह स एव हि ।। ६पू.४९.३०
१५६६ यथैकः स्पन्दपवनौ नाम्ना भिन्नौ न सत्तया ।
तथैकमात्मप्रकृती नाम्ना भिन्ने न सत्तया ।। ६पू.४९.३१
१५६७ अबोधादेतयोर्भेदो बोधेनैव विलीयते ।
अबोधात्सन्मयो याति रज्ज्वां सर्पभ्रमो यथा ।। ६पू.४९.३२
१५६८ चित्क्षेत्रे कलनाबीजं येदतत्पतति स्फुरन् ।
चित्ताङ्कुरं तदेतस्माद्भाविसंसारखण्डकः ।। ६पू.४९.३३
१५६९ एतदेवात्मविज्ञानाद्दग्धं सद्वासनाजलैः ।
संसिक्तमपि यत्नेन न भवत्यङ्कुरक्षमम् ।। ६पू.४९.३४
१५७० नो चेत्पतति चित्क्षेत्रे कलनाबीजकं ततः ।
चित्ताङ्कुरा न जायन्ते सुखदुःखलवद्रुमाः ।। ६पू.४९.३५
१५७१ द्वित्वं जगत्यसदुपात्तमबोधजातं
बोधक्षयं जहिहि बोधमुपागतोऽसि ।
आत्मैकभावविभवेन भवाभयात्मा
नास्त्येव दुःखमिति नः परमार्थसारः ।। ६पू.४९.३६

१५७२ एतां दृष्टिमवष्टभ्य राघवाऽघविनाशिनीम् ।

तिष्ठ निःसङ्गसंन्यासब्रह्मार्पणमयात्मकः ।। ६पू.५९.१

१५७३ यस्मिन्सर्वं यतः सर्वं यः सर्वं सर्वतश्च यः ।

यश्च सर्वमयो नित्यमात्मानं विद्धि तं परम् ।। ६पू.५९.२

१५७४ दूरस्थमप्यदूरस्थं सर्वगं तत्स्थमेव च ।

तत्स्थः सत्तामवाप्नोषि तदेवास्यस्तसंशयः ।। ६.पू.५९.३

१५७५ यत्संवेद्यविनिर्मुक्तं संवेदनमनिर्मितम् ।

चेत्यमुक्तं चिदाभासं तद्विद्धि परमं पदम् ।। ६पू.५९.४

१५७६ सा परा परमा काष्ठा सा दृशां दृगनुत्तमा ।

सा महिम्नां च महिमा गुरुणां सा तथा गुरुः ।। ६पू.५९.५

१५७७ स आत्मा तच्च चिज्ज्ञानं स शून्यं ब्रह्म तत्परम् ।

तच्छ्रेयः स शिवः शान्तः सा विद्या सा परा स्थितिः ।। ६पू.५९.६

१५७८ योऽयमन्तश्चितेरात्मा सर्वानुभवरूपकः ।

यत्र स्वदन्ते सर्वाणि स्वात्मद्रव्याणि सत्तया ।। ६पू.५९.७

१५७९ स जगत्तिलतैलात्मा स जगग्दृहदीपकः ।

स जगत्पादपरसः स जगत्पशुपालकः ।। ६पू.५९.८

१५८० स तन्तुर्भूतमुक्तानां परिप्रोतहृदम्बरः ।

स भूतमरिचौघानां परमा तीक्ष्णता तथा ।। ६पू.५९.९

१५८१ स पदार्थे पदार्थत्वं स तत्त्वं यदनुत्तमम् ।

स सतो वस्तुनः सत्त्वमसत्त्वं वा सतः स्वतः ।। ६पू.५९.१०

१५८२ यः स्ववित्तिविचित्रेण स्वयमात्मैव लभ्यते ।

सर्व एव जगद्भावा अविचारेण चारवः ।। ६पू.५९.११

१५८३ अविद्यमानाः सद्भावा विचारविशरारवः ।

अहमादौ जगज्जाले मिथ्याभ्रमभरात्मनि ।। ६पू.५९.१२

१५८४ को नु भूत्वाऽनुबध्नामि वृतिं कथमवाप धीः ।

आद्यमध्यान्तमानानि संकल्पकलनान्यहम् ।। ६पू.५९.१३

१५८५ ब्रह्माकाशमनाद्यन्तं केवेयत्ता ममात्मनः ।

इति निश्चयवानन्तः सम्यग्व्यवहृतिर्बहिः ।। ६पू.५९.१४

१५८६ उदयास्तमयोन्मुक्तस्थितिरन्तः स सर्वदा ।

नास्तमेति न चोदेति मनः समसमस्थितम् ।। ६पू.५९.१५

१५८७ यस्य खस्येव शून्यत्वं स महात्मेह तद्वपुः ।

भावाद्वैतपदारूढः सुषुप्तपरया धिया ।। ६पू.५९.१६

१५८८ व्यवहार्यपि संक्षोभं नैत्यादर्शनरो यथा ।

आदर्शपुरुषस्येव व्यवहारवतोऽपि च ।। ६पू.५९.१७

१५८९ न यस्य हृदयोल्लेखो मनागपि स मुक्तिभाक् ।

अविभागमिवादर्शे चिन्मणौ प्रतिबिम्बति ।। ६पू.५९.१८

१५९० चितेः परमनैर्मल्याद्व्यवहारो यथा गतः ।

चिच्चमत्कृतिरेवेयं जगदित्यवभासते ।। ६पू.५९.१९

१५९१ नेहास्त्यैक्यं न च द्वित्वं ममादेशोऽपि तन्मयः ।

वाच्यवाचकशिष्येहागुरुवाक्यैश्चमत्कृतैः ।। ६पू.५९.२०

१५९२ आत्मनात्मनि शान्तैव चिच्चमत्कुरुते चिति ।

चित्प्रस्पन्दो हि संसारस्तदस्पन्दः परं पदम् ।। ६पू.५९.२१

१५९३ चित्स्पन्दशमनेनेयं परिशाम्यति संसृतिः ।

महाचित्ते नतेऽर्थेऽशभावा यो भावनाक्षयः ।। ६पू.५९.२२

१५९४ असन्नपि स्वभावं तत्संवित्स्पन्द उदाहृतम् ।

शून्यत्वमजडं यत्तत्परमाहुश्चितेर्वपुः ।। ६पू.५९.२३

१५९५ तत्त्वेन भावनायत्ता संसृतिः सानुभूयते ।

अभावनामात्रलयात्सा च निःसाररूपिणी ।। ६पू.५९.२४

१५९६ केवलं केवलीभावात्तद्रूपा सैव शिष्यते ।

चित्स्पन्दमेव संसारचक्रप्रवहणं विदुः ।। ६पू.५९.२५

१५९७ मातृमानप्रमेयादि कटकादीव हेमनि ।

पृथगस्ति न च स्पन्दश्चितेर्या संसृतिर्भवेत् ।। ६पू.५९.२६

१५९८ चित्तमेव चितिस्पन्दस्तदबोधो हि संसृतिः ।

अबोधमात्रे चित्स्पन्दः कटकत्वमिवोत्थितम् ।। ६पू.५९.२७

१५९९ बोधमात्रविलीनेऽस्मिञ्छुद्धा चिद्राम शिष्यते ।

स्वभावबोधमात्रेण क्षीयते भोगवासना ।। ६पू.५९.२८

१६०० भोगाभावनमेवेह परमं ज्ञत्वलक्षणम् ।

इतो नाभिमताः सर्वे ज्ञस्य भोगाः स्वभावतः ।। ६पू.५९.२९

१६०१ भवन्ति कोऽतितृप्तो हि दुरन्नं किल वाञ्छति ।

एतदेव परं विद्धि ज्ञत्वस्यापरलक्षणम् ।। ६पू.५९.३०

१६०२ स्वभावेनैव भोगानां यत्किलानभिवाञ्छनम् ।
चित्तत्स्पन्दैव सर्वात्मरूपिण्यस्तीति निश्चयः ।। ६पू.५९.३१

१६०३ योऽन्तः प्ररूढः स्वभ्यासो ज्ञत्वशब्देन स स्मृतः ।
यो न भुङ्क्ते भुज्यमानानपि भोगान्स बुद्धिमान् ।। ६पू.५९.३२

१६०४ लोकानुरोधसिद्ध्यर्थं स हन्ति लगुडैर्नभः ।
विना कृत्रिमया बुद्ध्या न सिद्धिरवगम्यते ।। ६पू.५९.३३

१६०५ क्वचिदात्मावलोके च स्वाङ्गावदलनैरपि ।
चिच्चेत्यं चेत्यकोटिस्था तावत्पश्यति विभ्रमम् ।। ६पू.५९.३४

१६०६ इदं यावदबोधात्मा स्पन्दते स्पन्दरूपिणी ।
सम्यग्बोधोदयोन्तः स्यात्स्पन्दास्पन्ददशाक्रमः ।। ६पू.५९.३५

१६०७ क्वापि याति च संशान्तदीपवत्साभिधानकः ।
चितः प्रशान्तरूपाया दीपिकायाः स्वभावतः ।। ६पू.५९.३६

१६०८ स्पन्दास्पन्दमयी नेह कथैवास्ति मनागपि ।
यदस्पन्दस्य मरुतो न सन्नासन्न मध्यगम् ।। ६पू.५९.३७

१६०९ रूपं तदेवासंवित्तिस्पन्दायाः प्रशमं चितेः ।
अभिन्नः स्याच्चितः स्पन्दः शुद्धचित्स्फाररूपधृक् ।। ६पू.५९.३८

१६१० न बन्धाय न मोक्षाय स्थित आत्मनि केवलम् ।
चिच्चेन्निरर्थसंवित्तिनिर्वाणे न च विन्दते ।। ६पू.५९.३९

१६११ तद्बन्धमोक्षपक्षादेर्नामापीह न विद्यते ।
मोक्षोऽस्त्वित्येव बोधोऽन्तः पूर्णता क्षयकारणम् ।। ६पू.५९.४०

१६१२ समास्त्वित्यपि बन्धस्ते श्रेयोऽसंवेदनं परम् ।
यदनाभासमजडं तद्विद्धि परमं पदम् ।। ६पू.५९.४१

१६१३ चितः स्वरूपं संस्थानमचेत्योन्मुखतात्मकम् ।
यः संकल्पनशब्दार्थरूपः स्पन्दो महाचितः ।। ६पू.५९.४२

१६१४ बन्धमोक्षादिकार्होऽसौ प्रेक्ष्यमाणः प्रणश्यति ।
प्रेक्षणादेव संशान्ते त्वहंभावे निरास्पदे ।। ६पू.५९.४३

१६१५ न विद्मः केन किं कस्य बध्यते वाथ मुच्यते ।
संकल्प एव रचिते बुधश्चेदविभागवान् ।। ६पू.५९.४४

१६१६ तदसंकल्पमस्पन्दं सर्वं जातमवारितम् ।
स्पन्दे स्पन्दमये वाते तन्मयत्वात्सदा चिता ।। ६पू.५९.४५

१६१७ संक्षीणे न च संसारो निस्पन्दे चिद्घने स्थिते ।
चित्तेज एव चित्स्पन्द इति बुद्धे निरन्तरम् ।। ६पू.५९.४६

१६१८ व्यतिरिक्तश्चितः स्पन्दो न किंचिदवशिष्यते ।
अस्मिन्दृश्यमये दीर्घस्वप्ने स्वप्नान्तरं व्रजन् ।
न ज्ञो मोहमुपादत्ते सर्वगत्वात्स्वसंविदः ।। ६पू.५९.४७

१६१९ यत्रोदेति प्रसभमनिशं सर्गसंवित्तिसत्ता
यस्मिन्नेते सकलकलनाकारपङ्क्ता गलन्ति ।
उद्यन्त्येते स्वदनसुभगं यत्र सर्वोपलम्भा
ध्यानेनैवं तमवगमय प्रत्यगात्मानमन्तः ।। ६पू.५९.४८

१६२० अस्मत्संस्मरणं वापि दृश्यं वाङ्मयमस्पृशन् ।
अपश्यन्नेव पश्यन् हि काष्ठमौनी तु तिष्ठति ।। ६पू.६८.१२

१६२१ एकतत्त्वघनाभ्यासाच्छान्तं शाम्यत्यलं मनः ।
तल्लीनत्वात्स्वभावस्य तेन प्राणोऽपि शाम्यति ।। ६पू.६९.४८

१६२२ विचार्य यदनन्तात्मतत्त्वं तन्मयतां नय ।
मनस्ततस्तल्लयेन तदेव भवति स्थिरम् ।। ६पू.६९.४९

१६२३ यदेवातितरां श्रेयोऽनुपलम्भोपलम्भयोः ।
द्वयोरप्यसतोस्तत्र शेषे वापि स्थिरो भव ।। ६पू.६९.५०

१६२४ एकस्मिन्सुदृढे तत्त्वे तावद्भावं विभावयेत् ।
भावोऽभावत्वमायाति स्वभ्यासाद्यावदाततम् ।। ६पू.६९.५१

१६२५ अविद्येयं तु नास्तीति बुद्ध्वा युक्तियुतं धिया ।
ज्ञानादेव परावाप्तिस्तदभ्यासस्ततः परम् ।। ६पू.६९.५४

१६२६ चित्तमात्रमविद्येति कुरु तेनैव तत्क्षयम् ।
तद्रूपं राम चित्तात्मा नाभावो हि परं पदम् ।। ६पू.६९.५६

१६२७ मुहुर्तमेव निर्वाणं यदि चेतः परे पदे ।
तत्तत्परिणतं विद्धि तत्रैवास्वादमागतम् ।। ६पू.६९.५७

१६२८ यदि सांख्येन विश्रान्तं चेतो योगेन वापि ते ।
क्षणं तत्सत्त्वतां यातं न भूय इह जायते ।। ६पू.६९.५८

१६२९ चेतो विगलिताविद्यं सत्त्वशब्देन कथ्यते ।
दग्धसंसारबीजं तन्न ददात्यन्तरं पुनः ।। ६पू.६९.५९

१६३० कश्चिद्विगलिताविद्यः सत्त्वस्थः शान्तवासनः ।
परं शून्योपमं सद्यो ज्योतिः पश्यति शाम्यति ।। ६पू.६९.६०

१६३१ जीवोऽजीवो भवत्याशु याति चित्तमचित्तताम् ।
विचारादित्यविद्यान्तो मोक्ष इत्यभिधीयते ।। ६पू.७०.१

१६३२ मृगतृष्णाजलमिव मनोऽहंतादि दृश्यते ।
असदेव मनागेव तद्विचारात्प्रलीयते ।। ६पू.७०.२

१६३३ चिदणोः कोशगं विश्वं विचारेण विलीयते ।
कायो वेतालकस्येव शिष्यते यत्पदं तु तत् ।। ६पू.७३.४

१६३४ अस्याश्चित्तं विदुः क्षेत्रं संसृतेः सस्यसंततेः ।
क्षेत्रे त्वक्षेत्रतां याते शालेः क इव संभवः ।। ६पू.९३.४५

१६३५ चित्तोत्सादनरूपेण सर्वत्यागेन भूपते ।
सर्वमासाद्यते सम्यक् साम्राज्येनेव सर्वदा ।। ६पू.९३.४७

१६३६ समस्तवस्तुनिष्कासे यथा त्वमवशिष्यसे ।
सर्वत्यागे कृते तादृग्विज्ञानमवशिष्यते ।। ६पू.९३.५३

१६३७ सर्वं त्यजति यस्तस्य सर्वमेवोपतिष्ठते ।
यथैवाम्बु विशत्यग्नौ तथैवायाति वारिधौ ।। ६पू.९३.५९

१६३८ कृत्वा सर्वपरित्यागं शान्तः स्वस्थो वियत्समः ।
सौम्यो भवसि यद्रूपस्तद्रूपो भव भूपते ।। ६पू.९३.६३

१६३९ वासनैव महाराज स्वरूपं विद्धि चेतसः ।
चित्तशब्दस्तु पर्यायो वासनाया उदाहृतः ।। ६पू.९४.५

१६४० त्यागस्तस्यातिसुकरः सुसाध्यः स्पन्दनादपि ।
राज्यादप्यधिकानन्दः कुसुमादपि सुन्दरः ।। ६पू.९४.६

१६४१ सर्वनाशोऽस्य यः साधो चेतसः संसृतिक्षयः ।
स एव चित्तसंत्याग इत्युक्तं दीर्घदर्शिभिः ।। ६पू.९४.११

१६४२ अहंबीजश्चित्तद्रुमः सशाखाफलपल्लवः ।
उन्मूलय समूलं तमाकाशाहृदयो भव ।। ६पू.९४.१३

१६४३ ईदृशस्यास्य चित्तस्य दुर्वृक्षस्य प्रतिक्षणम् ।
शाखाविलवनं कुर्वन्मूलकाषे भरं कुरु ।। ६पू.९४.२१

१६४४ राजन्स्वात्मविचारोऽयं कोऽहं स्यामिति रूपधृक् ।
चित्तदुर्द्रुमबीजस्य दहने दहनः स्मृतः ।। ६पू.९४.२९

१६४५ घना तव निवृत्तैव मार्जयिष्याम्यथेतरत् ।।
तस्माच्चिदात्मकतयात्मनि चित्ततोऽयं

नित्यं स्वयं कचति भूमिप देवदेवः ।
तनैव पद्मज इति स्वयमात्मनामा
प्रोक्तः स्वरूप इति शान्तमिदं समस्तम् ।। ६पू.९४.७०

१६४६ तनुत्वं सर्वबोधस्य यत्तदेव हि कारणम् ।
सर्गोपशमसंपत्तौ प्रतिपन्ने परे पदे ।। ६पू.९५.४

१६४७ तानवं दृश्यते यस्य तस्यानुक्रमतः स्वयम् ।
पूर्वसंस्थानविगमात्प्रशमोऽप्युपपद्यते ।। ६पू.९५.५

१६४८ मूढं चित्तं चित्तमाहुः प्रबुद्धं सत्त्वमुच्यते ।
अप्रबुद्धा हि चित्तस्थाः सत्त्वस्थास्तु महाधियः ।। ६पू.१०१.३१

१६४९ स्वभावं स्वं विजित्यादाविन्द्रियाणां सचेतसाम् ।
प्रवर्तते विवेके यः सर्वं तस्याशु सिध्यति ।। ६उ.५.१

१६५० स्वभावमात्रं येनान्तर्न जितं दग्धबुद्धिना।
तस्योत्तमपदप्राप्तिः सिकतातैलदुर्लभा ।। ६उ.५.२

१६५१ शुद्धेऽल्पोऽप्युपदेशो हि निर्मले तैलबिन्दुवत् ।
लगत्युत्तानचित्तेषु नादर्श इव मौक्तिकम् ।। ६उ.५.३

१६५२ यदिदं वच्मि तत्सर्वमोमित्यादातुमर्हसि ।
अस्माभिश्चिरमन्विष्टं नात्र कार्या विचारणा ।। ६उ.७.५

१६५३ चिच्चमत्कारमात्रं त्वं जगिद्विद्धीह नेतरत् ।। ६उ.८.८

१६५४ हेम्नीव कटकादित्वं संसारोदरकोटरः ।
चिच्चमत्कार एवायमविकल्पनसंक्षयः ।। ६उ.८.२१

१६५५ अत्यन्तमेव स्वायत्तो यथेच्छसि तथा कुरु ।। ६उ.८.२२

१६५६ अबुद्ध्यमानश्चेत्यादिचिद्रूपमपि चानघ ।
शान्तचिद्घन एवास्व निर्मलाप्स्वन्तरंशुवत् ।। ६उ.९.१

१६५७ अचेतनं चेतनान्तश्चेतनादेव विद्यते।
स्वेऽसादृश्येऽपि सदृशं पयोराशौ यथानलः ।। ६उ.९.२

१६५८ सचेतनाचेतनयोर्हेतुश्चित्त्वात्तथैव चित् ।
विनाशोत्पादयोर्वह्निज्वालायाः पवनो यथा ।। ६उ.९.३

१६५९ नाहमस्तीति चिद्रूपं चिति विश्रान्तिरस्तु ते ।
ततो यथा यादृशेन भूयते तादृशो भव ।। ६उ.९.४

१६६० चिद्रूपः सर्वभावानामन्तर्बहिरसि स्थितः
प्रसन्नाम्बुभरस्यान्तर्बहिश्चैव यथा पयः ।। ६उ.९.५

१६६१ नाहमस्तीति चिद्रूपं चितौ चेल्लग्नमङ्ग ते ।
न चान्यच्चेतितं ब्रह्म रूपं केनोपमीयते ।। ६उ.९.६

१६६२ शस्त्राणि दयिताङ्गानि लग्नान्यङ्गे निरम्बरे ।
यो बुद्ध्यमानः सुसमः स परस्मिन्पदे स्थितः ।। ६उ.११.१

१६६३ तावत्पुरुषयत्नेन धैर्येणाभ्यासमाहरेत् ।
यावत्सुषुप्ततोदेति पदार्थोदयनं प्रति ।। ६उ.११.२

१६६४ यथा भूतार्थतत्त्वज्ञमाधयोऽग्रगता अपि ।
न मनागपि लिम्पन्ति पयांसीव सरोरुहम् ।। ६उ.११.३

१६६५ शस्त्राङ्गनानभांस्यङ्गलग्नान्यलमसंविदम् ।
अलग्नानीव शान्तात्मा यः पश्यति स पश्यति ।। ६उ.११.४

१६६६ मनोहंभावबुद्ध्यादि यत्किंचिन्नाम वेदनम् ।
अविद्यां विद्धि यत्नेन पौरुषेणाशु नश्यति ।। ६उ.१२.२९

१६६७ अर्धं मिथःसंकथया भागः शास्त्रविचारणैः ।
आत्मप्रत्ययतः शिष्टमविद्याया निवर्तते ।। ६उ.१२.३०

१६६८ चतुर्भागात्मनि कृते इत्यविद्याक्षये क्रमात् ।
समकालाच्च यच्छिष्टं तदनामार्थसन्मयम् ।। ६उ.१२.३१

१६६९ अर्धं मिथःसंकथया भागः शास्त्रविचारणैः ।
आत्मप्रत्ययतो भागः कथं तस्या निवर्तते ।। ६उ.१२.३२

१६७० समकाले क्रमाच्चेति मुनिनाथ किमुच्यते ।
तदनामार्थसच्चेति सच्चासच्चेति किं वद ।। ६उ.१२.३३

१६७१ सुजनेन विरक्तेन संसारोत्तरणार्थिना ।
सह चाप्यात्मविदुषां संसृतिं प्रविचारयेत् ।। ६उ.१२.३४

१६७२ यतः कुतश्चिदन्विष्य सविरागममत्सरम् ।
जनं सज्जनमात्मज्ञं यत्नेनाराधयेद्बुधः ।। ६उ.१२.३५

१६७३ संपन्ने संगमे साधोरविद्यार्धं क्षयं गतम् ।
विद्धि वेद्यविदां श्रेष्ठ ज्येष्ठश्रेष्ठदशोदयात् ।। ६उ.१२.३६

१६७४ अर्धं सज्जनसंपर्कादविद्याया विनश्यति ।
चतुर्भागस्तु शास्त्रार्थैश्चतुर्भागं स्वयत्नतः ।। ६उ.१२.३७

१६७५ एकोऽभिलाष उत्पन्नो भोगेभ्यश्च निवार्यते ।
तत्क्षये यात्यविद्यायाश्चतुर्थांशः स्वयत्नतः ।। ६उ.१२.३८

१६७६ साधुसङ्गमशास्त्रार्थस्वयत्नैः क्षीयते मलम् ।
एकैकेनाथ सर्वैश्च तुल्यकालं क्रमादपि ।। ६उ.१२.३९

१६७७ यदविद्याक्षयैकात्म न किंचित्किंचिदेव च ।
शिष्यते तत्परं प्राहुरनामार्थमसच्च सत् ।। ६उ.१२.४०

१६७८ ब्रह्मेदं घनमजराद्यनन्तमेकं
संकल्पस्फुरणमविद्यमानमेव ।
बुद्ध्वैवं व्यपगतमानमेयमोहो
निर्वाणं परिविहरन्विशोकमास्स्व ।। ६उ.१२.४१

१६७९ जगत्प्रसररूपस्य न देश उपयुज्यते ।
न कालो धारणे स्तम्भ आलोकस्याम्बरे यथा ।। ६उ.१३.१

१६८० मनोमनननिर्माणमात्रमेतज्जगत्त्रयम् ।। ६उ.१३.२

१६८१ यं प्रत्युदेति सर्गोयं स एवैनं हि चेतति ।
पदार्थः संनिवेशं स्वमिव स्वप्नं पुमानिव ।। ६उ.१३.४

१६८२ संवेदनं भावनं च वासना कलनेति च ।
अनर्थायेह शब्दार्थे विगगतार्थो विजृम्भते ।। ६उ.२५.१

१६८३ वेदनं भावनं विद्धि सर्वदोषसमाश्रयम् ।
तस्मिन्नेवापदः सन्ति लता मधुरसे यथा ।। ६उ.२५.२

१६८४ संसारमार्गे गहने वासनावेशवाहिनः ।
उपयाति विचित्रौघैर्वृत्तवृत्तान्तसंततिः ।। ६उ.२५.३

१६८५ विवेकिनो वासनया सह संसारसंभ्रमः ।
क्षीयते माधवस्यान्ते शनैरिव धरारसः ।। ६उ.२५.४

१६८६ अस्याः संसारसल्लक्या वासनोत्सेधकारिणी ।
कदल्या वनजालिन्या रसलेखेव माधवी ।। ६उ.२५.५

१६८७ संसारान्ध्यतयोदेति वासनात्मा रसश्चितौ ।
यथा वनतया तस्थौ मधुमासरसः क्षितौ ।। ६उ.२५.६

१६८८ चिन्मात्रादमलाच्छून्यादृते किंचिन्न विद्यते ।
न्यान्यत्किंचिदपर्यन्ते खे शून्यत्वेतरद्यथा ।। ६उ.२५.७

१६८९ वेदनात्मा न सोऽस्त्यन्य इति या प्रतिभा स्थिरा।
एषाऽविद्या भ्रमस्त्वेष स च संसार आततः ।। ६उ.२५.८

१६९० अनालोकनसंसिद्ध आलोकेनैव नश्यति ।
असदात्मा सदाभासो बालवेतालवत्क्षणात् ।। ६उ.२५.९

१६९१ सर्वदृश्यदृशो बाधे बोधसारतयैकताम् ।
यान्त्यशेषमहीपीठसरित्पूरा इवार्णवे ।। ६उ.२५.१०
१६९२ मृन्मयं तु यथा भाण्डं मृच्छून्यं नोपलभ्यते ।
चिन्मयादितया चेत्यं चिच्छून्यं नोपलभ्यते ।। ६उ.२५.११
१६९३ बोधावबुद्धं यद्वस्तु बोध एव तदुच्यते ।
नाबोधं बुध्यते बोधो वैरूप्यात्तेन नान्यता ।। ६उ.२५.१२
१६९४ द्रष्टृदर्शनदृश्येषु प्रत्येकं बोधमात्रता ।
सारस्तेन तदन्यत्वं नास्ति किंचित्खपुष्पवत् ।। ६उ.२५.१३
१६९५ सजातीयः सजातीयेनैकतामनुगच्छति ।
अन्योन्यानुभवस्तेन भवत्वेकत्वनिश्चयः ।। ६उ.२५.१४
१६९६ यदि काष्ठोपलादीनां न भवेद्बोधरूपता ।
तत्सदानुपलम्भः स्यादेतेषामसतामिव ।। ६उ.२५.१५
१६९७ यदा त्वेषा नु दृश्यश्रीर्बोधमात्रैकरूपिणी ।
तदान्येवाप्यनन्यैव सती बोधेन बोध्यते ।। ६उ.२५.१६
१६९८ सर्वं जगद्गतं दृश्यं बोधमात्रमिदं ततम् ।
स्पन्दमात्रं यथा वायुर्जलमात्रं यथार्णवः ।। ६उ.२५.१७
१६९९ मिश्रीभूता अपि ह्येते जतुकाष्ठादयो यथा ।
मिथोऽननुभवे मिश्रा ऐक्यं ह्यनुभवे मिथः ।। ६उ.२५.१८
१७०० अन्योन्यानुभवो ह्यैक्यमैक्यं त्वन्योन्यवेदनम् ।
यथाम्भसोः क्षीरयोर्वा न काष्ठजतुनोरिव ।। ६उ.२५.१९
१७०१ अहमित्येव बन्धाय नाहमित्येव मुक्तये ।
एतावन्मात्रके बन्धे स्वायत्ते किमशक्तता ।। ६उ.२५.२०
१७०२ चन्द्रद्वयप्रत्ययवन्मृगतृष्णाम्बुबुद्धिवत् ।
किमनुत्थित एवायमसदेवाहमुत्थितः ।। ६उ.२५.२१
१७०३ ममेदमिति बन्धाय नाहमित्येव मुक्तये ।
एतावन्मात्रके वस्तुन्यात्मायत्ते किमज्ञता ।। ६उ.२५.२२
१७०४ यः कुण्डबदरन्यायो या घटाकाशयोः स्थितिः ।
स संबन्धोऽपि नैवान्यमैक्यं ह्यन्योन्यवेदनम् ।। ६उ.२५.२३
१७०५ स्वपौरुषेण स्वधिया सत्संगमविकासया ।

यदि ना नीयते ज्ञत्वं तदुपायोऽस्ति नेतरः ।। ६उ.३३.१
१७०६ स्वं कल्पितं कल्पितं च प्रतिकल्पनया स्वया ।
तदेवान्यत्वमादत्ते विषत्वममृतं यथा ।। ६उ.३३.२
१७०७ कल्पना चाकल्पनान्ता मुक्तता यदकल्पनम् ।
एतच्च भोगसंत्यागपूर्वं सिध्यति नान्यथा ।। ६उ.३३.३
१७०८ वचसा मनसा चान्तः शब्दार्थाविविभावयन् ।
य आस्ते वर्धते तस्य कल्पनोपशमः शनैः ।। ६उ.३३.४
१७०९ वर्जयित्वाहमित्येव नाविद्यास्तीतरात्मिका ।
शान्ते त्वभावनादस्मिन्नान्यो मोक्षोऽस्ति कश्चन ।। ६उ.३३.५
१७१० अहंभावमथादेहं किंचिच्छ्रयसि नश्यसि ।
जगदादिरुचिस्तस्मिंस्त्यक्ते श्याम्यसि सिध्यसि ।। ६उ.३३.६
१७११ अचेतनादिदं सर्वं सदेवासदिव स्थितम् ।
शान्तं यस्योपलस्येव नमस्तस्मै महात्मने ।। ६उ.३३.७
१७१२ अचेतनादिदं सर्वमुपलस्येव शाम्यति ।
शून्याख्यातः परालीनचित्तस्य चित्त्वभावनात् ।। ६उ.३३.८
१७१३ इदमस्त्वथवा मास्तु चेतितं दुःखवृद्धये ।
अचेतितं सुखायान्तरचेतनमचेतनात् ।। ६उ.३३.९
१७१४ यथा शाम्यत्यसंकल्पात्संकल्पनगरं तथा ।
वेदनोत्थं जगदहं चिति शाम्यत्यवेदनात् ।। ६उ.३३.३७
१७१५ प्राप्तेषु सुखदुःखेषु यो नश्यति स नश्यति ।
यो न नश्यत्यनाशोऽसावलं शास्त्रोपदेशनैः ।। ६उ.३४.१
१७१६ यस्य चेच्छोदयस्तस्य सन्त्यवश्यं सुखादयः ।
ते चेत्सम्यक्चिकित्स्यन्ते पूर्वमिच्छैव मुच्यताम् ।। ६उ.३४.२
१७१७ अहं जगदिदं भ्रान्तिर्नास्त्येव परमे पदे ।
इदं शान्तमनालम्बं सर्वं निर्वाणमव्ययम् ।। ६उ.३४.३
१७१८ अहं ब्रह्म जगच्चेति शब्दसंभ्रमविभ्रमः ।
सर्वस्मिञ्छान्त आकाशे केन नामोपकल्पितः ।। ६उ.३४.४
१७१९ नेहास्त्यहं न च जगन्न च ब्रह्मादिशब्दकाः ।
शान्तस्यैकस्य सर्वत्वात्कर्ता भोक्तेह कः कुतः ।। ६उ.३४.५

१७२० उपदेश्यातिशायित्वात्सर्वापह्नव एव च ।
कृतोऽयं स च सत्यात्मा त एवाहं विशिष्यते ।। ६उ.३४.६
१७२१ अग्रस्थसिद्धसंचारो ज्ञायते नापि दारुणः ।
यथैकपार्श्वसंसुप्तनरः स्वप्नाभ्रगर्जितम् ।। ६उ.३४.७
१७२२ ज्ञप्तौ नास्ति यतस्तेन सिद्धाचारो न लक्ष्यते ।
स्वभाव इति सर्वेण ज्ञप्तिस्थो ह्यनुभूयते ।। ६उ.३४.८
१७२३ ज्ञप्तिरप्यात्मभूतैव सर्वं भाति हि तन्मयम् ।
तस्मात्साहं जगत्सर्वमभिन्नं परमात्मनः ।। ६उ.३४.९
१७२४ ज्ञप्तिर्जगत्तया भाति संकल्पस्वप्नयोरिव ।
अनानावयवोदेति जलमूर्मितया यथा ।। ६उ.३४.१०
१७२५ एकात्मैवोदये ज्ञप्तेर्नानातामिव चागतः ।
अज्ञानात्स त्ववस्तुत्वात्प्रेक्षितो नोपलभ्यते ।। ६उ.३४.११
१७२६ यथा स्वावयवानेव सर्वानवयवी भवेत् ।
नित्यानवयवं शान्तं ब्रह्मैवेदं तथा जगत् ।। ६उ.३४.१२
१७२७ भाण्डलक्षाणि धत्तेऽन्तश्चिद्रूपकनकेष्टिका ।
यदेव सा चेतयते जगदादीव वेत्ति तत् ।। ६उ.३४.१३
१७२८ ब्रह्मैव कचतीवेदं सत्तयाच्छजगत्तया ।
चिद्रूपत्वाद्द्रवात्मत्वात्तरङ्गादितयाब्धिवत् ।। ६उ.३४.१४
१७२९ यद्यच्चेतयतेऽन्तस्तु जगदादीव पश्यति ।
अरूपमपि रूपं स्वं यन्न चेतयते न तत् ।। ६उ.३४.१५
१७३० चेतनाचेतनत्वोक्ती तस्येशत्वात्स्वदेहगे ।
उपदेशार्थमेवोक्ते न सद्विषयमर्थतः ।। ६उ.३४.१६
१७३१ न जगत्सन्न चैवासद्भासते चेतनाच्चिति ।
अचेतनान्न कचति क इवार्थग्रहोऽत्र नः ।। ६उ.३४.१७
१७३२ अचेतनं चेतनं च स्पन्दास्पन्दवदात्मनः ।
स्वायत्ते न कदर्थस्थे स्वस्थपाषाणवत्स्थिते ।। ६उ.३४.१८
१७३३ यस्येक्षितस्य नो सत्ता नाधारो न च कारणम् ।
सोऽहमित्येव यो यक्षो न जाने कुत उत्थितः ।। ६उ.३४.१९
१७३४ यस्याहमिति यक्षस्य सत्तैवास्ति न सत्यतः ।

अहो नु चित्रं तेनेमे भवन्तो विवशीकृताः ।। ६उ.३४.२०
१७३५ काकतालीयवद्भ्रान्तमहं ब्रह्मणि भासते ।
स्वमेव रूपं दृग्भ्रान्तौ केशोण्ड्रकमिवाम्बरे ।। ६उ.३४.२१
१७३६ ब्रह्मैवाहं जगच्चात्र कुतो नाशसमुद्भवौ।
अतो हर्षविषादानां किंत्वेव कथमास्पदम् ।। ६.उ.३४.२२
१७३७ सर्वेश्वरत्वादीशस्य विभातीदं प्रचेतितम् ।
अचेतितं च नो भाति तेनाचेतितमस्तु ते ।। ६उ.३४.२३
१७३८ काकतालीयवच्चित्त्वाज्जगतो भाति ब्रह्म खम् ।
स्वप्नसंकल्पपुरवत्तत्तस्माद्भिद्यते कथम् ।। ६उ.३४.२४
१७३९ यथोर्म्यादि जले वृक्षे यथा वा शालभञ्जिका ।
यथा घटादयो भूमौ तथा ब्रह्मणि सर्गता ।। ६उ.३४.२५
१७४० अनाकृतावसंस्थाने स्वच्छे यदनुभूयते ।
तत्तदेवात उदितं किंनामाहं जगन्ति किम् ।। ६उ.३४.२६
१७४१ मरुतः स्पन्दवैचित्र्यं सत्तयैव यथा तथा ।
ब्रह्मणो निःस्वभावस्य जगदाद्यहमादि च ।। ६उ.३४.२७
१७४२ यथाभ्रे लक्ष्यते वृक्षगजवाजिमृगादिता ।
असन्निवेशाकृतिनि सर्गाहन्ते तथापरे ।। ६उ.३४.२८
१७४३ सर्गोऽवयववद्भाति सर्व एव परे शिवे ।
एवं तदुपमां विद्धि कार्यकारणवद्यथा ।। ६उ.३४.२९
१७४४ अन्तःशान्तमनायासमनुपाधि गतभ्रमम् ।
जगत्यसंभवादेव व्योमवत्सममास्यताम ।। ६उ.३४.३०
१७४५ न भवन्तो न च वयं न जगन्ति न खादयः ।
सन्ति शान्तमशेषेण ब्रह्मेदं निर्भरं स्थितम् ।। ६उ.३४.३१
१७४६ अशेषेष्वविशेषेषु शान्ताशेषविशेषता ।
सत्या सैवाहमित्याशु त्यक्त्वा मोक्षाय भाव्यताम् ।। ६उ.३४.३२
१७४७ वेदनं बन्धनं विद्धि विद्धि मोक्षमवेदनम् ।
यथास्थितं यथाचारं भव शान्तमवेदनम् ।। ६उ.३४.३३
१७४८ द्रष्टा न दृश्यतां याति चितिर्नायाति चेत्यताम् ।
चेत्याभावादजगति कः किं चेतयते कथम् ।। ६उ.३४.३४

१७४९ द्रष्टृदृश्यदशाभावाज्जाग्रत्येव सुषुप्तिवत् ।
शरदाकाशकोशाभमसत्तोपममास्यताम् ।। ६उ.३४.३५

१७५० तथैकब्रह्मचिद्रूपे पवनस्पन्दने यथा ।
अत्राचिद्बोधता सर्गो मोक्षो ब्रह्मैकबोधता ।। ६उ.३४.३६

१७५१ चित्स्पन्दो ब्रह्ममरुतो यत्र सर्ग इति स्मृतः ।
नात्र चित्स्पन्दनं यत्स्यान्निर्वाणं तदुदाहृतम् ।। ६उ.३४.३७

१७५२ बीजमन्तर्यथा वेत्ति स्वरुपं पल्लवादिकम् ।
तथा महाचिदन्तस्थं स्वरुपं वेत्ति सर्गताम् ।। ६उ.३४.३८

१७५३ पत्रादि वेदनाद्बीजं यथा पत्रादि तिष्ठति ।
परा चित्सर्गसंवित्तिस्तथा भवति सर्गता ।। ६उ.३४.३९

१७५४ यथा भावविकाराभाश्चित्परा: सर्गतास्तथा ।
सर्वे बीजानि दृष्टान्तास्तद्रूपा एव तन्मया:।। ६उ.३४.४०

१७५५ निर्विकारपरब्रह्ममयं सर्वमिदं जगत् ।
निर्विकारमनाद्यन्तमेवं विद्धि निरामयम् ।। ६उ.३४.४१

१७५६ निजसंकल्पमात्रात्मा निजसंकल्पनात्क्षयी ।
द्वैताद्वैतविकारोऽयं संकल्पनगरं यथा ।। ६उ.३४.४२

१७५७ शून्यत्वाकाशयोर्भेदो यादृशोऽवगतस्त्वया ।
भेदं निरात्मकं विद्धि तादृशं ब्रह्मसर्गयोः ।। ६उ.३४.४३

१७५८ महाचिद्रूपिणी शान्ता या सत्ता ब्रह्मणः पुरा ।
स्वतः सेयमहंत्वं च मानवोऽस्मीत्यबोधतः ।। ६उ.३४.४४

१७५९ ब्रह्मण्यस्मिञ्जगद्रूपे न किंचिदपि जायते ।
जातमप्यथ नष्टं च न नश्यत्यम्बुवीचिवत् ।। ६उ.३४.४५

१७६० पदार्थब्रह्मरूपेण ब्रह्मैवात्मनि तिष्ठति ।
अवयवीवावयवे खे खं वारीव वारिणि ।। ६उ.३४.४६

१७६१ निमेषादर्धभागेन देशाद्देशान्तरस्थितौ ।
यद्रूपं संविदो मध्ये स स्वभाव उपास्यताम् ।। ६उ.३४.४७

१७६२ संक्षुब्धमक्षुब्धमिति द्विरूपं
संवित्स्वरूपं प्रवदन्ति सन्तः ।
श्रेयः परं येन समीहसे त्वं
तदेकनिष्ठो भव माऽमतिर्भूः ।। ६उ.३४.४८

१७६३ देशाद्देशान्तरं दूरं प्राप्तायाः संविदः क्षणात् ।
यद्रूपममलं मध्ये परं तद्रूपमात्मनः ।। ६उ.३५.१

१७६४ गच्छञ्छृण्वन्स्पृशञ्जिघ्रन्नुन्मिषन्निमिषन्हसन् ।
नूनं निरामयत्वाय नित्यमेतन्मयो भव ।। ६उ.३५.२

१७६५ तत एव निराभासात्सत्यान्निर्वासनैषणात् ।
यथास्थितं यथाचारमचलाऽमरशैलवत् ।। ६उ.३५.३

१७६६ एतद्रूपमविद्यायाः प्रेक्षिता यन्न लभ्यते ।
प्रेक्षिता लभ्यते चेत्सा तद्विद्यैव पराभवत् ।। ६उ.३५.४

१७६७ अविद्यासंभवाच्चेत्यचित्त्वे संभवतः क्व किम् ।
चेत्यते कथमेवान्तः शान्तिरेव बलोदिता ।। ६उ.३५.५

१७६८ सत्यं ब्रह्म जगच्चैकं स्थितमेकमनेकवत् ।
सर्वं वाऽसर्ववद्भाति शुद्धं चाशुद्धवत्ततम् ।। ६उ.३५.६

१७६९ चमत्कुर्वन्त्यथानर्था आवर्ता इव वारिणि ।
एकस्वभावाः सकला यथा वारितरङ्गकाः ।। ६उ.३६.१

१७७० सर्वस्यैवास्य विश्वस्य निर्ज्ञेयज्ञेयरूपिणी ।
परमाकाशतारूपं परोपशमसंश्रया ।। ६उ.३६.२

१७७१ बालचिन्ता पुरोव्योम्नि न किंचिदपि मे यथा ।
तथेदं तत्त्वतो विश्वं सत्यं तु शिशुचेतसि ।। ६उ.३६.३

१७७२ अरूपालोकमननं शिलापुत्रकसैन्यवत् ।
रूपालोकमनस्कारा भान्ति केवात्र विश्वता ।। ६उ.३६.४

१७७३ तन्मयस्यास्य विश्वस्य न स्वभावविकारिता ।
विद्यते प्रेक्ष्यमाणापि किमु सास्य भविष्यति ।। ६उ.३६.८

१७७४ सर्वं शान्तं शिवं शुद्धं त्वमहंतादिविभ्रमम् ।
न किंचिदपि पश्यामि व्योमजं काननं यथा ।। ६उ.३६.१०

१७७५ पदमाहुः परं सद्यदनिच्छोदयमासितम् ।
पाषाणपुरुषस्येव चित्रस्थस्येव चासनम् ।। ६उ.३६.१२

१७७६ स विश्रान्तमना मौनी यस्य प्रकृतकर्मसु ।
स्पन्दो दारुनरस्येव विगतेच्छमनाकुलम् ।। ६उ.३६.१३

१७७७ अन्तःशून्यं बहिःशून्यं विरसं गतवासनम् ।
जगद्वेणोरिव ज्ञस्य जीवतो भाति जीवनम् ।। ६उ.३६.१४

१७७८ यस्य न स्वदते दृश्यमदृश्यं स्वदते हृदि ।
सबाह्याभ्यन्तरं शान्तः स वितीर्णो भवार्णवात् ।। ६उ.३६.१५

१७७९ यः स्वादयन्भोगविषं रतिमेति दिने दिने ।
सोऽग्नौ स्वमूर्ति ज्वलिते कक्षमक्षयमुज्झति ।। ६उ.३६.२२

१७८० निरिच्छत्वं समाधानमाहुरागमभूषणाः ।
यथा शाम्येन्मनोऽनिच्छं नोपदेशशतैस्तथा ।। ६उ.३६.२३

१७८१ इच्छोदयो यथा दुःखमिच्छाशान्तिर्यथा सुखम् ।
तथा न नरके नापि ब्रह्मलोकेऽनुभूयते ।। ६उ.३६.२४

१७८२ इच्छामात्रं विदुश्चित्तं तच्छान्तिर्मोक्ष उच्यते ।
एतावन्त्येव शास्त्राणि तपांसि नियमा यमाः ।। ६उ.३६.२५

१७८३ यावती यावती जन्तोरिच्छोदेति यथा यथा ।
तावती तावती दुःखबीजमुष्टिः प्ररोहति ।। ६उ.३६.२६

१७८४ यथा यथेच्छा तनुतां याति जन्तोर्विवेकतः ।
तथा तथोपशाम्यन्ति दुःखचिन्ताविषूचिकाः ।। ६उ.३६.२७

१७८५ यथा यथेच्छा घनतां याति लोकस्य रागतः ।
तथा तथा विवर्धन्ते दुःखचिन्ताविषोर्मयः ।। ६उ.३६.२८

१७८६ इच्छा चिकित्स्यते व्याधिर्न स्वयत्नौषधेन चेत् ।
तदत्र बलवन्मन्ये विद्यते नौषधान्तरम् ।। ६उ.३६.२९

१७८७ इच्छोपशमनं कर्तुं यदि कृत्स्नं न शक्यते ।
स्वल्पमप्यनुगन्तव्यं मार्गस्थो नावसीदति ।। ६उ.३६.३०

१७८८ यस्त्विच्छातानवे यत्नं न करोति नराधमः ।
सोऽन्धकूपे स्वमात्मानं दिनानुदिनमुज्झति ।। ६उ.३६.३१

१७८९ दुःखप्रसवशालिन्या बीजमिच्छैव संसृतेः ।
सम्यग्ज्ञानाग्निदग्धा सा न भूयः परिरोहति ।। ६उ.३६.३२

१७९० इच्छामात्रं हि संसारो निर्वाणं तदवेदनम् ।
इच्छानुत्पादने यत्नः क्रियतां किं वृथाभ्रमैः ।। ६उ.३६.३३

१७९१ शास्त्रोपदेशगुरवः प्रेक्ष्यन्ते किमनर्थकम् ।

किमिच्छाननुसंधानसमाधिर्नाधिगम्यते ।। ६उ.३६.३४

१७९२ यस्येच्छाननुसंधानमात्रे दुःसाध्यता मतेः ।
गुरूपदेशशास्त्रादि तस्य नूनं निरर्थकम् ।। ६उ.३६.३५

१७९३ इच्छाविषविकारिण्यामन्त एव नृणामलम् ।
दुःखप्रसरकारिण्या हरिण्या जन्म जङ्गले ।। ६उ.३६.३६

१७९४ न बालीक्रियते त्वीषदात्मज्ञानाय चेदसौ ।
इच्छोपशान्तिः क्रियतां तयालं तदवाप्यते ।। ६उ.३६.३७

१७९५ निरिच्छतैव निर्वाणं सेच्छतैव हि बन्धनम् ।
यथाशक्ति जयेदिच्छां किमेतावति दुष्करम् ।। ६उ.३६.३८

१७९६ जरामरणजन्मादि करञ्जखदिरावलेः ।
बीजमिच्छा सदैवान्तर्दह्यतां शमवह्निना ।। ६उ.३६.३९

१७९७ यतो यतो निरिच्छत्वं मुक्ततैव ततस्ततः ।
यावद्धति यथाप्राणं हन्यादिच्छां समुत्थिताम् ।। ६उ.३६.४०

१७९८ यतो यतश्च सेच्छत्वं बन्धपाशास्ततस्ततः ।
पुण्यपापमया दुःखराशयो विततार्तयः ।। ६उ.३६.४१

१७९९ यथा यथास्य पुंसोऽन्तरिच्छा समुपशाम्यति ।
तथा तथास्य कल्याणं मोक्षाय परिवर्धते ।। ६उ.३६.४३

१८०० आत्मनो निर्विवेकस्य यदिच्छापरिपूरणम् ।
संसारविषवृक्षस्य तदेव परिषेचनम् ।। ६उ.३६.४४

१८०१ आत्मनो व्यतिरिक्तं चेद्विद्यते तदिहेच्छया ।
इष्यतामसति त्वेतत्स्वात्मान्यत्वं किमिष्यते ।। ६उ.३७.२

१८०२ ग्राह्यग्राहकसंबन्धः कुतश्चिदिति तन्न नः ।
विद्यतेऽसौ प्रशान्तानां येषामस्ति न वेद्मि तान् ।। ६उ.३७.५

१८०३ एषैव ग्राहकादीनां सत्ता यन्नात्मनिष्ठता ।
स्वभावावेक्षया सत्या न जाने क्व प्रयान्ति ते ।। ६उ.३७.७

१८०४ एष एव स्वभावो यद्द्रष्टृदृश्यक्षयोऽखिलः ।
ज्ञात्वाऽसत्या विनिर्वाणमहंतात्मनि गच्छति ।। ६उ.३७.८

१८०५ निर्वाणे नास्ति दृश्यादि दृश्यादौ नास्ति निवृतिः ।
मिथोऽनयोरनुभवो न च्छायातपयोरिव ।। ६उ.३७.९

१८०६ उभे एते मिथोऽसत्ये असत्ये च न निवृतिः ।
यतो निर्वाणमजरमदुःखमनुभूयते ।। ६उ.३७.१०
१८०७ भ्रमभूतं च दृश्यादि नित्यं नात्र सुखप्रदम् ।
असच्च तद्भाव्यतां मा निर्वाणे स्थीयतामजे ।। ६उ.३७.११
१८०८ शुक्तिकारूप्यसदृश्यं प्रेक्षितं यन्न लभ्यते ।
अर्थकार्यपि तन्नास्ति किमत्रापह्नवेन च ।। ६उ.३७.१२
१८०९ तत्सद्भावान्महद्दुःखमसद्भावान्महत्सुखम् ।
अभावः सोपपत्तिस्तु दृढतां याति भावनात् ।। ६उ.३७.१३
१८१० ज्ञातायां संप्रबुद्धायामिच्छा ब्रह्मैव नेतरत् ।। ६उ.३७.२२
१८११ यथा संबुद्धवान्राम तत्सत्यं किं त्विदं श‍ृणु ।
यदा यदा ज्ञतोदेति शाम्यतीच्छा तदा तदा ।। ६उ.३७.२३
१८१२ वस्तुस्वभावादुदयत्यादित्ये यामिनी यथा ।
शाम्यत्येव न तूदेति ज्ञप्ताविच्छादि तत्तथा ।। ६उ.३७.२४
१८१३ यथा यथोदयो ज्ञप्तेर्द्वैतशान्तिस्तथा तथा ।
वासनाविलयश्चैव कथमिच्छोदयो भवेत् ।। ६उ.३७.२५
१८१४ तस्या विद्योपशान्तेयं निर्मला मुक्ततोदिता ।
अशेषदृश्यवैरस्याद्यस्येच्छोदेति न क्वचित् ।। ६उ.३७.२६
१८१५ ज्ञता चेदुदिता जन्तोस्तदिच्छास्योपशाम्यति ।
नैतयोः स्थितिरेकत्र प्रकाशतमसोरिव ।। ६उ.३७.३०
१८१६ प्रतिषेधविधीनां तु तज्ज्ञो न विषयः क्वचित् ।
शान्तसर्वैषणेच्छस्य कोऽस्य किं वक्ति किंकृते ।। ६उ.३७.३१
१८१७ एतदेव ज्ञताचिह्नं यदिच्छास्वतितानवम् ।
ह्लादनं सर्वलोकानामथानुभव एव वा ।। ६उ.३७.३२
१८१८ दृश्यं विरसतां यातं यदा न स्वदते क्वचित् ।
तदा नेच्छा प्रसरति तदैव च विमुक्तता ।। ६उ.३७.३३
१८१९ बोधादस्तमितद्वैतमद्वैतैक्यविवर्जितम् ।
यः स्वच्छो विगतव्यग्रः शान्त आत्मन्यवस्थितः ।। ६उ.३७.३५
१८२० नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ।। ६उ.३७.३६

१८२१ न दुःखमस्ति न सुखं शान्तं शिवमजं जगत् ।
इति योऽन्तः शिलेवास्ते तं प्रबुद्धं विदुर्बुधाः ।। ६उ.३७.३९
१८२२ चितश्चेत्योन्मुखत्वं यत्तच्चितं सैव संसृतिः ।
सेच्छा तन्मुक्तता मुक्तिर्युक्तिं ज्ञात्वेति शाम्यताम् ।। ६उ.३७.५१
१८२३ इच्छानां तानवं यस्य दिनानुदिनमागतम् ।
विवेकशमतृप्तस्य तमाहुर्मोक्षभागिनम् ।। ६उ.३७.५४
१८२४ इच्छाक्षुरिकया विद्धे हृदि शूलं प्रवर्तते ।
जयन्ति यत्र नैतानि मणिमन्त्रौषधानि च ।। ६उ.३७.५५
१८२५ चित्पश्यति जगन्मिथ्या स्ववेदनविबोधिता ।
व्योम्नि मायाञ्जनासिक्ता दृगिवाचलतान्तरम् ।। ६उ.३८.१
१८२६ ब्रह्मसर्गश्चित्तसर्गो द्वावेतौ सदृशौ मतौ ।
परमार्थस्वरूपत्वादक्षुब्धत्वात्सदैव च ।। ६उ.३८.२
१८२७ ज्ञानरूपतयाबाह्यं बाह्यं चानुभवात्तथा ।
सत्यरूपमतः सत्यां विद्धि बाह्यार्थरूपताम् ।। ६उ.३८.३
१८२८ अक्षुब्धखानिलालोकजलभूशान्तिशालिनी ।
तता शून्या महारम्भा ब्रह्मसत्तैव सर्वतः ।। ६उ.३८.५
१८२९ तस्मै सर्वं ततः सर्वं तत्सर्वं सर्वतश्च तत् ।
तच्च सर्वमयं नित्यं तस्मै सर्वात्मने नमः ।। ६उ.३८.६
१८३० चिन्मयत्वाद्यदा चेत्यमेति द्रष्टृचितैकताम् ।
तदा दृश्याङ्गयैवैतच्चेत्यते नान्यथा चिता ।। ६उ.३८.७
१८३१ यदा चिन्मात्रमेवेयं द्रष्टृदर्शनदृश्यदृक् ।
तदानुभवनं तत्र सर्वस्य फलितं स्थितम् ।। ६उ.३८.८
१८३२ द्रष्टृदृश्ये न यद्येकमभविष्यच्चिदात्मके ।
तद्दृश्यास्वादमज्ञः स्यान्ना दृष्ट्वेक्षुमिवोपलः ।। ६उ.३८.९
१८३३ चिन्मयत्वाच्चितौ चेत्यं जलमप्स्विव मज्जति ।
तेनानुभूतिर्भवति नान्यथा काष्ठयोरिव ।। ६उ.३८.१०
१८३४ प्राणबुद्ध्यादयः सत्तां भावनावशतो गताः ।
भावना चिच्चमत्कारः स यथेच्छमुदेति च ।। ६उ.३८.१४
१८३५ पार्श्वस्थस्वप्नमेघौघा यथा तव न काश्चन ।

सर्गप्रलयसंरम्भास्तथा खात्मान एव मे ।। ६उ.३८.२०
१८३६ पङ्कता कल्पिता व्योम्नो या पुत्रकपताकिनी ।
सा यथा शान्तत‍ामात्रं खमेवेदं तथा जगत् ।। ६उ.३८.२१
१८३७ विश्वमेव नभो यस्य शून्यं सर्वं महात्मनः ।
कुतः कस्य कथं तस्य भवत्विच्छा निरात्मनः ।। ६उ.३८.२६
१८३८ सम्यक्परीक्षितं यावन्न भ्रान्तिर्न परीक्षकाः ।
न नाम जन्ममरणे केवलं शान्तमव्ययम् ।। ६उ.३८.३०
१८३९ आबुद्ध्यादि जगदृश्यं यस्मै न स्वदते स्वतः ।
आकाशस्येव शान्तस्य तमाहुर्मुक्तमुत्तमाः ।। ६उ.३८.३३
१८४० अहमस्त्यविचारेण विचारेणाहमस्ति नो ।
अभावादहमर्थस्य क्व जगत्क्व च संसृतिः ।। ६उ.३८.३४
१८४१ यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि हंस्येषि तत्सर्वं शिवमव्ययम् ।। ६उ.३८.३७
१८४२ यदहं यत्त्वमाशा यद्यत्क्रियाकालखादयः ।
यल्लोकालोकगिरयस्तच्चिद्व्योम शिवं ततम् ।। ६उ.३८.३८
१८४३ यद्रूपालोकमननं यत्कालत्रितयं जगत् ।
यज्जरामरणार्त्यादि तन्महाचिन्नभः शिवम् ।। ६उ.३८.३९
१८४४ निश्चिकित्सो निराभासो निरिच्छो निर्मना मुनिः ।
भूत्वा निरात्मा निर्वाणस्तिष्ठ संतिष्ठसे यथा ।। ६उ.३८.४०
१८४५ संजाताकृत्रिमक्षीणसंसृतिप्रत्ययः पुमान् ।
असंकल्पो न संकल्पं वेत्ति तेनासदेव सः ।। ६उ.३९.१
१८४६ श्वासान्म्लानिरिवादर्शे कुतोऽप्यहमिति स्थिता ।
विदि साऽकारणं दृष्टा नश्यन्त्याशु न लभ्यते ।। ६उ.३९.२
१८४७ यस्य क्षीणावरणता शान्तसर्वेहतोदिता ।
परमामृतपूर्णात्मा सत्तयैव स राजते ।। ६उ.३९.३
१८४८ सर्वसंदेहदुर्ध्वान्तमिहिकामातरिश्वना ।
भाति भास्वद्धिया देशस्तेन पूर्णेन्दुनेव खम् ।। ६उ.३९.४
१८४९ विसंसृतिर्विसंदेहो लब्धज्योतिर्निरावृतिः ।
शरदाकाशविशदो ज्ञेयो विज्ञायते बुधः ।। ६उ.३९.५

१८५० निःसंकल्पो निराधारः शान्तः स्पर्शात्पवित्रताम् ।
अन्तःशीतल आधत्ते ब्रह्मलोकादिवानिलः ।। ६उ.३९.६
१८५१ असद्रूपोपलम्भानामियं वस्तुस्वभावता ।
यत्स्वर्गवेदनं स्वप्नवन्ध्यापुत्रोपलम्भवत् ।। ६उ.३९.७
१८५२ अविद्यमानमेवेदं जगद्यदनुभूयते ।
असद्रूपोपलम्भस्य सैषा वस्तुस्वभावता ।। ६उ.३९.८
१८५३ असत्येष्वेव संसारेष्वास्तामर्थः कुतो भवेत् ।
सर्गापवर्गयोः शब्दावेव वन्ध्यासुतोपमौ ।। ६उ.३९.९
१८५४ जगद्ब्रह्मतया सत्यमनिर्मितभावितम् ।
अनिष्ठितं चान्यथा तु नाहं नावगतं च तत् ।। ६उ.३९.१०
१८५५ आत्मस्वभावविश्रान्तेरियं वस्तुस्वभावता ।
यदहंतादिसर्गादिदुःखाद्यनुपलम्भता ।। ६उ.३९.११
१८५६ सुषुप्ते स्वप्नधीर्नास्ति स्वप्ने नास्ति सुषुप्तधीः ।
सर्गनिर्वाणयोर्भ्रान्ती सुषुप्तस्वप्नयोरिव ।। ६उ.३९.१५
१८५७ नात्मानमवगच्छामि न दृश्यं च जगद्भ्रमम् ।
ब्रह्म शान्तं प्रविष्टोऽस्मि ब्रह्मैवास्मि निरामयः ।। ६उ.४०.६
१८५८ ब्रह्मात्मा वेत्ति न सर्गं सर्गात्मा ब्रह्म वेत्ति नो ।
सुषुप्तो वेत्ति नो स्वप्नं स्वप्नस्थो न सुषुप्तकम् ।। ६उ.४०.९
१८५९ प्रबुद्धो ब्रह्मजगतोर्जाग्रत्स्वप्नदृशोरिव ।
रूपं जानाति भारूपं जीवन्मुक्तः प्रशान्तधीः ।। ६उ.४०.१०
१८६० यत्रादित्यो भवेत्तत्र यथालोकस्तथा भवेत् ।
परं विषयवैरस्यं तत्र यत्र प्रबुद्धधीः ।। ६उ.४१.२
१८६१ अविवेकोपहारेण यथाप्राप्तार्थपूजनैः ।। ६उ.४२.२८
१८६२ बोधाय पूज्यतां बुद्ध्या स्वभावः परमेश्वरः ।
विवेकपूजितः स्वात्मा सद्यः स्फारवरप्रदः ।। ६उ.४२.२९
१८६३ रुद्रोपेन्द्रादिपूजात्र जरत्तृणलवायते ।
विचारशमसत्सङ्गबलिपुष्पैकपूजितः ।। ६उ.४२.३०
१८६४ सद्योमोक्षफलः साधो स्वात्मैव परमेश्वरः ।
सत्यालोकनमात्रैकपूजितोऽनुत्तमार्थदः ।। ६उ.४२.३१

१८६५ यत्रास्त्यात्मेश्वरस्तत्र मूढः कोऽन्यं समाश्रयेत् ।
सत्सङ्गशमसंतोषविवेकापूजितात्मनः ।। ६उ.४२.३२

१८६६ शिरिषकुसुमायन्ते शस्त्राहिविषवह्नयः ।
देवार्चनतपस्तीर्थदानान्यतिकृतान्यपि ।। ६उ.४२.३३

१८६७ भस्मायन्ते निरर्थत्वादविवेकामहात्मनाम् ।
एतान्यपि विवेकेन क्रियन्ते सफलानि चेत् ।। ६उ.४२.३४

१८६८ विवेक एव तत्कस्मात्स्फुटमन्तर्न साध्यते ।
यथाभूतार्थविज्ञानाद्वासनोपरमे परे ।। ६उ.४२.३५

१८६९ यत्नो विवेकशब्दाख्यो भवत्यात्मप्रसादतः ।
तथा तथा विवेकोऽन्तर्वृद्धिं नेयः शमामृतैः ।। ६उ.४२.३६

१८७० यथा यथा पुनः शोषमुपयाति न विभ्रमैः ।
देहसत्तामनादृत्य यथा भूतार्थदर्शनात् ।। ६उ.४२.३७

१८७१ लज्जां भयं विषादेर्ष्ये सुखं दुःखं जयेत्समम् ।
जगदादि शरीरादि नास्त्येवादौ कुतोऽद्य तत् ।। ६उ.४२.३८

१८७२ कार्यं चेत्कारणस्यैतत्तथापि ब्रह्ममात्रकम् ।
प्रतिभामात्रमेवाच्छं न तु ज्ञप्तेर्घटादि सत् ।। ६उ.४२.३९

१८७३ संकल्पशान्तौ संकल्पपुरवत्सर्वदाखिलम् ।। ६उ.४२.४६

१८७४ स्वप्नवच्च प्रबुद्धस्य सदैवास्तं गतं जगत् ।
सनेत्ररूपानुभवं जातितोऽन्ध इव भ्रमैः ।। ६उ.४२.४७

१८७५ निर्वाणं वर्णयन्नज्ञस्ताप्यतेऽन्तर्न शाम्यति ।
कल्पनांशोपदेशेन लोकोऽविद्यामयात्मना ।। ६उ.४२.४८

१८७६ येन केनचिदज्ञत्वात्कृतार्थोऽस्मीति मन्यते ।
अकृतार्थः कृतार्थत्वं जानन्मौर्ख्यविमोहितः ।। ६उ.४२.४९

१८७७ विज्ञास्यत्यकृतार्थत्वं क्षणान्तरकदर्थनैः ।
उपायं कल्पनात्मानमनुपायं विदुर्बुधाः ।। ६उ.४२.५०

१८७८ दुःखदत्वान्निमेषेण भावाभावैषणभ्रमैः ।
जगद्भ्रमं परिज्ञाय यदवासनमासितम् ।
विरसाशेषविषयं तद्धि निर्वाणमुच्यते ।। ६उ.४२.५१

१८७९ आख्यायिकार्थप्रतिभानमेत्य

संवेत्स्यचिद्वारि भराद्द्रवात्मा ।
अवेद्यचिद्रूपमशेषमच्छं
पश्यन्विनिर्वासि जगत्स्वरूपम् ।। ६उ.४२.५२

१८८० जात्यन्धरूपानुभवानुरूपं
यदागमैर्बुद्धमबोधरूपम् ।
अधस्पदीकृत्य तदान्तरेऽस्मि-
न्बोधे निपत्यानुभवो भवाभूः ।। ६उ.४२.५३

१८८१ अज्ञानज्वरमुक्तस्य बोधशीतलितात्मनः ।
एतदेव भवेच्चिह्नं यद्भोगाम्बु न रोचते ।। ६उ.४३.२

१८८२ अलमन्यैः परिज्ञानैर्वाच्यवाचकविभ्रमैः ।
अनहंवेदनामात्रं निर्वाणं तद्विभाव्यताम् ।। ६उ.४३.३

१८८३ परिज्ञाता यथा स्वप्ने पदार्था रसयन्ति नो ।
न च सन्ति तथैवास्मिन्नहं जगदिदंभ्रमे ।। ६उ.४३.४

१८८४ अज्ञावबुद्धः संसारः स हि नास्ति मनागपि ।
अवशिष्टं च यत्सत्यं तस्य नाम न विद्यते ।। ६उ.४३.२१

१८८५ आत्मात्मीयग्रहभ्रान्तिशान्तिमात्रा विमुक्तता ।
यथा तथा स्थितस्यापि सा स्वसत्तैव योगिनः ।। ६उ.४३.२३

१८८६ निर्दग्धतृणभस्माली क्वापि याति यथानिलैः ।
सतां स्वभावविश्रामैः क्वापि याति तथा जगत् ।। ६उ.४३.२८

१८८७ शुद्धबोधस्वभावस्थैराकाशमिव शारदैः ।। ६उ.४३.५०
जाग्रत्स्वप्नसुषुप्तान्तैर्मनस्त्वं नानुभूयते । ६उ.४३.५१

१८८८ अर्थ एव मनस्कारः स चाभावात्मको भ्रमः ।। ६उ.४३.५४
मन एवार्थसंस्कारः स चाभावात्मको भ्रमः । ६उ.४३.५५

१८८९ त्वं मनस्कारमात्रात्मा संसृतौ विभ्रमायसे ।। ६उ.४३.५७
स्वभावैकपरिज्ञानान्नासि नापि भ्रमायसे । ६उ.४३.५८

१८९० मनसैव हि संसार आत्मबोधेन शाम्यति ।। ६उ.४३.५८
शुक्तिरूप्यभ्रमाकारो जनो मिथ्यैव ताम्यति । ६उ.४३.५९

१८९१ ददात्येतन्महाबुद्धे निर्वाणं परमेश्वरः ।
अहर्निशं परमया चिरं भक्त्या प्रसादितः ।। ६उ.४८.२०

१८९२ ईश्वरो न महाबुद्धे दूरे न च सुदुर्लभः ।
महाबोधमयैकात्मा स्वात्मैव परमेश्वरः ।। ६उ.४८.२२
१८९३ तस्मै सर्वं ततः सर्वं स सर्वं सर्वतश्च सः ।
सोऽन्तः सर्वमयो नित्यं तस्मै सर्वात्मने नमः ।। ६उ.४८.२३
१८९४ यथास्थितस्य साहंत्वं विश्वं चित्तं विलीयते ।
ज्ञस्यावाच्यमचित्त्वं सत्स्वरूपमवशिष्यते ।। ६उ.४९.१५
१८९५ क्लिश्यते केवलं बुद्धिरुत्तराधरदर्शनैः ।
स्तोकयाभ्यस्तया युक्त्या सत्योऽर्थो ह्यवगम्यते ।। ६उ.४९.१६
१८९६ विराडोजोविरहितं कार्यकारणतादिभिः ।
भूतभव्यभविष्यस्य जगदङ्गस्य संभवम् ।।
येन बोधात्मना बुद्धं स ज्ञ इत्यभिधीयते ।
अद्वैतस्योपशान्तस्य तस्य विश्वं न विद्यते ।। ६उ.४९.१७-१८
१८९७ पूर्वोक्ताः सर्व एवैते उपदेशा विशेषणाः ।
ज्ञस्यानुभवमायान्ति स्वतः साधुकथा इव।। ६उ.४९.१९
१८९८ यथा बाह्यार्थवैतृष्ण्ये नोपशाम्यत्यलं मनः ।
न तथा शास्त्रसंदर्भैर्नोपदेशतपोदमैः ।। ६उ.४९.४५
१८९९ इयं दृश्यभरभ्रान्तिर्नन्वविद्येति चोच्यते ।
वस्तुतो विद्यते नैषा तापनद्यां यथा पयः ।। ६उ.५२.५
१९०० उपदेश्योपदेशार्थमेनां मदुपरोधतः ।
सत्यामिव क्षणं तावदाश्रित्य श्रूयतामिदम् ।। ६उ.५२.६
१९०१ कुत एषा कथं चेति विकल्पाननुदाहरन् ।
नेदमेषां न चास्तीति स्वयं ज्ञास्यसि बोधतः ।। ६उ.५२.७
१९०२ अहंभावं विना देहस्थितिस्तज्ज्ञाज्ञयोरिह ।
आधेयस्य निराधारा न संस्थेहोपपद्यते ।। ६उ.५७.२
१९०३ अहंभावपिशाचोऽयमज्ञानशिशुनामुना ।
अविद्यमान एवान्तः कल्पितस्तेन संस्थितः ।। ६उ.५७.४
१९०४ अज्ञानमपि नास्त्येव प्रेक्षितं यन्न लभ्यते ।
विचारिणा दीपवता स्वरूपं तमसो यथा ।। ६उ.५७.५
१९०५ सर्गस्त्वयमजातत्वदज्ञज्ञातो न विद्यते ।

न जातः कारणाभावात्पूर्वमेव खवृक्षवत् ।। ६उ.५७.९
१९०६ परमाकाशकोशान्तरादिसर्गे निरामये ।
पृथ्व्यादेरुपलम्भस्य भवेत्किमिव कारणम् ।। ६उ.५७.१०
१९०७ मनःषष्ठेन्द्रियातीतं मनःषष्ठेन्द्रियात्मनः ।
साकारस्य निराकारं कथं भवति कारणम् ।। ६उ.५७.११
१९०८ बीजात्कारणतः कार्यमङ्कुरः किल जायते ।
न बीजमपि यत्रास्ति तत्र स्यादङ्कुरः कुतः ।। ६उ.५७.१२
१९०९ कारणेन विना कार्यं न च नामोपपद्यते ।
कदा क इव खे केन दृष्टो लब्धः स्फुटो द्रुमः ।। ६उ.५७.१३
१९१० संकल्पेनाम्बरे यद्वद्दृश्यते विटपादिकम् ।
स संकल्पस्तथाभूतो न तत्रास्ति पदार्थता ।। ६उ.५७.१४
१९११ एवं येयं चिदाकाशे सर्गादावनुभूयते ।
शून्यरूप इवाकाशे सर्गस्थितिरनर्गला ।। ६उ.५७.१५
१९१२ सम एव चिदाकाशः कचत्यात्मनि तत्तथा ।
स्वभाव एव सर्गाख्यश्चित्त्वाच्चैतन्यमीश्वरः ।। ६उ.५७.१६
१९१३ स्वप्नसर्गोऽत्र दृष्टान्तः प्रत्यहं योऽनुभूयते ।
स्वयं संवेदने स्वप्ने स्फुरत्यद्रिपुराकृतिः ।। ६उ.५७.१७
१९१४ चित्स्वभावे यथा स्वप्ने आस्ते सर्ग इवेह यः ।
असर्गे सर्गवद्भाति तथा पूर्वं महाम्बरे ।। ६उ.५७.१८
१९१५ अवेद्यवेदनं शुद्धमेकं भात्यजमव्ययम् ।
सर्गादौ यदनाद्यन्तं स्थितः सर्गः स एव नः ।। ६उ.५७.१९
१९१६ नेह सर्गोऽस्ति नैवायं पृथ्व्यादिगणगोलकः ।
सर्वं शान्तमनालम्बं ब्रह्मैव ब्रह्मणि स्थितम् ।। ६उ.५७.२०
१९१७ सर्वशक्त्यात्म तद्ब्रह्म यथा कचति यादृशम् ।
रूपमत्यजदेवाच्छं तथा भवति तादृशम् ।। ६उ.५७.२१
१९१८ यथा स्वप्नपुरं जन्तोश्चिन्मात्रप्रविजृम्भितम् ।
तथैव सर्गः सर्गादौ शुद्धचिन्मात्रजृम्भितम् ।। ६उ.५७.२२
१९१९ एवं स्थिते कुतः सर्गः कुतो विद्या क्व चाज्ञता ।
ब्रह्म शान्तं धनं सर्वं क्वाहंकारादयः स्थिताः ।। ६उ.५७.२५

१९२० अहंभावस्य संशान्तिरेषाऽसौ कथिता तव ।
अहंभावः परिज्ञातः पिशाच इव शाम्यति ।। ६उ.५७.२६
१९२१ मया त्वेवमहंभावः परिज्ञातो यदाखिलः ।
तदा मे विद्यमानोऽपि निष्फलः शरदभ्रवत् ।। ६उ.५७.२७
१९२२ चित्राग्निदाहो विज्ञातो यथा दाह्येषु निष्फलः ।
तथाहंभावसर्गादि ज्ञातं निष्फलतामियात् ।। ६उ.५७.२८
१९२३ इति मेऽहकृतेस्त्यागे रागे च समता यदा ।
तदा व्योम्न इवाव्योम्नः सर्गे सर्ग च मे स्थितिः ।। ६उ.५७.२९
१९२४ अहंभावस्य नैवाहं नाहंभावो ममेति च ।
तेन विद्धि चिदाकाशमेवेदमिति निर्धनम् ।। ६उ.५७.३०
१९२५ न सच्छास्त्रेण सा विद्धि न सन्यायेन सा कला ।
अस्ति नास्त्यमितोद्योगाद्यदभ्यासान्न सिद्ध्यति ।। ६उ.६७.२१
१९२६ इत्थं नाम परिप्रौढा मिथ्याज्ञानविषूचिका ।
शाम्यत्येव विचारेण पश्याभ्यासविजृम्भितम् ।। ६उ.६७.२७
१९२७ दुःसाध्याः सिद्धिमायान्ति रिपवो यान्ति मित्रताम् ।
विषाण्यमृततां यान्ति संतताभ्यासयोगतः ।। ६उ.६७.३३
१९२८ येनाभ्यासः परित्यक्त इष्टे वस्तुनि सोऽधमः ।
कदाचिन्न तदाप्नोति वन्ध्या स्वतनयं यथा ।। ६उ.६७.३४
१९२९ अभ्यासभासोऽभिमतं वस्तु प्रकटयन्त्यलम् ।
प्रापयन्ति न निर्विघ्नं घटं दीपप्रभा यथा ।। ६उ.६७.३८
१९३० जगद्विराजोः सत्तैका पवनस्पन्दयोरिव ।
जगद्यत्स विराडेव यो विराट् तज्जगत्स्मृतम् ।। ६उ.७४.२४
१९३१ जगद्ब्रह्मा विराट् चेति शब्दाः पर्यायवाचकाः ।
संकल्पमात्रमेवैते शुद्धचिद्व्योमरूपिणः ।। ६उ.७४.२५
१९३२ वासनायां विलीनायामदर्शनमुपागताः ।
स्वप्नलोकाःप्रबुद्धानामिव स्वं रूपमागताः ।। ६उ.७९.१२
१९३३ आकाशात्मैव देहोऽयं भाति वासनया स्फुटः ।
तदभावात्तु नो भाति स्वप्नो बोधवतो यथा ।। ६उ.७९.१३
१९३४ अन्तरिक्षगतो देहो यथा स्वप्ने विलोक्यते ।

बोधे तद्वासनाशान्तौ न किंचिदपि लक्ष्यते ।। ६उ.७९.१४
१९३५ जाग्रत्यपि तथैवायं वासनायाः परिक्षये ।
नैवातिवाहिको नैव लक्ष्यतेऽत्राधिभौतिकः ।। ६उ.७९.१५
१९३६ स्वप्नानुभव एषोऽत्र दृष्टान्तत्वेन लक्ष्यते ।
आबालमेतत्संसिद्धमनुभूतं श्रुतं स्मृतम् ।। ६उ.७९.१६
१९३७ अपह्नुते च वा योऽपि स्वमेवानुभवं शठः ।
स त्याजः को ह्यलीकेन सुप्तमुद्बोधयेत्किल ।। ६उ.७९.१७
१९३८ यान्तर्वेत्ति यथा संवित्सा तथानुभवत्यलम् ।
अस्तु सत्यमसत्यं वा सिद्धमित्यनुभूतितः ।। ६उ.७९.३१
१९३९ उपलम्भ उदेत्यादौ ब्रह्मणो वासना ततः ।
तच्छान्तिं विद्धि निर्वाणं तत्सत्तां संसृतिभ्रमम् ।। ६उ.७९.३५
१९४० उत्पन्नैव च सानादौ परब्रह्मण्यसंभवात् ।
उत्पन्ना समयाद्यासौ ब्रह्मैव परमेव सत् ।। ६उ.७९.३६
१९४१ एतावद्यत्परिज्ञानं तन्निर्वाणं विदुर्बुधाः ।
यदत्रैवापरिज्ञानं तं बन्धं विद्धि राघव ।। ६उ.७९.३७
१९४२ जननं मरणं मायामोहं मान्द्यमवस्तुता ।
वस्तुता च विवेकश्च बन्धो मोक्षः शुभाशुभे ।। ६उ.८२.१४
१९४३ विद्याऽविद्या विदेहत्वं सदेहत्वं क्षणश्चिरम् ।
चञ्चलत्वं स्थिरत्वं वा त्वं चाहं चेतरश्च तत् ।। ६उ.८२.१५
१९४४ सदसच्चाथ सदसन्मौर्ख्यं पाण्डित्यमेव च ।
देशकालक्रियाद्रव्यकलनाकेलिकल्पनम् ।। ६उ.८२.१६
१९४५ रूपालोकमनस्कारकर्मबुद्धीन्द्रियात्मकम् ।
तेजोवार्यनिलाकाशपृथ्व्यादिकमिदं ततम् ।। ६उ.८२.१७
१९४६ एतत्सर्वमसौ शुद्धचिदाकाशो निरामयः ।
अजहद्व्योमतामेव सर्वात्मैवैवमास्थितः ।। ६उ.८२.१८
१९४७ एतत्सर्वं च विमलं खमेवात्र न संशयः ।
अस्मादनन्यत्स्वप्नादिर्दृष्टान्तोऽत्राविखण्डितः ।। ६उ.८२.१९
१९४८ चिन्मयः परमाकाशो य एव कथितो मया ।
एषोऽसौ शिव इत्युक्तो भवत्येष सनातनः ।। ६उ.८२.२०

१९४९ स एष हरिरित्यास्ते भवत्येष पितामहः ।
चन्द्रोऽर्क इन्द्रो वरुणो यमो वैश्रवणोऽनलः ।। ६उ.८२.२१
१९५० अनिलो जलदोम्भोधिर्ह्यो यद्वस्त्वस्ति नास्ति च ।
इत्येते चिन्मयाकाशकोशलेशाः स्फुरन्त्यलम् ।। ६उ.८२.२२
१९५१ एवंविधाभिः संज्ञाभिर्मुधभावनये दृशाः ।
स्वभावमात्रबोधेन भवन्त्येते तु तादृशाः ।। ६उ.८२.२३
१९५२ अबोधो बोध इत्येवं चिद्व्योमैवात्मनि स्थितम् ।
तस्माद्भेदो द्वैतमैक्यं नास्त्येवेति प्रशाम्यताम् ।। ६उ.८२.२४
१९५३ तावत्तरङ्गत्वमयं करोति
जीवः स्वसंसारमहासमुद्रे ।
यावन्न जानाति परं स्वभावं
निरामयं तन्मयतामुपेतः ।। ६उ.८२.२५
१९५४ ज्ञाने तु शान्तिं स तथोपयाति
यथा न सोऽब्धिर्न तरङ्गकोऽसौ ।
यथास्थितं सर्वमिदं च शान्तं
भवत्यनन्तं परमेव तस्य ।। ६उ.८२.२६
१९५५ यथा स्वप्ने चिदेवान्तः पुरपत्तनवद्भवेत् ।
पुरादि न तु तत्किंचिद्विज्ञानाकाशमेव तत् ।। ६उ.८३.२४
१९५६ आत्मनात्मनि चिच्छून्यं ज्ञात्वा च ज्ञेयमप्यलम् ।
तथा च सर्गादारभ्य वेत्ति स्वं कचनं च तत् ।। ६उ.८३.२५
१९५७ स्वयमन्तः कचन्ती चित्स्वभावाकाशकोटरे ।
क्षणकल्पजगद्भ्रान्तिं धत्ते कल्पनया स्वया ।। ६उ.८३.२६
१९५८ स्वयमन्तः कचत्कान्तिश्चिदाकाशः स्वभावखे ।
अयं सोहमयं च त्वं करोतीत्यादिकल्पनम् ।। ६उ.८३.२७
१९५९ तस्मान्न द्वैतमस्तीह न चैक्यं न च शून्यता ।
न चेतनाचेतनं वै मौनमेव न तच्च वा।। ६उ.८३.२८
१९६० न चेतति क्वचित्किंचित्कश्चिच्चेत्यात्मभावतः ।
तेन चेतापि नास्तीव मौनमेवावशिष्यते ।। ६उ.८३.२९
१९६१ निर्विकल्पसमाधिर्हि सिद्धान्तः सर्ववाङ्मये।

तच्च जीवदृषन्मौनं तूष्णीमेवात आस्यताम् ।। ६उ.८३.३०
१९६२ महारामायणप्रायशास्त्रप्रेक्षणमात्रतः ।
एतदासाद्यते नित्यं किमेतावति दुष्करम् ।। ६उ.९५.२५
१९६३ संसारवासनाभावरूपे सक्ता नु यस्य धीः ।
मन्दो मोक्षे निराकाङ्क्षी स श्वा कीटोऽथवा जनः।। ६उ.९५.२६
१९६४ भोगाभोगः किलायं यः स जीवन्मुक्तबुद्धिना ।
कीदृशो भुज्यमानः स्यात्कीदृक्स्यान्मौर्ख्यसेविना ।। ६उ.९५.२७
१९६५ महारामायणप्रायशास्त्रप्रेक्षणमात्रतः ।
अन्तःशीतलतोदेति परार्थेषु हिमोपमा ।। ६उ.९५.२८
१९६६ मोक्षः शीतलचित्तत्वं बन्धः संतप्तचित्तता ।
एतस्मिन्नपि नार्थितत्वमहो लोकस्य मूढता ।। ६उ.९५.२९
१९६७ अयं प्रकृत्या विषयैर्वशीकृतः
परस्परं स्त्रीधनलोलुपो जनः ।
यथार्थसंदर्शनतः सुखी भवे -
न्मुमुक्षुशास्त्रार्थविचारणादितः ।। ६उ.९५.३०
१९६८ पाषाणाख्यानमेतत्ते कथितं कार्यकोविद ।
अनयेमाः स्फुरद्दृष्ट्या सृष्टयो नभसि स्थिताः ।। ६उ.९६.१
१९६९ न च स्थितं किंचनापि क्वचनापि कदाचन ।
स्थितं ब्रह्मघने ब्रह्म यथास्थितमखण्डितम् ।। ६उ.९६.२
१९७० ब्रह्म चिन्मात्रकं विद्धि तद्यथा स्वप्नदृष्टिषु ।
पुरं भवन्निजाद्रूपान्न कदाचन भिद्यते ।। ६उ.९६.३
१९७१ स्वयंभूत्वसमापत्तौ तथा दृश्यव्यवस्थितौ ।
स्वरूपमजहत्त्वेव चिदाकाशमजं स्थितम् ।। ६उ.९६.४
१९७२ न स्वयंभूर्न च जगन्न स्वप्नपुरमस्त्यलम् ।
स्थितं संविन्महादृष्ट्या ब्रह्म चिन्मात्रमेतया ।। ६उ.९६.५
१९७३ यथा पुरं भवत्स्वप्ने चिद्रूपं स्वात्मनि स्थितम् ।
अखण्डमेवमासृष्टेरामहाप्रलयस्थितेः ।। ६उ.९६.६
१९७४ हेमहेमाश्मनोः स्वप्नपुरचेतनयोर्यथा ।
भेदो न संभवत्येव न भेदश्चितिसर्गयोः ।। ६उ.९६.७

१९७५ चितिरेकास्ति नो सर्गो हेमास्ति न तदूर्मिका ।
स्वप्नाचले चिदेवास्ति न तु काचन शैलता ।। ६उ.९६.८

१९७६ चिदेव शैलवद्भाति यथा स्वप्ने निरामया ।
तथा ब्रह्म निराकारं सर्गवद्भाति नेतरत् ।। ६उ.९६.९

१९७७ चिन्मात्रमिदमाकाशमनन्तमजमव्ययम् ।
महाकल्पसहस्रेषु नोदेति न च शाम्यति ।। ६उ.९६.१०

१९७८ चिदाकाशो हि पुरुषश्चिदाकाशो भवानयम् ।
चिदाकाशोऽहमजरश्चिदाकाशो जगत्त्रयम् ।। ६उ.९६.११

१९७९ चिदाकाशं वर्जयित्वा शवमेव शरीरकम् ।
अच्छेद्योऽसावदाह्योऽसौ चिदाकाशो न शाम्यति ।। ६उ.९६.१२

१९८० अतो न किंचिन्म्रियते न च किंचन जायते ।
चित्त्वात्ततश्चित्कचनं जगदित्यनुभूयते ।। ६उ.९६.१३

१९८१ चिन्मात्रपुरुषो जन्तुर्म्रियते यदि नाम वा ।
ततो मरिष्यत्तत्पुत्रो निःसंदेहं पितुर्मृतौ ।। ६उ.९६.१४

१९८२ एकस्मिन्प्रमृते जन्तावमरिष्यंस्तु सर्वदा ।
सर्व एव जनाः शून्यमभविष्यन्महीतलम् ।। ६उ.९६.१५

१९८३ न चाद्यापि मृतं राम चिन्मात्रं कस्यचित्क्वचित् ।
न च शून्या स्थिता भूमिस्तस्माच्चित्पुरुषोऽक्षयः ।। ६उ.९६.१६

१९८४ एकं चिन्मात्रमेवाहं न शरीरादयो मम ।
इति सत्यनुसंधाने क्व जन्ममरणादयः ।। ६उ.९६.१७

१९८५ अहं चिन्मात्रममलमित्यात्मानुभवं स्वयम् ।
अपहन्त्यात्महन्तारो निमज्जन्त्यापदर्णवे ।। ६उ.९६.१८

१९८६ चिदहं गगनादच्छा नित्यानन्ता निरामया ।
किं जीवितं मे किं वापि मरणं वा सुखासुखे ।। ६उ.९६.१९

१९८७ व्योमात्मचेतनमहं के शरीरादयो मम ।
इत्यात्महापह्नुतेऽन्तर्योऽनुभूतं धिगस्तु तम् ।। ६उ.९६.२०

१९८८ चिदाकाशमहं स्वच्छमनुभूतिरिति स्फुटा ।
यस्यास्तमागता मूढं तं जीवन्तं शवं विदुः ।। ६उ.९६.२१

१९८९ अहं वेदनमात्रात्मा कानि देहेन्द्रियाणि मे ।

लब्धात्मानमिति स्वच्छं प्रविलुम्पन्ति नापदः ।। ६उ.९६.२२

१९९० चिन्मात्रं शुद्धमात्मानं योऽवलम्ब्य स्थिरः स्थितः ।
नाधयस्तं विलुम्पन्ति महोपलमिवेषवः ।। ६उ.९६.२३

१९९१ चित्त्वं स्वभावं विस्मृत्य बद्धास्था ये शरीरके ।
तैः सुवर्णं परित्यज्य गृहीतं भस्म वस्तुतः ।। ६उ.९६.२४

१९९२ बलं बुद्धिश्च तेजश्च देहोऽहमिति भावनात् ।
नश्यत्युदेत्येतदेव चिदेवाहमिति स्थितेः ।। ६उ.९६.२५

१९९३ चिदाकाशमहं शुद्धं के मे मरणजन्मनी ।
एवं स्थिते स्युः किंनिष्ठा लोभमोहमदादयः ।। ६उ.९६.२६

१९९४ चिदाकाशादृते देहान्योऽन्यत्सारमवाप्नुयात् ।
तस्मै तद्युज्यते वक्तुं सन्ति लोभादयस्त्विति ।। ६उ.९६.२७

१९९५ न च्छिद्ये न च दह्येऽहं चिन्मात्रं वज्रवच्चिति ।
न देही निश्चयो यस्य तं प्रत्यन्तकरस्तृणम् ।। ६उ.९६.२८

१९९६ अहो नु मुग्धता ज्ञानदृष्टिनां यद्विदन्त्यलम् ।
शरीरशकलाभावे नश्याम इति मोहिताः ।। ६उ.९६.२९

१९९७ अहं चिन्नभ एवेति सत्ये भावे स्थिरे सति ।
वज्रपातयुगान्ताग्निदाहाः पुष्पोत्करोमपाः ।। ६उ.९६.३०

१९९८ चिन्मात्रममरं नाहं यन्नश्यामीति रोदिति ।
अनष्ट एव तद्देहो जातापूर्वा खरोलिका ।। ६उ.९६.३१

१९९९ इदं चेतनमेवाहं नाहं देहादिदृष्टयः ।
इति निश्चयवान्योऽन्तर्न स मुह्यति कर्हिचित् । ६उ.९६.३२

२००० अहं चेतनमाकाशो नाशो मे नोपपद्यते ।
चेतनेन जगत्पूर्णं केव संदेहितात्र वः ।। ६उ.९६.३३

२००१ चेतनं वर्जयित्वान्यत्किंचिद्यूयं जना यदि ।
यदुच्यतां महामूढाः स्वात्मा किमपलप्यते ।। ६उ.९६.३४

२००२ तच्चेतनं चेन्म्रियते तज्जनाः प्रत्यहं मृताः ।
ब्रूत किं न मृता यूयं तन्मृतं किल चेतनम् ।। ६उ.९६.३५

२००३ तस्मान्न म्रियते किंचिन्न च जीवति किंचन ।
जीवामीति मृतोऽस्मीति चिच्चेतति न नश्यति ।। ६उ.९६.३६

२००४ चिच्चेतति यथा वा यत्तत्तथा साशु पश्यति ।
आबालमेषोऽनुभवो न क्वचित्सा च नश्यति ।। ६उ.९६.३७

२००५ परिपश्यति संसारं परिपश्यति मुक्तताम् ।
सुखदुःखानि जानाति स्वरूपात्तन्न भिद्यते ।। ६उ.९६.३८

२००६ अपरिज्ञातदेहात्तु धत्ते मोहाभिधां स्वयम् ।
परिज्ञातस्वरूपात्तु धत्ते मोक्षाभिधां स्वयम् ।। ६उ.९६.३९

२००७ नास्तमेति न चोदेति न कदाचन किंचन ।
सर्वमेव च चिन्मात्रमाकाशविशदं यतः ।। ६उ.९६.४०

२००८ न तदस्ति न यत्सत्यं न तदस्ति न यन्मृषा ।
यद्यथा येन निर्णीतं तत्तथा तं प्रति स्थितम् ।। ६उ.९६.४१

२००९ यद्यद्यथा जगति चेतति चेतनात्मा
तत्तत्तथानुभवतीत्यनुभूतिसिद्धम् ।
दृष्टं विषामृतदृशेव पदार्थजातं
नातोस्ति संविदविधेयमिति प्रसिद्धम् ।। ६उ.९६.४२

२०१० संविन्मयत्वाज्जगतः स्वप्नस्य परमात्मनः ।
ब्रह्माकाशतया सर्वं ब्रह्मैवेत्यनुभूयते ।। ६उ.९७.१

२०११ भ्रमस्य चातिदृश्यत्वाददृश्यत्वान्महाचितेः ।
मदशक्तिवदात्मेति सत्यतास्यापि युज्यते ।। ६उ.९७.२

२०१२ असत्त्वाद्दृश्यविश्रान्तेरलभ्यत्वान्महाचितेः ।
उपलब्धुरभावाच्च शून्यनाम्नीव सत्यपि ।। ६उ.९७.३

२०१३ चितिश्चिन्तामणिरिव कल्पद्रुम इवेप्सितम् ।
आशु संपादयत्यन्तरात्मनात्मनि खात्मिका ।। ६उ.९७.१६

२०१४ तस्मात्स्वनिश्चये यस्मिन्यः स्थितः स तथा ततः ।
अवश्यं फलमाप्नोति न चेद्बाल्यान्निवर्तते ।। ६उ.९७.१८

२०१५ विचार्य पण्डितैः सार्धं श्रेष्ठवस्तुनि धीमता ।
स रूढो निश्चयो ग्राह्यो नेतरत्र यथा तथा ।। ६उ.९७.१९

२०१६ संभवत्युत्तमप्रज्ञः शास्त्रतो व्यवहारतः ।
यो यत्र नाम तत्रासौ पण्डितस्तं समाश्रयेत् ।। ६उ.९७.२०

२०१७ सतां विवदमानानां सच्छास्त्रव्यवहारिणाम् ।

यः समाह्लादकोऽनिन्द्यः स श्रेष्ठस्तं समाश्रयेत् ।। ६उ.९७.२१

२०१८ जातौ जातौ कतिपये व्यपदेश्या भवन्ति ते ।
येषां यान्ति प्रकाशेन दिवसा भास्वतामिव ।। ६उ.९७.२५

२०१९ या चासीद्दृश्यतैषां तां विद्धि त्वमविचारणाम् ।
सा चेदानीं विचारेण विनष्टातः क्व दृश्यते ।। ६उ.१०३.१७

२०२० अस्मिन्नेव धियो यत्न आत्मज्ञानविचारणे ।
यत्नेन परमोऽभ्यासः स लोकद्वयसिद्धिदः ।। ६उ.१०३.१८

२०२१ अविद्योपशमस्त्वेष जातोऽपि भवतामिह ।
अभ्यासेन विना साधो न सिद्धिमुपगच्छति ।। ६उ.१०३.१९

२०२२ त्रोद्वेगं संपरित्यज्य गृहीत्वानुदिनं क्षणम् ।
लोकद्वयहितं पथ्यमिदं शास्त्रं विचार्यताम् ।। ६उ.१०३.२०

२०२३ विज्ञातमप्यविज्ञातमात्मज्ञानमिदं भवेत् ।
भवतां भूरिभागानां संभूयाभ्यसनं विना ।। ६उ.१०३.२१

२०२४ योऽयमर्थं प्रार्थयते तदर्थं यतते तथा ।
सोऽवश्यं तमवाप्नोति न चेच्छान्तो निर्वर्तते ।। ६उ.१०३.२२

२०२५ तस्मादस्मान्निवर्तध्वमसच्छास्त्रविचारणात् ।
शान्तिं प्राप्स्यथ सच्छास्त्राज्जयलक्ष्मीं यथा रणात् ।।६उ.१०३.२३

२०२६ अस्माच्छास्त्रादृते श्रेयो न भूतं न भविष्यति ।
ततः परमबोधार्थमिदमेव विचार्यताम् ।। ६उ.१०३.२५

२०२७ स्वयमेव विचार्येदं परो बोधोऽनुभूयते ।
संसाराध्वश्रमहरो न त्वेतद्वरशापवत् ।। ६उ.१०३.२६

२०२८ यन्न पित्रा न वा मात्रा न चापि सुकृतैः कृतम् ।
श्रेयस्तद्वः परिज्ञातमिदमाशु करिष्यति ।। ६उ.१०३.२७

२०२९ क्रीणन्ति प्राणपण्येन धनं मानं घनभ्रमाः ।
यथाशास्त्रैः कथं बुद्ध्या न क्रीणन्त्यजरं पदम् ।। ६उ.१०३.३४

२०३० प्रलपन्तमहोरात्रं युष्मदर्थेन मामिमम् ।
यं प्रदृश्येदमाकर्ण्य स्वात्मनैवात्मतार्प्यताम् ।। ६उ.१०३.३७

२०३१ अद्यैव न चिकित्सां यः करोति मरणापदः ।
संप्राप्तायां मृतौ मूढः करिष्यति किमातुरः ।। ६उ.१०३.३८

२०३२ अस्माद्ग्रन्थादृते ग्रन्थो नान्यः स्वात्मावबोधने ।
नूनमर्थकरो ग्राह्यस्तिलस्तैलार्थिनामिव ।। ६उ.१०३.३९
२०३३ विद्यमानमपि ज्ञानं ज्ञातं शास्त्रगणान्न यत् ।
दुर्बोधं मधुरं तत्तु ज्ञास्यन्तीतो न संशयः ।। ६उ.१०३.४१
२०३४ इदमुत्तममाख्यानं मुख्यानां शास्त्रदृष्टिषु ।
सुखेन बोधदं हृद्यमपूर्वं न तु किंचन ।। ६उ.१०३.४२
२०३५ यो ह्यद्यापि न संप्राप्तः पण्डितैरविखण्डितैः ।
स इतः प्राप्यते बोधः सुवर्णमिव सैकतात् ।। ६उ.१०३.४४
२०३६ शास्त्रकर्तरि मङ्क्तव्यं न कदाचन कुत्रचित् ।
शास्त्रार्थ एव तन्नित्यं युक्तियुक्तानुभूतिदे ।। ६उ.१०३.४५
२०३७ अज्ञानान्मत्सरान्मोहादविचारिभिरेकता ।
अवहेलितशास्त्रार्थैः कर्तव्या नात्महन्तृभिः ।। ६उ.१०३.४६
२०३८ श्यामायमाना नायन्ति यावन्मरणवासराः ।
सारः संह्रियतां तावद्वैरस्यं वस्तुदृष्टिषु ।। ६उ.१०३.५०
२०३९ सर्वभावेषु वैरस्यं न यावत्समुपागतम् ।
भावानां भावना तावत्तानवं नोपगच्छति ।। ६उ.१०३.५२
२०४० आत्मानमलमुद्धर्तुं वासनातानवादृते ।
नास्त्युपायो महाबुद्धे कश्चनापि कदाचन ।। ६उ.१०३.५३
२०४१ भावास्तु यदि विद्यन्ते तद्धिते वस्तुभावना ।
किं त्वेते नैव सन्तीह शशशृङ्गादयो यथा ।। ६उ.१०३.५४
२०४२ सर्व एव जगद्भावा अविचारितचारवः ।
अविद्यमानसद्भावा विचाराद्विशरारवः ।। ६उ.१०३.५५
२०४३ सर्व एव जगद्भावाः कारणाभावतो भृशम् ।
सर्गादावेव नोत्पन्ना यच्चेदं भाति तत्परम् ।। ६उ.१०३.५७
२०४४ पदे सर्वेन्द्रियातीते मनःषष्ठेन्द्रियात्मनाम् ।
भावानां कारणं नास्ति मनःषष्ठेन्द्रियात्मकम् ।। ६उ.१०३.५८
२०४५ भावानां विविधाख्यानामनाख्यं कारणं कुतः ।
कुतो वस्तुन्यवस्तुत्वं व्योमन्यव्योमता कुतः ।। ६उ.१०३.५९
२०४६ साकारस्य हि साकारं वटधानादिवद्भवेत् ।

बीजं तद्वस्तु साकारं जायतेऽन्यत्कुतोऽन्यथा ।। ६उ.१०३.६०
२०४७ न किंचिदपि यत्रास्ति बीजमाकृतिमन्मनाक् ।
तत आकृतिमद्विश्वं भवतीति विडम्बनम् ।। ६उ.१०३.६१
२०४८ कार्यकारणभावादि तस्मिन्नहि परे पदे ।
वाचालत्वेन यन्नाम कल्प्यते मौर्ख्यमेव तत् ।। ६उ.१०३.६२
२०४९ सहकारिनिमित्तानामभावे हि न कारणात् ।
कार्यं भवेदन्यदेति बालैरप्यनुभूयते ।। ६उ.१०३.६३
२०५० आब्रह्मस्तम्बपर्यन्तमलीकं जायते जगत् ।
यथा स्वप्ने तथालीकमेवमाशु विनश्यति ।। ६उ.१०३.८८
२०५१ चिद्व्योमैवैत्य विश्वत्वं यथा स्वप्ने विनश्यति ।
अनुदित्वैव विश्वत्वं जाग्रदाख्ये तथैव च ।। ६उ.१०३.८९
२०५२ अनुभूतमलीकं चाप्यलीकं सत्यवत्स्थितम् ।
संविदेव यथा स्वप्ने नगरादितयोदिता ।। ६उ.१०३.९०
२०५३ सति वाऽसति वा देहे
निर्दुःखसुखत्वमक्षयं मोक्षः ।
बुद्धेऽमले स्वभावे
निर्भरविश्रान्तिरस्तु सर्वेह ।। ६उ.१०४.९
२०५४ यथा द्वौ सदृशौ सूर्यौ यथा द्वौ सदृशौ नरौ ।
जाग्रत्स्वप्नौ तथैवैतौ मनागप्यत्र नान्यता ।। ६उ.१०५.१८
२०५५ समयोर्यमयोर्भ्रात्रोर्व्यवहाराय नामनी ।
यद्वत्क्रियेते द्वे तद्वज्जाग्रत्स्वप्नशिलामये ।। ६उ.१०६.२
२०५६ वस्तुतस्त्वनयोर्भेदो न द्वयोः पयसोरिव ।
द्वयमप्येकमेवैतच्चिन्मात्रं व्योम निर्मलम् ।। ६उ.१०६.३
२०५७ देशाद्देशान्तरं दूरं प्राप्तायाः संविदो वपुः ।
निमिषेणैव तन्मध्ये चिदाकाशं तदुच्यते ।। ६उ.१०६.४
२०५८ विनिवृत्ताखिलेच्छस्य पुंसः संशान्तचेतसः ।
यादृशः स्यात्समो भावस्तादृशं चिन्नभः स्मृतम् ।। ६उ.१०६.६
२०५९ अनागतायां निद्रायां मनोविषयसंक्षये ।
पुंसः स्वस्थस्य यो भावः स चिदाकाश उच्यते ।। ६उ.१०६.७

२०६० तृणगुल्मलतादीनां वृद्धिमागच्छतामृतौ ।
य: स्यादुन्मतो भाव: स चिदाकाश उच्यते ।। ६उ.१०६.८
२०६१ रूपालोकमनस्कारविमुक्तस्यामृतस्य य: ।
भाव: पुंस: शरद्व्योमविशदस्तच्चिदम्बरम् ।। ६उ.१०६.९
२०६२ यदेतदासनं सृष्टं काष्ठपाषाणभूभृताम् ।
चेतनानां च सत्तात्म चिदाकाश: स उच्यते ।। ६उ.१०६.१०
२०६३ द्रष्टृदर्शनदृश्यानां त्रयाणामुदयो यत: ।
यत्र वास्तमयश्चित्खं तद्विद्धि विगतामयम् ।। ६उ.१०६.११
२०६४ यत उद्यन्ति यस्मिंश्च चित्रा: परिणमन्त्यलम् ।
पदार्थानुभवा: सर्वे चिदाकाश: स उच्यते ।। ६उ.१०६.१२
२०६५ यस्मिन्सर्वं यत: सर्वं य: सर्वं सर्वतश्च य: ।
यश्च सर्वमयो नित्यं स चिदाकाश उच्यते ।। ६उ.१०६.१३
२०६६ दिवि भूमौ बहिश्चान्तस्तथान्यस्य समाभिध: ।
यो विभात्यवभासात्मा चिदाकाश: स उच्यते ।। ६उ.१०६.१४
२०६७ यस्मात्सर्वा: प्रसूयन्ते सर्गप्रलयविक्रिया: ।
यस्मिंश्चैव प्रलीयन्ते यन्मयास्तच्चिदम्बरम् ।। ६उ.१०६.१६
२०६८ निद्रायां विनिवृत्तायां यतो विश्वं प्रवर्तते ।
निवर्तते च यच्छान्तौ तच्चिदम्बरमुच्यते ।। ६उ.१०६.१७
२०६९ यस्योन्मेषनिमेषाभ्यां जगत्सत्तालयोदयौ ।
स्वानुभूत्यात्मकं स्वान्त: स्थितं तद्विद्धि चिन्नभ: ।। ६उ.१०६.१८
२०७० नेदं नेदं तदित्येवं सर्वं निर्णीय सर्वथा ।
यन्न किंचित्सदा सर्वं तच्चिद्व्योमेति कथ्यते ।। ६उ.१०६.१९
२०७१ देशाद्देशान्तरप्राप्तौ यन्मध्ये संविदो वपु: ।
दूरतोऽर्धनिमेषेण तच्चिन्मात्रवपु: स्मृतम् ।। ६उ.१०६.२०
२०७२ विश्वं तन्मयमेवेदं यथा भूतं यथा स्थितम् ।
रूपालोकमनस्कारैर्युक्तमप्येवमीदृशम् ।। ६उ.१०६.२१
२०७३ तत्तदेव परं शान्तं चिद्व्योमैव तथा स्थितम् ।
स्वरूपादच्युतं स्वस्थं सौम्यं जगदिवोदितम् ।। ६उ.१०६.३१
२०७४ न हीदमग्रे यद्दृष्टं दृश्यं तत्सत्कदाचन ।

न चापि द्रष्टा दृष्टार्थाभावे क्व द्रष्टृता किल ।। ६उ.१०६.३२
२०७५ असद्रूपस्य दृश्यस्य कारणाभावत: सदा ।
दृश्यतास्येत्यपि प्रौढिनिर्देशस्यात्यसंभवात् ।। ६उ.१०६.३४
२०७६ यदिदं भासते किंचिद्द्रष्टृदृश्यभ्रमात्मकम् ।
जगदादि परं रूपं तद्विद्धि परमात्मन: ।। ६उ.१०६.३५
२०७७ स्वप्ने चिन्मात्र एवास्ते यथा गगनकाननम् ।
तथा जगत्तया भाति स्वय चिन्मात्रमात्मनि ।। ६उ.१०६.३६
२०७८ इहादिसर्गात्प्रभृति नास्त्युपादानकारणम् ।
किंचनापि क्वचिदपि भातीत्थं ब्रह्म केवलम् ।। ६उ.१०६.३७
२०७९ यथा भावस्य भावत्वं यथा शून्यस्य शून्यता ।
आकारिणो यथाकारस्तथा चिन्नभसो जगत् ।। ६उ.१०६.३९
२०८० इदं विद्धि चिदाभासं परमार्थघनं घनम् ।
इत्थं स्थितं स्वयं भातं द्रष्टृदृश्यदृगात्मकम् ।। ६उ.१०६.४०
२०८१ वस्तुतस्तु द्वयाभावान्नाभासि न च भासनम् ।
किमपीदमनिर्देश्यं सद्वाऽसद्वेति वेत्ति क: ।। ६उ.१०६.४१
२०८२ एवं चेत्तद्वद ब्रह्मन्कार्यकारणतादिक: ।
कथं भेद: किमायत: कथं सत्यत्वमागत: ।। ६उ.१०६.४२
२०८३ चित्प्रकाशो यथाभानं यदा भावयति स्वयम् ।
स्वात्मा तथा तदेवाशु पश्यसीत्यसि दृष्टवान् ।। ६उ.१०६.४३
२०८४ चिद्व्योमैवायमाकार: स्वे व्योम्न्येव न मुह्यति ।
स्वयमेव यथा स्वप्ने कोऽस्य पर्यनुयोगकृत् ।। ६उ.१०६.४४
२०८५ भावाद्भावान्तरप्राप्तौ मध्ये यत्संविदो वपु: ।
तच्चिद्व्योम तदेवेदं सर्वं च स्थिति नेतरत् ।। ६उ.१०६.४५
२०८६ कार्यकारणभावादिदृशोऽविद्याविजृम्भिका: ।
जगद्वत्कल्पयत्येष कोऽस्य पर्यनुयोगकृत् ।। ६उ.१०६.४६
२०८७ द्रष्टा भोक्ताथ कर्ता वा कश्चित्स्यादितरो यदि ।
तत्कथं किमिदं दृश्यमिति युज्येत नान्यथा ।। ६उ.१०६.४७
२०८८ यत्र स्वप्ने निराभासं चिद्व्योमैव विराजते ।
शुद्धमेकमनेकात्म तत्र किं क्व विकल्प्यते ।। ६उ.१०६.४८

२०८९ आस्वयंभुव एवेयं चिन्मात्रे भाति सर्गभाः ।
परिज्ञाता सती सा तु ब्रह्मैव भवति क्षणात् ।। ६उ.१०६.४९
२०९० एषैव त्वपरिज्ञाता भ्रान्तिर्मायेति कथ्यते ।
जगदित्युच्यते विद्या दृश्यमित्युपवर्ण्यते ।। ६उ.१०६.५०
२०९१ चिदाकाशप्रकाशेन चित्ता दृश्यपिशाचकः ।
वेतालो बालकेनेव बुद्धोऽसन्नेव सन्निव ।। ६उ.१०६.५१
२०९२ जगत्तात्मन्यसत्यापि चिद्व्योम्नैवानुभूयते ।
सत्येव साङ्गलेखेव स्वप्नेऽद्रिपुरता यथा ।। ६उ.१०६.५२
२०९३ अहमद्रिरहं रुद्रः समुद्रोऽहमहं विराट् ।
चेत्यते खे चितैवेति स्वप्नेऽद्रिपुरता यथा ।। ६उ.१०६.५३
२०९४ आकारि कारणाभावाज्जातं कार्यं न किंचन ।
महाप्रलयचिद्व्योम्नि चित्स्थितेत्थमिदन्तया ।। ६उ.१०६.५४
२०९५ अकारणमेवेदं व्योम व्योम्नानुभूयते ।
जगदित्येव शून्याङ्गं चिन्मात्रात्म चिदात्मनि ।। ६उ.१०६.५५
२०९६ सर्व एव जडा जीर्णा दर्पणा इव जन्तवः ।
समीपगत एवान्तः कुर्वतस्तु विचारणम् ।। ६उ.१०६.५६
२०९७ तत्तत्स्वरूपमुत्सृज्य बुद्ध्वा चिन्मात्रखं जगत् ।
अश्मना चेतनेनैव स्थेयं नास्थेतरोत्तमा ।। ६उ.१०६.५७
२०९८ यथास्ते चलयद्देहं वार्यावर्तजगद्द्रवः ।
चेततीति तथा चित्त्वं स्थिता चित्तज्जगद्दृशा ।। ६उ.१०६.५८
२०९९ यथा कल्पद्रुमोऽभीष्टं कुर्याच्चिन्तामणिर्यथा ।
तथा यद्भावितं स्वान्तस्तत्पूरयति चित्क्षणात् ।। ६उ.१०६.५९
२१०० चितिश्चिन्तामणिरिव कल्पद्रुम इवेप्सितम् ।
आशु संपादयत्यन्तरात्मनात्मनि खात्मिका ।। ६उ.१०६.६०
२१०१ देशाद्देशान्तरप्राप्तौ मध्यदेशे चितेर्वपुः ।
यत्तन्मयमिदं दृश्यं कुतो द्वैतैक्यविभ्रमः ।। ६उ.१०६.६१
२१०२ चिच्छायैवं कचत्यच्छमनन्ता भास्वरोदरा ।
अङ्गरिक्तापि दृश्यान्तः शून्यता नीलतेव खे ।। ६उ.१०६.६२
२१०३ विसदृशकार्यानुभवो

न भवति सहकारिकारणाभावात् ।
सर्गादावत आद्या
चिदेव दृश्यं यथा स्वप्ने ।। ६.१०६.६३
२१०४ अच्येत्यचिन्मयं विश्वं विष्वगाभाति चिन्नभः ।
अत्र चिच्चेतनं चेदं चेत्यमप्येवमात्मकम् ।। ६उ.१०७.१
२१०५ अतो जीवन्नपि मृत इव सर्वोऽवतिष्ठते ।
असावहं च त्वं चेति जीवन्तोऽपि मृता इव ।। ६उ.१०७.२
२१०६ काष्ठमौनमृता एव व्यवहारगता अपि ।
खगमा एव वा सर्वे भावाः स्थावरजङ्गमाः ।। ६उ.१०७.३
२१०७ आकाशकाचकच्यात्म यदिदं किंचिदाततम् ।
न किंचिदेव तद्विद्धि किंचिद्व्योम्नि कुतो भवेत् ।। ६उ.१०७.४
२१०८ केशोण्ड्रकनदीवाहधूमालीमौक्तिकादिवत् ।
यत्खं कचति तत्रास्ति नानुभूतेऽपि वस्तुता ।। ६उ.१०७.५
२१०९ तथैवास्मिञ्जगन्नाम्नि चिद्व्योग्नि कचने चिते ।
अनुभूतेऽपि निःशून्ये कास्थास्थाभावकश्च कः ।। ६उ.१०७.६
२११० सहकार्यादिपूर्वाणां कारणानामभावतः ।
यदादावेव नोत्पन्नं तन्नामाद्य भवेत्कुतः ।। ६उ.१०७.१०
२१११ मोक्षोऽपि चेतसो धर्मश्चेतस्येव स तिष्ठति ।। ६उ.१२५.३०
२११२ मोक्षो हि न परज्ञेयो धारणादिप्रयोगवत् ।
आत्मसंवेद्य एवासौ मध्वाद्यास्वादसौख्यवत् ।।६उ.१२५.३३।३४
२११३ तदेवाश्वपरिज्ञातं मिथ्या विद्येति कथ्यते ।
परिज्ञातं तु तच्छान्तं तथा ब्रह्मेति कथ्यते ।। ६उ.१२९.१७

२११४ वस्तुतः कर्म नास्त्येव नाविद्यास्ति न सर्गधीः ।
स्वसंवेदनतः सर्वमसदेव प्रवर्तते ।। ६उ.१४२.३६

२११५ ब्रह्मैव सर्गो भूतात्मा कर्म जन्मेति कल्पनाः ।
स्वयं कुर्वदिदं भाति विभुत्वात्कल्पितार्थभाक् ।। ६उ.१४२.३७

२११६ अपरिज्ञानमात्रं यत्स्वयं वै परमात्मनः ।
तदेतत्कर्म बन्धाय तत्तज्ज्ञस्योपशाम्यति ।। ६उ.१४२.४३

२११७ यावद्यावत्परिज्ञानं पण्डितस्य प्रवर्तते ।
तावत्तावत्तदैवास्य कर्म शाम्यति बन्धनम् ।। ६उ.१४२.४४

२११८ जाग्रत्स्वप्नसुषुप्तादिपरमार्थविदां विदाम् ।
न विद्यते किंचिदपि यथास्थितमवस्थितम् ।। ६उ.१४६.२१

२११९ चिद्व्योमार्थतयार्थानां यथास्थितमिदं जगत् ।
सरूपालोकमननमपि चिद्व्योम केवलम् ।। ६उ.१६२.१

२१२० स्वप्नचित्पुररूपत्वादन्यद्यस्मान्न विद्यते ।
जगत्तस्मान्नभः शान्तं नेह नानास्ति किंचन ।। ६उ.१६२.२

२१२१ चिदाभानमनानैव नानेव परिलक्ष्यते ।
अनात्मैवात्मनात्मानं स्वप्नाकाशपुरेष्विव ।। ६उ.१६२.३

२१२२ सर्गादाविव चिद्व्योम स्वप्नाकाशपुरं जगत् ।
आभातमेवासत्यं च नूनं सत्यमिव स्थितम् ।। ६उ.१६२.४

२१२३ तज्ज्ञाज्ञातो न मूर्खाणामज्ञाज्ञातो न तद्विदाम् ।
विद्यते सर्गशब्दार्थः सत्यासत्यमयात्मकः ।। ६उ.१६२.५

२१२४ तज्ज्ञायोस्तयोरन्तःप्रतिपतौ तु यत्स्थितम् ।
न बोद्धुं न च वक्तुं ते जानीतस्तौ परस्परम् ।। ६उ.१६२.६

२१२५ स्वबुद्धौ स्वर्गशब्दार्थो मिथोन्तस्तत्किलानयोः ।
स्थैर्यास्थैर्ये जाग्रतो द्वे अक्षीबक्षीबयोरिव ।। ६उ.१६२.७

२१२६ द्रवस्थितिमिता यद्वत्सरिद्वारिणि वीचयः ।
चितौ स्थितिमितास्तद्वच्चेतनात्सर्गवीचयः ।। ६उ.१६२.८

२१२७ चिद्रूपं यन्न किंचित्तदिदं किंचिदवस्थितम् ।
भाति दृश्यमिवादृश्यमपि स्वप्नपुरेष्विव ।। ६उ.१६२.९

२१२८ चिच्छायेयं प्रकचति जगदित्यभिशब्दिता ।
नन्वमूर्तैव मूर्तेव द्रव्यच्छायेव वै तता ।। ६उ.१६२.१०

२१२९ कायमात्रकमेवेदं भ्रान्तिमात्रमसन्मयम् ।
पिशाचविभ्रमालोकप्रायमायासनं दृढम् ।। ६उ.१६२.११

२१३० मनोराज्यमिवासत्यं लोलं लम्बाम्बुबिन्दुवत् ।
द्वाभ्यामित्यनुभूतिभ्यां यदसत्तत्र कात्मता ।। ६उ.१६२.१२

२१३१ विदार्यदारुरववत्तरङ्गानिलशब्दवत् ।
खे शब्दाः पवनस्फोटा भान्त्यर्था वासनोदयाः ।। ६उ.१६२.१३

२१३२ सर्गादितः स्वपरिभा कचति स्वप्नशैलवत् ।
वस्तुतस्तु न शब्दोस्ति नार्थोऽस्ति न च दृश्यता ।।६उ.१६२.१४

२१३३ यदिहं चास्ति चाभाति तत्सर्वं परमार्थसत् ।
अन्यादृक्कारणाभावात्सर्गादावेव नोदितम् ।। ६उ.१६२.१५

२१३४ निरस्तशब्दभेदार्थमनिरस्ताखिलार्थकम् ।
शाम्यामि परिनिर्वामि व्योमैवास्मीति बुद्ध्यताम् ।। ६उ.१६२.१६

२१३५ त्यज्यतामात्मविश्रान्त्या शुद्धबोधैकरूपया ।
जीवेऽजवं जवीभावस्त्वसदुत्थित आत्मना ।। ६उ.१६२.१७

२१३६ आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ।
आत्मात्मना न चेत्त्रातस्तदुपायोऽस्ति नेतरः ।। ६उ.१६२.१८

२१३७ तर तारुण्यमस्तीदं यावत्ते तावदम्बुधेः ।
ननु संसारनाम्नोऽस्माद्बुद्ध्या नावाा विशुद्ध्या ।। ६उ.१६२.१९

२१३८ अद्यैव कुरु यच्छ्रेयो वृद्धः सन्किं करिष्यसि ।
स्वगात्राण्यपि भाराय भवन्ति हि विपर्यये ।। ६उ.१६२.२०

२१३९ शैशवं वार्धकं ज्ञेयं तिर्यक्त्वं मृतिरेव च ।
तारुण्यमेव जीवस्य जीवितं तद्विवेकि चेत् ।। ६उ.१६२.२१

२१४० संसारमिममासाद्य विद्युत्संपातचञ्चलम् ।
सच्छास्त्रसाधुसंपर्कैः कर्दमात्सारमुद्धरेत् ।। ६उ.१६२.२२

२१४१ अहो बत नराः क्रूरा गतिः कैषां भविष्यति ।
कुर्वन्ति कर्दमोन्मग्ने नात्मन्यपि निजोदयम् ।। ६उ.१६२.२३

२१४२ यथा मृन्मयवेतालसभा ग्राम्यस्य भङ्गदा ।
यथा भूतार्थविज्ञानान्मृन्मयेव न भङ्गदा ।। ६उ.१६२.२४

२१४३ तथा ब्रह्ममयी दृश्यलक्ष्मीरज्ञस्य भङ्गदा ।
यथा भूतार्थविज्ञाने ब्रह्मैवास्ते न भङ्गदा ।। ६उ.१६२.२५

२१४४ शाम्यत्यशान्तमेवेदं स्थितमेव विलीयते ।
दृश्यं तत्त्वपरिज्ञानाद्दृश्यमानं न दृश्यते ।। ६उ.१६२.२६

२१४५ स्फुटानुभवनस्यापि स्वप्नकाले निजे यथा ।
परिज्ञानादसत्यत्वमेव सत्यपदं गता ।। ६उ.१६२.२७

२१४६ तथानुभूयमानापि सर्गसंवेदनाम्बरे ।
चिन्मये तत्त्वविज्ञानाच्छून्यतैवावशिष्यते ।। ६उ.१६२.२८

२१४७ विनेन्द्रियजयेनेदं नाज्ञत्वमुपशाम्यति ।
तदिन्द्रियाणि जीयन्ते कथं कथय मे मुने ।। ६उ.१६३.१

२१४८ न च प्रभूतभोगेषु न पुंस्त्वे न च जीविते ।
न चेन्द्रियजयोन्मुक्तौ दीपस्तनुदृशो यथा ।। ६उ.१६३.२

२१४९ तदिन्द्रियजये युक्तिमिमामविकलां शृणु ।
सिद्धिमेति स्वयत्नेन सुखेन तनुरेतया ।। ६उ.१६३.३

२१५० चिन्मात्रं पुरुषं विद्धि चेतनाज्जीवनामकम् ।
यच्चेतति स जीवोऽन्तस्तन्मयो भवति क्षणात् ।। ६उ.१६३.४

२१५१ संवित्प्रयत्नसंबोधनिशिताङ्कुशकर्षणैः ।
मनोमतङ्गजं मत्तं जित्वा जयति नान्यथा ।। ६उ.१६३.५

२१५२ चित्तमिन्द्रियसेनाया नायकं तज्जयाज्जयः ।
उपानद्गूढपादस्य ननु चर्मावृतैव भूः ।। ६उ.१६३.६

२१५३ संविदं संविदाकाशे संरोप्य हृदि तिष्ठतः ।
स्वयमेव मनः शाम्येन्नीहार इव शारदः ।। ६उ.१६३.७

२१५४ स्वसंविद्यन्तसंरोधाद्यथा चेतः प्रशाम्यति ।
न तथाङ्ग तपस्तीर्थविद्यायज्ञक्रियागणैः ।। ६उ.१६३.८

२१५५ यच्च संवेद्यते किंचित्तत्तत्संविदि संविदा ।
नूनं विस्मार्यते यत्नाद्भोगानामिति तज्जयः ।। ६उ.१६३.९

२१५६ स्वसंवेदनयत्नेन विषयामिषतोऽनिशम् ।
किंचित्संरोधिता संवित्तत्प्राप्तं वैबुधं पदम् ।। ६उ.१६३.१०

२१५७ स्वधर्मव्यवहारेण यदायाति तदेव मे ।
रोचते नान्यदित्येव पदे वज्रदृढीभव ।। ६उ.१६३.११

२१५८ संवित्प्रवृत्तिमर्थेषु विरुद्धेषु विवर्जयन् ।
अर्जयञ्छमसंतोषौ यः स्थितः स जितेन्द्रियः ।। ६उ.१६३.१२

२१५९ संविद्रसिकतास्वन्तस्तथा नीरसतासु च ।
यस्य नोद्वेगमायाति मनस्तस्योपशाम्यति ।। ६उ.१६३.१३

२१६० संवित्प्रयत्नसंरोधान्मनः स्वायनमुज्झति ।
चेतश्चपलतोन्मुक्तं विवेकमनुधावति ।। ६उ.१६३.१४

२१६१ विवेकवानुदारात्मा विजितेन्द्रिय उच्यते ।
वासनावीचिवेगेन भवाब्धौ न स मुह्यते ।। ६उ.१६३.१५

२१६२ साधुसंपर्कसच्छास्त्रसमालोकनतोऽनिशम् ।
जितेन्द्रियो यथावस्तु जगत्सत्यं प्रपश्यति ।। ६उ.१६३.१६

२१६३ सत्यावलोकनाच्छान्तिमेति संसारसंभ्रमः ।
मराविव जलज्ञानं मिथ्यापतनदुःखदम् ।। ६उ.१६३.१७

२१६४ अच्येत्यमेव चिन्मात्रमिदं जगदिति स्थितम् ।
इत्येव सत्यबोधस्य बन्धमोक्षदृशौ कुतः ।। ६उ.१६३.१८

२१६५ अनाकारं यथा वारि क्षीणं वहति नो पुनः ।
अकारणं तथा दृश्यं ज्ञानच्छिन्नं न रोहति ।। ६उ.१६३.१९

२१६६ इदं चिद्व्योम्नि चिच्छाया जगदित्येव भासते ।
शून्यशून्यैव चिच्चासौ शून्या चेत्येव निश्चयः ।। ६उ.१६३.२२

२१६७ स्वप्नदर्शनदृष्टान्तः केन नामात्र खण्ड्यते ।
असन्मयोऽनुभूतश्च स्वानुभूतोऽप्यसन्मयः ।। ६उ.१६३.२३

२१६८ सोऽङ्ग संवित्तिमात्रात्मा यद्यद्राज्यं महीयते ।
नकर्तृकर्मकरणं रूपं तद्वज्जगच्चितेः ।। ६उ.१६३.२४

२१६९ अकर्तृकर्मकरणमहं चिद्घनमात्रकम् ।
जगच्चेदमनिर्देश्यं स्वसंवेदनलक्षणम् ।। ६उ.१६३.२५

२१७० यथा स्वप्नेषु मरणमनुभूतं न विद्यते ।
मरौ जलेच्छाऽविद्येयं विद्यमाना न विद्यते ।। ६उ.१६३.२६

२१७१ स्थिते सुषुप्ततुर्ये द्वे सदा स्वप्नेऽथ जाग्रति ।
जाग्रत्स्वप्नावेकमेव तुर्यं वेत्ति तु बुद्धधीः ।। ६उ.१६३.३४

२१७२ जाग्रत्स्वप्नः सुषुप्तं च सर्वं तुर्यं प्रबोधिनः ।
नाविद्या विद्यते तस्य द्वयस्थोऽप्येव सोऽद्वयः ।। ६उ.१६३.३५

२१७३ द्वैताद्वैतसमुद्भेदैर्वाक्यसंदर्भविभ्रमैः ।
क्रीडन्त्यबुद्धाः शिशवो बोधवृद्धा हसन्ति तान् ।। ६उ.१६३.३७

२१७४ द्वैताद्वैतविवादेहा हृदयाकाशमञ्जरी ।
विनैतयेह नोदेति प्रबोधाकाशमार्जनम् ।। ६उ.१६३.३८

२१७५ सुहृद्भूत्वा विवादेन द्वैताद्वैतविचारणा ।
कृता हृदयगेहेऽन्तरविद्याभस्ममार्जनी ।। ६उ.१६३.३९

२१७६ इदं बहूक्तमेतेन किमेतेनेति दुर्मतिः ।
न ग्राह्यैतावताप्युक्ते नादत्तै नेदमज्ञधीः ।। ६उ.१६३.४७

२१७७ भूयोभूयः परावृत्त्या चिरमास्वाद्यते यदि ।
श्रूयते कथ्यते चेदं तज्ज्ञेनाज्ञेन भूयते ।। ६उ.१६३.४८

२१७८ यस्त्वेकवारमालोक्य दृष्टमित्येव संत्यजेत् ।
इदं स नाम शास्त्रेभ्यो भस्माप्याप्नोति नाधमः ।। ६उ.१६३.४९

२१७९ इदमुत्तममाख्यानमध्येयं वेदवत्सदा ।
व्याख्येयं पूजनीयं च पुरुषार्थफलप्रदम् ।। ६उ.१६३.५०

२१८० यदस्मात्प्राप्यते शास्त्रात्तत्तद्वेदादवाप्यते ।
अस्मिन्ज्ञाते क्रिया ज्ञानं द्वयं याति पवित्रताम् ।। ६उ.१६३.५१

२१८१ वेदान्ततर्कसिद्धान्तास्त्वस्मिन्ज्ञाते च बुध्यते ।
इदमुत्तममाख्यानं व्याख्यातं शास्त्रदृष्टिषु ।। ६उ.१६३.५२

२१८२ कारुण्याद्भवतामेतदहं वच्मि न मायया ।
भवन्तस्त्ववगच्छन्ति मायामेतद्विचार्यताम् ।। ६उ.१६३.५३

२१८३ अस्माच्छास्त्रवराद्बोधा जायन्ते ये विचारितात् ।
लवणैर्व्यञ्जनानीव भान्ति शास्त्रान्तराणि तैः ।। ६उ.१६३.५४

२१८४ तातस्य कूपोऽयमिति ब्रुवाणाः
क्षारं जलं कापुरुषाः पिबन्ति ।
यथा भवन्तो विविचारवन्त-
स्तथानिशं मा भवताज्ञताप्त्यै ।। ६उ.१६३.५६

२१८५ अयं सोहमयं चाज्ञः सत्योऽयमिति बुद्धयः ।
संभवन्ति न तत्त्वज्ञे क्व मेरौ मृगतृष्णिका ।। ६उ.१६४.५

२१८६ यथैकद्रव्यनिष्ठे हि चित्तेऽन्यद्रव्यसंविदः ।
न भवन्ति परे तद्वन्नान्यास्तिष्ठन्ति संविदः ।। ६उ.१६४.६

२१८७ इदं नासीन्न चोत्पन्नं न चास्ति न भविष्यति ।
जगद्ब्रह्मैव सद्रूपमिदमित्थमवस्थितम् ।। ६उ.१६४.७

२१८८ स्वप्नेषु कल्पनपुरेषु यथान्यदस्ति
चिन्मात्रमच्छगगनं ननु वर्जयित्वा ।
नो किंचनापि न च रूपमरूपकेषु
रूपं तथा जगति संप्रति जाग्रदाख्ये ।। ६उ.१६४.९

२१८९ अत्यन्तासंभवं दृश्यं यद्वै निर्वाणमासितम् ।
शुद्धबोधोदयं शान्तं तद्विद्धि परमं पदम् ।। ६उ.१७४.२१

२१९० मोक्षोपायभिधं शास्त्रमिदं वाचयतानिशम् ।
बुद्ध्युपायेन शुद्धेन पुंसा नान्येन केनचित् ।। ६उ.१७४.२३

२१९१ न तीर्थेन न दानेन न स्नानेन न विद्यया ।
न ध्यानेन न योगेन न तपोभिर्न चाध्वरैः ।। ६उ.१७४.२४

२१९२ भ्रान्तिमात्रं किलेदं सदसत्सदिव लक्ष्यते ।
व्योमैव जगदाकारं स्वप्नोऽनिद्रे चिदम्बरे ।। ६उ.१७४.२५

२१९३ न शाम्यति तपस्तीर्थैर्भ्रान्तिर्नाम कदाचन ।
तपस्तीर्थादिना स्वर्गाः प्राप्यन्ते न तु मुक्तता ।। ६उ.१७४.२६

२१९४ भ्रान्तिः शाम्यति शास्त्रार्थात्सम्यग्बुद्ध्यावलोकितात् ।
आत्मज्ञानमयान्मोक्षोपायादेवेह नान्यतः ।। ६उ.१७४.२७

२१९५ आलोककारिणात्यर्थं शास्त्रार्थेनैव शाम्यति ।
अमलेनाखिला भ्रान्तिः प्रकाशेनैव तामसी ।। ६उ.१७४.२८

२१९६ सर्गसंहारसंस्थानां भासो भान्ति चिदम्बरे ।
स्पन्दनानीव मरुति द्रवत्वानीव वारिणि ।। ६उ.१७४.२९

२१९७ शास्त्रस्यास्य तु यन्नाम वादनं तद्विनापरः ।
अभ्यासो दृश्यसंशान्त्यै न भूतो न भविष्यति ।। ६उ.१७५.६८

२१९८ न जीवन्न मृतं चित्तं रोधमायाति संसृतेः ।
अविनाभाविदेहत्वाद्बोधात्त्वेतन्न पश्यति ।। ६उ.१७५.६९

२१९९ सर्वदैवाविनाभावि चित्तं दृश्यशरीरयोः ।
इह चामुत्र चैतस्य बोधान्ते शाम्यतः स्वयम् ।। ६उ.१७५.७०

२२०० कारणं मौर्ख्यमेवास्य तच्चास्मादेव शास्त्रतः ।
किंचित्संस्कृतबुद्धीनां वाचितादेव शाम्यति ।। ६उ.१७५.७२

२२०१ अबुद्धमुत्तरग्रन्थात्पूर्वं पूर्वं हि बुध्यते ।
ग्रन्थं पदपदार्थज्ञः खेदवान्न निवर्तते ।। ६उ.१७५.७३

२२०२ उपायमिदमेवातो विद्धि शास्त्रं भ्रमक्षये ।
अनन्यसाधारणतां गतमित्यनुभूयते ।। ६उ.१७५.७४

२२०३ तस्मादस्मान्महाशास्त्राद्यथाशक्ति विचारयेत् ।
भागौ द्वौ भागमेकं वा तेन दुःखक्षयो भवेत् ।। ६उ.१७५.७५

२२०४ आरुषेयमिदमिति प्रमादाच्चेन्न रोचते ।
तदन्यदात्मविज्ञानशास्त्रं किंचिद्विचारयेत् ।। ६उ.१७५.७६

२२०५ अनर्थेनाविचारेण वयः कुर्यान्न भस्मसात् ।
बोधेन ज्ञानसारेण दृश्यं कर्तव्यमात्मसात् ।। ६उ.१७५.७७

२२०६ आयुषः क्षण एकोऽपि सर्वरत्नैर्न लभ्यते ।
नीयते तद्वृथा येन प्रमादः सुमहानहो ।। ६उ.१७५.७८

२२०७ अनुभूतमपि च नो स-
दृश्यमिदं द्रष्टृसहितमपि ।
स्वप्ननिजमरणबान्धव-
रोदनमिव सदिव कचितमपि ।। ६उ.१७५.७९

२२०८ हेयोपादेयदृष्टी यस्य क्षीणे हि तस्य वै ।
क्रियात्यागेन कोऽर्थः स्यात्क्रियासंश्रयणेन वा ।। ६उ.१९९.२

२२०९ न तदस्तीह यत्त्याज्यं ज्ञस्योद्वेगकरं भवेत् ।
न वास्ति यदुपादेयं तज्ज्ञसंश्रेयतां गतम् ।। ६उ.१९९.३

२२१० ज्ञस्य नार्थः कर्मत्यागैर्नार्थः कर्मसमाश्रयैः ।
तेन स्थितं यथा यद्यत्तत्तथैव करोत्यसौ ।। ६उ.१९९.४

२२११ त्वत्प्रसादेन यातोऽस्मि परां निर्मलतां प्रभो ।
शान्ताशेषकलङ्काङ्कं शरदीव नभस्तलम् ।। ६उ.२०१.१०

२२१२ सर्वा एवोपशान्ता मे भ्रान्तयो भवभङ्गदाः ।
स्वरूपेणावदातेन तिष्ठाम्यच्छमिवाम्बरम् ।। ६उ.२०१.११

२२१३ स्थितोऽहं गलितग्रन्थिः शान्ताशेषविशेषणः ।
स्फटिकालयमध्यस्थस्फटिकामलधीरहम् ।। ६उ.२०१.१२

२२१४ अन्यच्छ्रोतुमथाहर्तुं शान्तं नेच्छति मे मनः ।
परां तृप्तिमुपायान्तं सुषुप्तमिव संस्थितम् ।। ६उ.२०१.१३

२२१५ शान्ताशेषपरामर्शं विगताशेषकौतुकम् ।
संत्यक्ताशेषसंकल्पं शान्तं मम मुने मनः ।। ६उ.२०१.१४

२२१६ परिनिर्वामि शाम्यामि जाग्रदेव जगत्स्थितौ ।
अस्वप्नमपुनर्बोधं स्वपिमीव निरामयम् ।। ६उ.२०१.१५

२२१७ खादप्यतितरामच्छं चिदाकाशांशमात्रकम् ।
जगदित्येव पश्यामि लोचनाद्यङ्गतां गतः ।। ६उ.२०१.१९

२२१८ आकाशमात्रमेवेदं जददित्येकनिश्चयः ।
दृश्यनाम्नि नभस्यस्मिन्क्षये जागर्मि चाक्षयः ।। ६उ.२०१.२०

२२१९ यथाकामं यथाप्राप्तं यथास्थितमिव स्थितम् ।
यद्वक्ति तदविघ्नेन करोम्यपगतैषणम् ।। ६उ.२०१.२१

२२२० न तुष्यामि न हृष्यामि न पुष्यामि न रोदिमि ।
कार्यं कार्यं करोम्येको भ्रान्तिर्दूरं गता मम ।। ६उ.२०१.२२

२२२१ अन्यतामेतु सर्गोऽयं वातु वा प्रलयानिलः ।
सौम्यो भवतु वा देशः स्वस्थोऽहं स्वात्मनि स्थितः ।।६उ.२०१.२३

२२२२ सर्वमेव श्रुतं श्राव्यं ज्ञेयं ज्ञातमशेषतः ।
त्वया राघव भो नास्ति ज्ञातव्यमपरं वरम् ।। ६उ.२०३.२०

२२२३ यथा मयोपदिष्टोऽसि यथा पश्यसि शास्त्रतः ।
यथानुभवसि श्रेष्ठमेकवाक्यं तथा कुरु ।। ६उ.२०३.२१

२२२४ राम संप्राप्तबुद्धिस्त्वं श्रोतव्यं ते न विद्यते ।
कृतकृत्या तवैषा धीः प्राप्तप्राप्या स्थितात्मनि ।। ६उ.२०३.४८

२२२५ ब्रह्मन्नेवमहं मन्ये यथाहं कृतकृत्यधीः ।
निर्वाणोस्मि प्रशान्तोस्मि नाकाङ्क्षा मम विद्यते ।।६उ.२०३.५०

२२२६ वक्तव्यमुक्तं भवता ज्ञातं ज्ञेयं मयाखिलम् ।
तव विश्रान्तिमायातु कृतकृत्या सरस्वती ।। ६उ.२०३.५१

२२२७ अधिगतमधिगम्यं ज्ञेयमाप्तुं मयेदं
विगतमखिलमैक्यं द्वैतमस्तं प्रयातम् ।
परिगलितमशेषं दृश्यभेदावभानं
ननु निपुणमपास्ताशेषसंसारितास्था ।। ६उ.२०३.५२

२२२८ अर्थो वेदनसंकेतः शब्दो जलरवोपमः ।
दृश्यमेतच्चिदाभानं स्वप्नवत्काभवज्जगत् ।। ६उ.२०४.२

२२२९ जाग्रद्वै स्वप्नसंदृष्टः स्मरणात्म स्थितं पुरः ।
संविद्वेदनमात्रं सत्तदन्याकारवत्ततम् ।। ६उ.२०४.३

२२३० यथाच्छं संविदाकाशं मयि स्वप्नपुरात्मकम् ।
सरूपमपि नीरूपं तथेदं भुवनत्रयम् ।। ६उ.२०४.४

२२३१ आत्मास्य केवलं व्योम न सद्भूम्यचलादिकम् ।
जगतः स्वप्नरूपस्य निराकारो निरास्पदः ।। ६उ.२०४.१२

२२३२ आत्मैव व्योमरूपोऽस्य निराधारो निराकृतिः ।
विनाकृतेर्वा व्योम्नोऽस्य किमाधारेण कारणम् ।। ६उ.२०४.१३

२२३३ न किंचिदेतत्संपन्नं सद्यथैतन्न संविदः ।
एतच्चित्कचनं नाम मन एव तथा स्थितम् ।। ६उ.२०४.१४

२२३४ दिक्कालाद्यत्र चिद्भानं चिद्भानमचलादिकम् ।
चिज्जलादि तथा बोधाच्चित्खं वाय्वादि तद्विदः ।। ६उ.२०४.१५

२२३५ संविदेव किल व्योम तिष्ठति व्योमतामिता ।
दृषत्तयास्ते काठिन्याद्द्रवाज्जलमिव स्थिता ।। ६.उ.२०४.१६

२२३६ वस्तुतस्तु न भूम्यादि किंचित्तन्न च दृश्यता ।
चिदाकाशमनन्तं तत्सर्वमेकं तदात्मकम् ।। ६उ.२०४.१७

२२३७ इदं जगद्भानमभानमेव
चिद्व्योम शून्यं परमार्थ एव ।
यथार्थसंदर्शनबुद्धबुद्धे-
रबुद्धबुद्धेस्तु यथा तथास्तु ।। ६उ.२०४.२९

२२३८ चित्त्वाद्ब्रह्मखमेवाहमिति वेत्तीव यत्स्वयम् ।
तदेव परमेष्ठित्वं तस्योदरमिदं जगत् ।। ६उ.२१२.१

२२३९ एवं स्थिते न च ब्रह्मा न च जातं जगत्स्थितम् ।
स्थितं यथास्थितमजं परं ब्रह्मैव पूर्ववत् ।। ६उ.२१२.२

२२४० संवित्तौ तु जगद्रूपं भासतेऽप्येवमेव तत् ।
मृगतृष्णेव मिथ्यैव दृश्यमानमपि त्वसत् ।। ६उ.२१२.३

२२४१ अतःप्रभृति शून्येयं भ्रान्तिरभ्युदिता न वा ।
कुतः केव किल भ्रान्तिर्ब्रह्मैव तदनामयम् ।। ६उ.२१२.४

२२४२ जगद्ब्रह्मजलावर्तो द्वित्वैकत्वे किलात्र के ।
क्वावर्तपयसोर्द्वित्वं द्वित्वाभावात्क्व चैकता ।। ६उ.२१२.५

२२४३ तद्ब्रह्म घनमाशान्तं चित्त्वाच्चेतत्यहं विदत् ।
निजं शून्यत्वमन्तस्थं व्योमेव विततान्तरम् ।। ६उ.२१२.६

२२४४ पवनः स्पन्दनमिव हुताशन इवोष्णताम् ।
स्वशैत्यमिव पूर्णेन्दुः सत्तामर्थ इवात्मनः ।। ६उ.२१२.७

२२४५ एतद्ब्रह्मन्कदा नाम तन्न चेतितवन्मुने ।
निरावृत्तमनाद्यन्तं किमिदानीं प्रचेतति ।। ६उ.२१२.८

२२४६ एवमेतत्सदैवैतदहमाद्यपि चेतति ।
न ह्यनादेरजस्यास्य काप्यपेक्षा स्वसंविदा ।। ६उ.२१२.९

२२४७ सर्गासर्गनभोरूपं ब्रह्म सर्वत्र सर्वदा ।
न कदाचिदिदं नेदं ज्ञातं नेदं च किंचन ।। ६उ.२१२.१०

२२४८ पवनस्पन्दनं चन्द्रशैत्यं शून्यत्वमम्बरम् ।
ब्रह्माहंत्वमनन्यात्म न कदाचिन्न चेतति ।। ६उ.२१२.११

२२४९ सर्वदैवेदृशी सत्ता न कदाचिदनीदृशी ।
जगद्यस्मादनाद्यन्तं ब्रह्मात्मैव निरामयम् ।। ६उ.२१२.१२

२२५० केवलं त्वमबुद्धत्वाच्छब्दश्रवणवेधितः ।
अद्वये ब्रह्मबोधेऽस्मिन्द्वितामभ्युपगच्छसि ।। ६उ.२१२.१३

२२५१ न कश्चित्किंचिदेवेह न कदाचिन्न चेतति ।
न काश्चिच्च तदन्यात्मा न कदाचिच्च चेतति ।। ६उ.२१२.१४

२२५२ इदं त्रिभुवनाभासमीदृशं भाति सर्वदा ।
शान्तं राम समं ब्रह्म नेह नानास्ति किंचन ।। ६उ.२१२.१५

२२५३ न कदाचन जायन्ते नभसः पादपाद्रयः ।
ब्रह्मणश्च जगन्तीति मत्वा शान्तिं परां व्रज ।। ६उ.२१२.१६

२२५४ उपदेश्योपदेशार्थं संदेहावसरेऽल्पधीः ।
यावन्न बुद्धस्तावत्त्वं भेदमभ्युपगच्छसि ।। ६उ.२१२.१७

२२५५ बोधस्य तु विबुद्धस्य न शास्त्रादि न शब्दधीः ।
न भेदबुद्धिर्नो भेदः किमप्येष प्रजापतेः।। ६उ.२१२.१८

२२५६ बुद्धमेतन्मया ब्रह्मन्प्रकृतं तदुदाहर ।
वचो मदवबोधार्थं यदुदाहृतवानसि ।। ६उ.२१२.१९

२२५७ किं तस्मिंश्चेतितेऽहंत्वे पदे संपद्यते परे ।
बुद्धवानसि शुश्रूषुर्नाहं तृप्तिमुपैमि हि ।। ६उ.२१२.२०

२२५८ अहंत्वे सत्यथैतस्मिन्व्योमसत्ता प्रवर्तते ।
दिक्सत्ता कालसत्ता च भेदसत्ताभ्युदेति च ।। ६उ.२१२.२१

२२५९ यदा किलेहाहमिति तदा नात्राहमित्यपि ।
भातीत्युदेति नाना खे स्वात्मैव द्वैतमक्रमम् ।। ६३.२१२.२२

२२६० व्योमात्मिकानामेतासां सत्तानामभिधानधीः ।
भविष्यत्युत्तरं कालं तदा त्वाकाशमेव तत् ।। ६३.२१२.२३

२२६१ एतस्मिन्परिसंपन्ने दिक्कालकलात्मनि ।
अहंभावे निराकारे व्योम तन्मात्रवेदिनि ।। ६३.२१२.२४

२२६२ इदमाभाति भारूपं वेदनं दृश्यनाम यत् ।
भूत्वा ब्रह्मैव निर्बाधमब्रह्मेव विराजते ।। ६३.२१२.२५

२२६३ ब्रह्मैव शान्तमजमेकमनादिमध्यं
व्योमैव जीवकलनामिव भावयित्वा ।
व्योम्न्येव पश्यति निरावरणे विसारि
दृश्यं स्वरूपमपि चान्यदिवाऽऽत्मवित्त्वात् ।। ६३.२१२.२६

२२६४ यथा यत्पृष्टवानद्य त्वं मामरिनिषूदन ।
शिष्येणैव सता पूर्वमहं पृष्टो गुरुस्त्वया ।। ६३.२१३.१

२२६५ पुराकल्पे हि कस्मिंश्चित्तत्त्वमात्मादिकात्मिका ।
आसीदियं चित्प्रतिभा गुरुशिष्यात्मना वने ।। ६३.२१३.२

२२६६ गुरुस्तत्राहमभवं शिष्यस्त्वमभवस्तदा ।
पृष्टवान्मां त्वमग्रस्थ इदमुद्दामधीरधीः ।। ६३.२१३.३

२२६७ सर्वस्य भगवञ्छिन्धि ममेममतिसंशयम् ।
किं नश्यति महाकल्पे किं वस्तु न विनश्यति ।। ६३.२१३ ४

२२६८ पुत्र शेषमशेषेण दृश्यमाशु विनश्यति ।
यथा तथा स्वप्नपुरं सौषुप्तीं स्थितिमीयुषः ।। ६३.२१३.५

२२६९ निर्विशेषेण नश्यन्ति भुवः शैला दिशो दश ।
क्रिया कालः क्रमश्चैव न किंचिदवशिष्यते ।। ६३.२१३.६

२२७० नश्यन्ति सर्वभूतानि व्योमापि परिणश्यति ।
स सर्वजगदाभासमुपलब्धुरसंभवात् ।। ६३.२१३.७

२२७१ ब्रह्मविष्ण्विन्द्ररुद्राद्या ये हि कारणकारणम् ।
तेषामप्यतिकल्पान्ते नामापीह न विद्यते ।। ६३.२१३.८

२२७२ शिष्यते हि चिदाकाशमव्ययस्यानुमीयते ।
तत्कालशेषतानेन सर्गानुभवहेतुना ।। ६३.२१३.९

२२७३ नासतो विद्यते भावो नाभावो विद्यते सतः ।
इदं तत्कथमाभोगि विद्यमानं क्व गच्छति ।। ६३.२१३.१०

२२७४ न विनश्यत एवेदं ततः पुत्र न विद्यते ।
नासतो विद्यते भावो नाभावो विद्यते सतः ।। ६३.२१३.११

२२७५ यत्तु वस्तुत एवास्ति न कदाचन किंचन ।
तदभावात्म तद्नाम कथं नाम विनश्यति ।। ६३.२१३.१२

२२७६ क्व स्थितं मृगतृष्णाम्बु क्व स्थिरो द्वीन्दुविभ्रमः ।
क्व स्थिरा केशदृग्व्योम्नि क्व भ्रान्त्यनुभवः स्थिरः ।।६३.२१३.१३

२२७७ सर्वं दृश्यमिदं पुत्र भ्रान्तिमात्रमसन्मयम् ।
स्वप्ने पुरमिवाभाति कथमेतन्न शाम्यति ।। ६३.२१३.१४

२२७८ शाम्यतीदमशेषेण तथा सर्वत्र सर्वदा ।
यथा जाग्रद्विधौ स्वप्नः स्वप्ने वा जागरो यथा ।। ६३.२१३.१५

२२७९ यथा स्वप्नपुरं शान्तं न जाने क्वाशु गच्छति ।
शान्तं तथा जगद्दृश्यं न जाने क्वाशु गच्छति ।। ६३.२१३.१६

२२८० किमिदं भाति भगवन्न विभाति च किं पुनः ।
कस्येदं वस्तुनो रूपं चिद्व्योम्नो वितताकृतेः ।। ६३.२१३.१७

२२८१ चिदाकाशमिदं पुत्र स्वच्छं कचकचायते ।
यन्नाम तज्जगद्भाति जगदन्यन्न विद्यते ।। ६३.२१३.१८

२२८२ अस्यैतद्वस्तुनो रूपं चिद्व्योम्नो वितताकृतेः ।
रूपमत्यजदेवाच्छं यदित्थमवभासते ।। ६३.२१३.१९

२२८३ कचनाकचनं सर्गक्षयात्मास्य निजं वपुः ।
व्योमात्म शुक्लकृष्णं स्याद्यथावयविनो वपुः ।। ६३.२१३.२०

२२८४ यथायं त्वं सितोदान्तरेक एवादितः कचैः ।
तथा ब्रह्मैवमच्छात्म सर्गे सर्गक्षयेऽक्षयम् ।। ६३.२१३.२१

२२८५ यथा स्वप्ने सुषुप्ते च निद्रैकैवाक्षयानिशम् ।
सर्गेऽस्मिन्प्रलये चैव ब्रह्मैकं चितिरव्ययम् ।। ६३.२१३.२२

२२८६ यथा स्वप्ने जगद्द्रष्टुः शान्तं शाम्यत्यशेषतः ।
तद्वदस्मज्जगदिदं शान्तं शाम्यत्यशेषतः ।। ६३.२१३.२३

२२८७ तदन्यत्रास्ति खे खाख्यं तथेत्यङ्ग न विद्महे ।
अशङ्क्यं परखे त्वेतदस्मच्चिद्व्योम्नि संभवात् ।। ६३.२१३.२४

२२८८ यथेहास्मच्चिदाकाशकचनं सर्गसंक्षये ।
तथान्यत्संविदाकाशं नैवमित्यत्र का प्रभा ।। ६उ.२१३.२५

२२८९ एवं चेत्तद्यथा स्वप्ने द्रष्टुरन्यः स दृश्यधीः ।
विद्यते तद्वदन्यत्र मन्येऽस्ति जगदादिधीः ।। ६उ.२१३.२६

२२९० एवमेतन्महाप्राज्ञ स्वरूपं तु न तज्जगत् ।
चिति भाति स्वरूपं तत्तद्वदेव न भाति च ।। ६उ.२१३.२७

२२९१ न भाति न च तत्किंचिन्न च तत्किंचिदेव सत् ।
तच्चिदाकाशकचनं के तत्र सदसद्दृशौ ।। ६उ.२१३.२८

२२९२ विद्यते तद्धि सर्वत्र सर्वं सर्वेण सर्वदा ।
न विद्यते च तत्किंचित्सर्वं सर्वत्र सर्वदा ।। ६उ.२१३.२९

२२९३ तत्सत्तत्सर्वदा सर्वमसच्चासद्धि वाखिलम् ।
तन्मयं तच्चिदाकाशं न नाशि न च नाशि तत् ।। ६उ.२१३.३०

२२९४ यन्नाम सच्चिदाकाशं सर्गप्रलयरूपि तत् ।
तद्दुःखायापरिज्ञातं परिज्ञातं परः शमः ।। ६उ.२१३.३१

२२९५ विद्यते सर्वथैवेदं सर्वं सर्वत्र सर्वदा ।
न विद्यते सर्वथा च सर्वं सर्वत्र सर्वदा ।। ६उ.२१३.३२

२२९६ एष देवो घटः शैलः पटः स्फोटस्तटो वटः ।
तृणमग्निः स्थावरं च जंगमं सर्वमेव च ।। ६उ.२१३.३३

२२९७ अस्ति नास्ति च शून्यं च क्रिया कालो नभो मही ।
भावाभावौ भवो भूतिर्नाशाः पाशाः शुभाशुभाः ।।६उ.२१३.३४

२२९८ तन्नास्त्येव न यन्नाम नित्यमेकस्तथा बहिः ।
आदिमध्यमथान्तं तु कालत्रितयमेव च ।। ६उ.२१३.३५

२२९९ सर्वं सर्वेण सर्वत्र सर्वदैवात्र विद्यते ।
सर्वं सर्वेण सर्वत्र सर्वदैवात्र न विद्यते ।। ६उ.२१३.३६

२३०० यदैवं राम सर्वात्म सर्वमेवास्ति सर्वदा ।
ब्रह्मात्मत्वात्स्वप्नसंवित्पुरन्यायेन वै तदा ।। ६उ.२१३.३७

२३०१ तृणं कर्तृ तृणं भोक्तृ ब्रह्मात्मत्वात्तृणं विभुः ।
घटः कर्ता घटो भोक्ता घटः सर्वेश्वरेश्वरः ।। ६उ.२१३.३८

२३०२ पटः कर्ता पटो भोक्ता पटः सर्वेश्वरेश्वरः ।
दृशिः कर्ता दृशिर्भोक्ता दृशिः सर्वेश्वरेश्वरः ।। ६उ.२१३.३९

२३०३ गिरिः कर्ता गिरिर्भोक्ता गिरिः सर्वेश्वरेश्वरः ।
नरः कर्ता नरो भोक्ता नरः सर्वेश्वरेश्वरः ।। ६उ.२१३.४०

२३०४ प्रत्येकं सर्ववस्तूनां कर्ता भोक्ता परात्परः ।
अनादिनिधनो धाता सर्वं ब्रह्मात्मकं यतः ।। ६उ.२१३.४१

२३०५ तृणकुम्भादयस्त्वेते स्वया विभुतया विभुः ।
एवंरूपा स्थिता रूपं यद्विभातः क्षयोदयौ ।। ६उ.२१३.४२

२३०६ बाह्योऽर्थोऽस्ति स एवेह कर्ता भोक्ता तथाविधः ।
विज्ञानमात्रमेवास्ति कर्तृ भोक्तृ तथाविदाम् ।। ६उ.२१३.४३

२३०७ न कश्चिच्चेव कर्तेह न च भोक्ता तथाविदाम् ।
कश्चिदीश्वर एवेह कर्ता भोक्ता तथाविदाम् ।। ६उ.२१३.४४

२३०८ सर्वमेव पदे तस्मिन्संभवत्युत्तमोत्तमे ।
विधयः प्रतिषेधाश्च के ते सन्ति न सन्ति के ।। ६उ.२१३.४५

२३०९ शुद्धे द्रष्टेव चिद्व्योम दश्यतामिव भावयत् ।
स्वमात्मानं जगदिति पश्येत्तिष्ठेदनामयम् ।। ६उ.२१३.४६

२३१० सर्वा दृशो विधिनिषेधदृशश्च सर्वाः
संकल्पवेदनविशेषसशेषपूर्वाः ।
सत्यात्मिकाः सततमेव न चैव सत्या
रूपं यथानुभवमत्र यतः स्वरूपम् ।। ६उ.२१३.४७

२३११ इति त्वया शिष्यतया मदन्तिका-
च्छ्रुतं पुरा तेन न चासि बुद्धवान् ।
ततोऽनुभूयान्यजगद्भवाद्भवा-
निहाद्य जातोऽसि तदेव पृच्छसि ।। ६उ.२१३.४८

२३१२ ज्ञानं सदेतदखिलं श्रुतमुत्तमं चि-
त्संसारदीर्घरजनीसितरश्मिबिम्बम् ।
जातस्त्वमभ्युदयवानमलैकबोध
उत्सार्य मोहमनुतिष्ठ यथागतं त्वम् ।। ६उ.२१३.४९

२३१३ तिष्ठंस्तदात्मनि परे विमलस्वभावे
सर्वात्मके तपति सर्वपदार्थमुक्तः ।
निर्वाणशान्तमतिरम्बरकोशकान्तो
धर्मेण राज्यमनुपालय तीर्णतृष्णः ।। ६उ.२१३.५०

२३१४ नष्टो मोहः पदं प्राप्तं त्वत्प्रसादान्मुनीश्वर ।
संपन्नोऽहमहं सत्यमत्यन्तमवदातधीः ।। ६उ.२१४.१४

२३१५ स्थितोऽस्मि गतसंदेहः स्वभावे ब्रह्मरूपिणि ।
निरावरणविज्ञानः करिष्ये वचनं तव ।। ६उ.२१४.१५

२३१६ स्मृत्वा स्मृत्वाऽमृतासेकसौख्यदं वचनं तव ।
अर्हितोऽपि च शान्तोपि हृष्यामीव मुहुर्मुहुः ।। ६उ.२१४.१६

२३१७ नैव मेऽद्य कृतेनार्थो नाकृतेनेह कश्चन ।
यथा स्थितोऽस्मि तिष्ठामि तथैव विगतज्वरः ।। ६उ.२१४.१७

२३१८ न शत्रुर्न च मित्रं मे न क्षेत्रं दुर्जनो जनः ।
दुर्बोधैषा जगत्क्षुब्धा शान्ता सर्वार्थसुन्दरी ।। ६उ.२१४.१९

२३१९ कथमेतां जनो वेत्ति विना भवदनुग्रहम् ।
विनैव सेतं पोतं वा बालोऽब्धिं लङ्घयेत्कथम् ।। ६उ.२१४.२०

२३२० संपदामथ दृष्टीनां शास्त्राणामापदां गिराम् ।
देशानामथ दृष्टानां दृष्टः सीमान्त उत्तमः ।। ६उ.२१४.२४

२३२१ यन्न श्रुतं ब्रह्मलोके स्वर्गे भूमितले तथा ।
कर्णौ तज्ज्ञनमाकर्ण्य यातौ मेऽद्य पवित्रताम् ।। ६उ.२१४.२५

२३२२ निवृतोऽस्मि प्रशान्तोऽस्मि प्राप्तोस्मि परमं पदम् ।
चिराय परिपूर्णोऽस्मि सुखमासे च केवलम् ।। ६उ.२१४.२७

२३२३ मोक्षाभ्युपायान्सुमहानुभावान्
ज्ञास्यन्ति ये तत्त्वविदां वरिष्ठाः ।
पुनः समेष्यन्ति न संसृतिं ते
कोऽर्थः सुताऽन्येन बहूदितेन ।। ६उ.२१५.१०

२३२४ बहुश्रुता ये प्रविचार्य सम्य-
क्प्रबोधितार्थे कथया जनाय ।
सन्तो वदिष्यन्ति पुनः शिशुत्वं
न ते प्रयास्यन्ति किमन्यवाक्यैः ।। ६उ.२१५.११

२३२५ ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं श्रीवसिष्ठं नताःस्मः ।। ६उ.२१६.२६

।। ॐ तत् सत् ।।